CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 93

Title YAJNYAVALKYASMRTI -
ACARA ADHYAYA
WITH MITAK'SARA.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

*Shastri Dinmanishankar Pustak-Bhandara*

No.: 93 Subject: Dharmaśāstra

Title: Yāgnyavalkya Smṛti with Mitākṣarā only Ācāra Adhyāya.

Author: Yājnavalkya and Vijñāneśvara Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11" X 3" Extent: 70 foll.

Language: Sanskrit Script: Devanāgarī.

Remarks: Complete.

॥श्री॥ श्रीवासुदेवाय नमः॥ नमो विघ्नहर्त्रे॥ धर्म्माधर्म्मौ न द्विपाकास्तयोपि क्लेशाः पंचप्राणिनामायतंते॥ य
१ स्मिन्नेतैर्नोपरामृष्ट ईशो यस्तं वंदे सर्वमोंकारवाच्यं॥१॥ याज्ञवल्क्यमुनिभाषितं मुनिर्विश्वरूपविकटोक्तिविस्तृ
तं॥ धर्मशास्त्रमृजुभिर्मिताक्षरैर्बालबुद्धिविधये विविच्यते॥२॥ याज्ञवल्क्यशिष्यः कश्चित्प्रश्नोत्तररूपं याज्ञव
ल्क्यप्रणीतं धर्म्मशास्त्रं संक्षिप्य कथयामास॥ यथा मनुप्रोक्तं भृगुः॥ तस्य चायमाद्यः श्लोकः॥ योगीश्वरं या
ज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन्॥ वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषतः॥१॥ योगीनां सनकादीनामीश्वरः
श्रेष्ठः तं याज्ञवल्क्यं संपूज्य मनोवाक्कायकर्मभिरभ्यर्च्य मुनयः॥ सामश्रवःप्रभृतयश्चरणक्ष
रणयोग्याः अब्रुवन् उक्तवंतः॥ धर्म्मान् नः अस्मभ्यं ब्रूहिति। कथमशेषतः। कार्त्स्न्येन केषां वर्णाश्रमेतरा
णां। ब्राह्मणादयः। आश्रमाः ब्रह्मचारिप्रभृतयः। इतरे अनुलोमप्रतिलोमजाताः मूर्द्धावसिक्तादयः।
इतरशब्दस्य द्वंद्वे चेति सर्वनामसंज्ञाप्रतिषेधः॥ अत्र धर्मशब्दः षड्विधस्मार्त्तधर्मविषयः। तद्यथा॥ वर्णध
र्म आश्रमधर्म वर्णाश्रमधर्मो गुणधर्मो निमित्तधर्मः। साधारणधर्मश्चेति॥ तत्र वर्णधर्मो नित्यं मद्यं ब्राह्मणो वर्ज
येदित्यादि। आश्रमधर्मोग्नींधनभैक्षचर्यादिः। वर्णाश्रमधर्मः पालाशो दंडो ब्राह्मणस्येत्येवमादिः॥ गुण १
धर्मः शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनादिः॥ निमित्तधर्मो विहिताकरणप्रतिषिद्धसे

१ वननिमित्तं प्रायश्चित्तं॥ साधारणधर्मः॥ अहिंसादिः॥ शौचाचारांश्चाशिक्षयेदित्याचार्यकरणविधिप्रयुक्तत्वा
द्धर्मशास्त्राध्ययनस्य प्रयोजनादिकथनं नातीवोपयुज्यते॥ तत्र चायं क्रमः। प्रागुपनयनात्कामचारः। उ
र्द्ध्वमुपनयनात्प्राग्वेदाध्ययनोपक्रमाद्धर्मशास्त्रविहितयमनियमोपेतस्य वेदाध्ययनं। ततस्तदर्थजिज्ञा
सा। ततस्तदर्थानुष्ठानमिति। तत्र यद्यपि धर्मार्थकाममोक्षाः शास्त्रेणानेन प्रतिपाद्यंते। तथापि धर्मस्य प्राधा
न्याद्धर्मग्रहणं। प्राधान्यं च धर्मफलत्वादितरेषां। न च वक्तव्यं धर्मफलोऽधर्म इत्यत्र विशेष इति। यतोऽर्थमंतरेण
पि जयतीर्थयात्रादिना धर्मनिष्पत्तिरर्थलेशोपि न धर्ममंतरेणेति। एवं काममोक्षावपीति॥१॥ मिथिलास्थः
स योगीद्रः क्षणं ध्यात्वाब्रवीन्मुनीन्। यस्मिन्देशे मृगः कृष्णः तस्मिन्धर्मान्निबोधत॥ मिथिलानाम्ना नगरी त
त्रस्थितः स याज्ञवल्क्यो योगीश्वरः क्षणं ध्यात्वा किंचित्कालं मनः समाधाय एतेषां वर्णाधिकारिणो वितयेनष्ट
ब्रवीति युक्तमेतेभ्यो वक्तुमित्युक्तवान्मुनीन्। कृष्णसारो मृगो यस्मिन्देशे स्वच्छंदं विचरति तस्मिन्देशे वक्ष्य
माणधर्मा अनुष्ठेयाः। नान्यत्रेत्यभिप्रायः। शौचाचारांश्च शिक्षयेदित्याचार्यस्य धर्मशास्त्राध्यापने विधिः शि
ष्येण तदध्ययनं कर्त्तव्यमिति कल्पोवगम्यते इत्यत आह॥२॥ पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रि
ताः वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश। पुराणं ब्राह्मादि। न्यायः तर्कविद्या। मीमांसा वेदवाक्यवि
चारः। धर्मशास्त्रं मानवादि। अंगानि व्याकरणादीनि षट्। एतैरुपेताश्चत्वारो वेदाः। विद्यापुरुषार्थसाधना
न। तासां स्थानानि चतुर्दश धर्मस्य च स्थानानि हेतवः। एतानि चैवर्णिकरध्येतव्यानि। तदंतरगतत्वाद्धर्म

शास्त्रमध्येतव्यं। तत्र ब्राह्मणेन विद्याप्राप्तये धर्मानुष्ठानाय चाधिगंतव्यानि। क्षत्रियवैश्याभ्यां धर्मानुष्ठानाय। तथा श्रो
त्रेण विद्यास्थानान्यनुक्रम्योक्तं। एतानि ब्राह्मणोऽधिकुरुते। स च द्वितीयं दर्शयति। मनुरपि। द्विजातीनां धर्मशास्त्राध्य
यनेऽधिकारो ब्राह्मणस्य प्रवचनेनान्यस्येति दर्शयति। निषेकादिश्मशानांतो मंत्रैर्यस्योदितो विधिः। तस्य शास्त्रेऽधिक
रोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित्। विद्याब्राह्मणेनेदं अध्येतव्यं प्रयत्नतः। शिष्येभ्यश्च प्रवक्तव्यं सम्यक् नान्येन के
नचिदिति। अस्तु धर्मशास्त्रमध्येतव्यं। याज्ञवल्क्यप्रणीतस्यास्य शास्त्रस्य किमायातमित्यत आह।। छ।। मन्वत्रिवि
ष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः। यमापस्तंबसंवर्ताः कात्यायनबृहस्पती।। छ।। उशनःशब्दपर्यंतो द्वंद्व एकव
द्भावः।। याज्ञवल्क्यमुनिप्रणीतमिदं धर्मशास्त्रमित्यभिप्रायेण नेयं परिसंख्या किंतु प्रदर्शनार्थमेतदतो बौधा
यनादेरपि धर्मशास्त्रत्वमविरुद्धं।। एतेषां प्रत्येकं प्रामाण्येऽपि साकांक्षाणामाकांक्षापरिपूरणमन्यतः क्रिय
ते। विरोधे विकल्पः।। इदानीं धर्मस्य कारकहेतूनाह।। छ।। देशे काल उपायेन द्रव्यं श्रद्धासमन्वितं। पात्रे प्रदीयते य
त्तत्सकलं धर्मलक्षणं। देशो यस्मिन्देशे मृगः कृष्णस्तूक्तलक्षणः। कालः संक्रांत्यादिः। उपायः शास्त्रोक्तेतिकर्तव्य
ताकलापः। द्रव्यं प्रतिग्रहादिलब्धं गवादि। श्रद्धा आस्तिक्यबुद्धिस्तदन्वितं च यथा भवति तथा पात्रं न विद्ययेत्येव
मादि वक्ष्यमाणलक्षणं। प्रदीयते यथा न प्रत्यावर्त्तते तथा परस्वत्वापत्त्यवसानं त्यज्यते। एतद्धर्मस्योत्पादकं। कि
मेतावदेवेत्याह। सकलमिति। अन्यदपि शास्त्रोक्तं जातिहोमयागादि तत्सकलं धर्मस्य कारकं। जातिगुणद्रव्य
भावार्थात्मकं चतुर्विधं धर्मस्य कारकमित्युक्तं भवति। तच्च समस्तं व्यस्तं वा यथाशास्त्रं द्रव्यभावार्थात्मकं चतुर्विधं २

इदानीं धर्मस्य ज्ञापकहेतूनाह।। छ।। श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। सम्यक्संकल्पजः कामो ध
र्ममूलमिदं स्मृतं।। श्रुतिर्वेदः। स्मृतिर्धर्मशास्त्रं। तथा मनुः।। श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिरिति। सदा
चारः। सतां शिष्टानामाचारोऽनुष्ठानं स्वस्य चात्मनः प्रियं वैकल्पिके विषये गर्भाष्टमेऽष्टमे वाब्दे इत्यादावात्मेच्छैव निया
मिका। सम्यक्संकल्पाज्जातः कामः शास्त्राविरुद्धो मया भोजनव्यतिरेकेणोदकं न पातव्यमिति। एते धर्मस्य मूलं
प्रमाणं एतेषां विरोधे पूर्वपूर्वबलीयस्त्वं।। देशादिकारकहेतूनामपवादमाह।। छ।। इज्याचारदमाहिंसादानस्वा
ध्यायकर्मणां।। अयं तु परमो धर्मो यद्योगेनात्मदर्शनं। इज्यादीनां कर्मणामयमेव परमो धर्मः। यद्योगेन बाह्यचि
त्तवृत्तिनिरोधेनात्मनो दर्शनं यथात्मस्वरूपज्ञानं योगेनात्मज्ञानेन देशादिनियमो नास्तीत्यर्थः।। तदुक्तं। यत्रैकाग्रता
तत्राविशेषादिति।। कारकहेतुषु ज्ञापकहेतुषु वा संदेहे निर्णयहेतुमाह।। छ।। चत्वारो वेदधर्मज्ञाः।। पर्षत्त्रैविद्यमे
व वा। सा ब्रूते यं स धर्मः स्यादेको वाध्यात्मवित्तमः।। चत्वारो ब्राह्मणाः। वेदशास्त्रज्ञाः।। पर्षत्।। तिस्रो विद्या अधीयत
इति त्रैविद्यास्तेषां समूहस्त्रैविद्यं।। धर्मशास्त्रज्ञत्वमत्राप्यनुवर्त्तते।। तद्वा पर्षत्।। सा पूर्वोक्ता पर्षत्।। यं धर्मं ब्रूते स
धर्मः। अध्यात्मज्ञाने सुनिपुणो धर्मशास्त्रज्ञश्च स एको वा यं ब्रूते सोऽपि धर्मः।। ९।। ।।इत्युपोद्घातप्रकरणं।। ए
तैर्नवभिः श्लोकैः सकलशास्त्रोपोद्घातमुक्त्वा इदानीं वर्णादीनां धर्मान्वक्तुं प्रथमं तावद्वर्णानाह।। छ।। ब्रह्मक्षत्रिय
विट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः। निषेकाद्याः श्मशानांतास्तेषां वै मंत्रतः क्रियाः।। ब्राह्मणक्षत्रियवैश्यशूद्राश्च
त्वारो वर्णा वक्ष्यमाणलक्षणास्तेषामाद्यास्त्रयो ब्राह्मणक्षत्रियविश्याः द्विजाः। द्विर्जायंते इति द्विजाः। द्विजानां वै एव नम

ड्ढस्य निषेकाद्याः। निषेको गर्भाधानमाद्यो यासु तास्तथोक्ताः। श्मशानांतः संबंधिकर्मत्रयं तो यासां ताः। क्रिया मंत्रैर्न्न
वंति। इदानीं ताः। क्रिया अनुक्रामति॥ ८॥ गर्भाधानमृतौ पुंसः सवनं स्पंदनात् पुरा। षष्ठेष्टमे वा सीमंतो मास्यंते
जातकर्म च। अहन्येकादशे नाम चतुर्थे मासि निःक्रमः। षष्ठेन्नप्राशनं मासि चूडा कार्या यथाकुलं। गर्भाधानमित्य
नुगतार्थकर्मनामधेयां एवं वक्ष्यमाणान्यपि। तत्र गर्भाधानमृतौ ऋतुकाले वक्ष्यमाणलक्षणे। पुंसवनाख्यं कर्म गर्भच
लनात् पूर्वं। षष्ठे वाष्टमे वा मासि सीमंतोन्नयनं। एते च पुंसवनसीमंतोन्नयने क्षेत्रसंस्कारकर्मत्वात् सकृदेव का
र्ये न प्रतिगर्भं। यथाह देवलः। सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृतेति। एते आहिताग्नेर्गर्भे कोशात् क्रमा
ज्जातकर्म। एकादशेहनि नामकर्म। तच्च पितामहमातामहादिसंबंधपिता कुर्यात्। यथाह शंखः। कुलदेवता
संबंधं पिता नाम कुर्यादिति। चतुर्थे मासि निःक्रमणं कर्म। षष्ठे मास्यन्नप्राशनं कर्म। चूडाकरणं तु यथाकु
लं कार्यमिति प्रत्येकं संबध्यते। एतेषां नित्यत्वेप्यानुषंगिकं फलमाह॥ ९॥ एवमेनः शमं याति बीजगर्भसमुद्भ
वं। एवमुक्तेन प्रकारेण गर्भाधानादिभिः संस्कारकर्मभिः कृतैरेनः पापं शमं याति। किंभूतं। बीजगर्भसमुद्भवं
शुक्रशोणितसंबंधं। गोत्रव्याधिसंक्रांतिनिमित्तं न तु पतितोत्पन्नत्वादि। स्त्रीणां विशेषमाह॥ १०॥ तूष्णीमेताः क्रि
याः स्त्रीणां विवाहस्तु समंत्रकः। एता जातकर्मादिकाः क्रियाः स्त्रीणां तूष्णीं विनैव मंत्रैर्यथाकालं कार्याः। विवा
हः पुनः समंत्रकः॥ ११॥ गर्भाष्टमेष्टमे वाब्दे ब्राह्मणस्योपनायनं। राज्ञामेकादशे सैके विशामेके यथाकुलं। ग २
र्भाधानमादिं कृत्वा जन्मनं वाष्टमे वर्षे ब्राह्मणस्योपनायनं। उपनयनमेवोपनायनं। छंदोनुसारात्। अत्रैतद्यादि

कल्पः। राज्ञामेकादशे विशो वैश्यस्य सैके एकादशे। द्वादश इत्यर्थः॥ गर्भग्रहणं सर्वत्रानुवर्तते॥ समासे गुणत्वं तस्या
पि गर्भशब्दस्य बुध्याविच्छेदोनयत्रानुवर्तते। समासे गुणभूतस्यापि गर्भशब्दस्य विशाइतिस्मृत्यंतरदर्शनात्। यथाश्व
शब्दानुशासनके शाब्दानामिति। अत्रापि कार्यमित्यनुवर्तते। कुलस्थित्या चोपनयनमिच्छंति॥ १२॥ उपनीय गुरुः शि
ष्यं महाव्याहृतिपूर्वकं। वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्। स्वगृह्योक्तविधिनोपनीय शिष्यं गुरुर्महाव्याहृ
तिपूर्वकं वेदं अध्यापयेत्। महाव्याहृतयश्च भूरादि सत्यांताः। सप्त पंच वा गौतममतिप्रायेण॥ शौचमाचारांश्च वक्ष्यमा
णलक्षणान् शिक्षयेत्। उपनीय शौचाचारान् शिक्षयेत्। इत्यनेन प्रागुपनयनात् कामचारो दर्शितो वर्णधर्माश्च वर्ज
यित्वा स्त्रीणामप्येतत्समानं विवाहादर्वाक् उपनयनस्थानीयत्वाद्विवाहस्य। शौचाचारानाह॥ १३॥ दिवा संध्यासु कर्णस्थ
ब्रह्मसूत्र उदङ्मुखः। कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः॥ अथ कर्णस्थब्रह्मसूत्रं यस्य स तथोक्तः। कर्णश्च द
क्षिणः पवित्रं दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजेत्। इति लिंगात्। असावहनि संध्ययोश्चोदङ्मुखो मूत्रपुरीषे कुर्यात्
च काराद् स्मादिरहिते देशे रात्रौ तु दक्षिणामुखः॥ १४॥ गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः। गंधलेपक्षयकरं शौ
चं कुर्यादतंद्रितः। अनंतरं शिश्नं गृहीत्वा उत्थाय मृद्भिः। वक्ष्यमाणलक्षणाभिर्मृद्भिश्च गंधलेपयोः क्षयकरं शौचं कु
र्यादनलसः। अभ्युद्धृतैरिति जलात्। शौचनिषेधः। अत्र गंधलेपक्षयकरमिति सर्वाश्रमिणां साधारणं शौचं मनुस्मृत्या
दिनियमस्तु अदृष्टार्थः॥ १५॥ अंतर्जानु शुचौ देश उपविष्ट उदङ्मुखः। प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्। शुचौ
अस्थिविड्व्यासंस्पृष्टे देशे हस्तपानशयनासनादिनिषेधः। उपविष्टो न स्थितः शयानः प्रक्रोगच्छन्वा उदङ्मुखः प्राङ्

गुरवो वेति दिग्गंतरनिवृत्तिः। शुचौ देशे इत्येन स्मात्यार प्रक्षालनादिः। ब्राह्मेण तीर्थेन वक्ष्यमाणेन द्विजो नत्यशूद्रादिर्नि
त्यं सर्वकालं आ। अमांतरगतो पितृ उपस्पृशेदाचमेत्। कथं मंत्रजांनु जानुनोर्मध्ये हस्तौ कृत्वा दक्षिण हस्तेनेति॥ ७॥ कनि
ष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च। प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्। कनिष्ठाया देशिन्या अंगुष्ठस्य च मूलानि
करस्याग्रं च प्रजापतिपितृब्रह्मदेवतीर्थानि यथाक्रमं वेदितव्यानि॥ ८॥ त्रिराश्पयोद्विरुन्मृज्य खान्यद्भिः समुपस्पृशे
त्। अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः। वारत्रयमपः पीत्वा मुखमंगुष्ठमूलेन द्विरुन्मृज्य खानि विज्ञाणिकर्ण
कायगतानि श्राणादीनि आद्भिरुपस्पृशेत्। अद्भिः ईद्यांतराः संस्पृष्टाभिः पुनरपृथग्रहणं प्रतिद्धिद्रमुदकग्रहणार्थं पु
नस्ताएव शिनष्टि। प्रकृतिस्थाभिर्गंधरूपरसस्पर्शांतरमप्राप्ताभिः। उशब्दाद्वर्षधारागता नाम्भश्शूद्राद्यावर्जिताना प्रति
षेधः। ९॥ हृत्कंठतालुगाभिस्तु यथासंख्यं द्विजातयः। शुध्येरन्स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः। हृत्कंठतालु
गाभिरद्भिर्यथाक्रमेण द्विजातयः शुध्यंति स्त्री च शूद्रश्च तत्र। अंते न तालुना स्पृष्टाभिः। सकृद्विते वेदाण् द्विषे
षत॥ च शब्दादनुपनीतोपि॥ १०॥ स्नानमब्दैवतैर्मंत्रैर्मार्जनं प्राणसंयमः। सूर्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं ज
पः। प्रातःस्नानं यथाशास्त्रं अब्दैवतैरापोहिष्ठेत्येवमादिभिर्मार्जनं प्राणसंयमः। प्राणायामो वक्ष्यमाणलक्षणः। तत
सूर्योपस्थानं सौरेण मंत्रेण गायत्र्यास्तत्सवितुर्वरेण्यमित्याद्याः। प्रतिदिवसं जपः। कार्यश्शेषो यथालिंगं प्रत्येकं संब
ध्यते॥ ११॥ गायत्रीं शिरसा सार्धं जपेद्व्याहृतिपूर्विकां। प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः। गायत्री पूर्वोक्ता आपो
ज्योतिरित्यादिना शिरसा संयुक्तं उक्ताउक्ता व्याहृतिपूर्विकां। प्रतिव्याहृतिप्रणवेन संयुक्ता मोन्त्ररो इतिस्तु वत्रीन्वा ४

ग्रहणधारणशक्तः। शुचिर्बाह्याभ्यंतरशौचवान्। कल्पः आधिव्याधिरहितः। अनसूयकोदोषानाविष्कर्त्तारेण गुणा
करणशीलः साधुर्वृत्तवान्। शक्तः शुश्रूषायां। आप्तो बंधुः। ज्ञानदो विद्याप्रदः। वित्तदः। अपण्यं वर्श अर्थप्रदा
ता। एते गुणाः समस्ता व्यस्ताश्च यथासंभवं द्रष्टव्याः एते च धर्मशास्त्रानुसारेण अध्याप्याः॥ १८॥ दंडाजिनोपवीतानि मे
खलां चैव धारयेत्। तथाभ्यंतरे प्रसिद्धं पलाशादिदंडं अजिनं च कार्ष्णादि उपवीतं कार्पासादिनिर्मितं मे
खलां च मुंजादिनिर्मितां॥ ब्राह्मणादि ब्रह्मचारी धारयेत्॥ १९॥ ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रमं॥ पू
र्वोक्तदंडादियुक्तो ब्रह्मचारी ब्राह्मणेषु अनिंद्येषु अभिशस्तादिव्यतिरिक्तेषु॥ स्वकर्मनिरतेषु भैक्षं चरेदात्मवृ
त्तये। आत्मनो जीवनाय न परार्थं। आचार्यतश्शायपि तत्र व्यतिरेकेण। निवेद्य गुरवे अनुज्ञातो भुंजीत तदनावे
तस्तु त्राद्यावितिनियमात्॥ अत्र च ब्राह्मणग्रहणं सन्नवेसतिनियमार्थं॥ यत्तु सार्ववर्णिकं भैक्षचरणमिति
त्रैवर्ण्यापस्पर्श्यच्छेचाव वर्णेषु चरेद्भैक्षमिति तदापद्विषयं। कथं भैक्षचर्या। आदिमध्यावसानेषु भवच्छब्दो र
पलक्षिता भवति भिक्षां देहीति। भवान्भवति देहि॥ भिक्षां देहि भवति। इत्येवं वर्णक्रमेण भैक्षचर्या कार्या
॥ २०॥ कृताग्निकार्यो भुंजीत वाग्यतो गुर्वनुज्ञया। अयोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन्। एवं तेन
विधिना भिक्षामाहृत्य गुरवे निवेद्य तदनुज्ञया तन्नाग्निकार्यो वाग्यतो मौनी सत्कृत्य संपूज्याकुत्सयन्। अनि
दन्। अपोशानक्रियां अमृतोपस्तरणमसीत्यादिकां पूर्वं कृत्वा भुंजीत॥ पूर्वाग्निकार्यग्रहणं संध्याकालेक न
थविदकृताग्निकार्यस्यकालांतरविधानार्थं। न तु न कृतीयाद्य देवव्रतमपीडयन् ब्रह्मचर्ये स्थितः। एकान्नं ५

रान्मुखनासिकासंचारिणंवायुंनिरुंधन्मनसाजपेदित्ययंप्राणायामः॥छ॥प्राणानाम्यसंप्रोक्ष्यद्वेचेनाद्वैवतेन
तु।जयन्नासीतसावित्रीमत्पुगातारकोदयात्।संध्यांऽप्राक्प्रातरेवंहितिष्ठेदासूर्यादर्शनात्।प्राणायामंपूर्वो
क्तंकृत्वाद्वचेनाद्वैवतेनपूर्वोक्तेनात्मानमद्भिःप्रोक्ष्यसावित्रीजपन्प्रत्यक्संध्यामासीतार्थात्पश्चान्मुखइतिलभ्य
ध्यते।आतारकोदयात्तारकोदयावधि।प्राक्संध्यांप्रातःसमयेएवंपूर्वोक्तंविधिमाचरन्॥प्राङ्मुखःसूर्योदयाव
धितिष्ठेत्।अहोरात्रयोःसंधौयाक्रियाविधीयतेसासंध्यातत्राह।संपूर्णादित्यमंडलदर्शनयोग्यकालः।नहिपरी
तारात्रिः।यस्मिन्कालेमंडलखंडस्योपलब्धिःससंधिः॥छ॥अग्निकार्यंततःकुर्यात्संध्ययोरुभयोरपि।ततोभि
वादयेद्वृद्धानसावहमितिब्रुवन्।ततःसंध्यायासानादनंतरंद्वयोःसंध्ययोरग्निकार्यं।अग्नौकार्यंसमित्प्रक्षेपा
दयत्तुकुर्यात्।स्वगृह्योक्तविधिना।तदनंतरंवृद्धान्गुरुप्रभृतीनभिवादयेत्॥कथंअसौदेवदत्तशर्माहमिति
स्वंनामकीर्तयन्॥छ॥गुरुंचैवाप्युपासीतस्वाध्यायार्थंसमाहितः।आहूतश्चाप्यधीयीत।लब्धंचास्मैनिवेदयेत्।हि
तंचास्यचरेन्नित्यंमनोवाक्कायकर्मभिः॥तथागुरुंवर्धमानलक्षणमुपासीतपरिचर्यपरिस्तदधीनस्तिष्ठेत्।स्वा
ध्यायार्थमध्ययनसिद्धये।समाहितअविक्षिप्तचित्तोभवेत्।आहूतश्चाप्यधीयीत।गुर्वाहूतएवाधीयीतानस्वयं
प्रेरयेत्।यच्चलब्धंतत्सर्वंगुरवेदेयेतद्।तथास्यगुरोर्हितमाचरेत्॥नित्यंसदामनोवाक्कायकर्मभिःनप्रतिकूलंकुर्य र्
त्।अपिशब्दात्तुगुरुदर्शनेगोतमोक्तकंठप्रावृतादिवर्जयेत्॥छ॥कृतज्ञाऽद्रोहिमेधाविशुचिकल्यानसूयकः
अध्याप्याधर्मतःसाधुशक्ताप्तज्ञानवित्तदाः।कृतमुपकारंनविस्मरतीतिकृतज्ञः।अद्रोहीदयावान्।मेधाविग्रंथ



नाद्यादनापदिव्याधंत्वात्वेब्राह्मणःपुनःश्राद्धेभ्यर्थितःसन्काममश्नीयात्।व्रतमपीडयन्।मधुमांसपरिहा
रेणात्रब्राह्मणग्रहणंक्षत्रियादेः।श्राद्धेभोजनमुदासार्थंराजन्यवैश्ययोश्चैवनैतत्कर्मविधीयतइतिस्मरणा
त्।मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं।भास्करालोकनाश्लीलपरिवादादिवर्जयेत्।मधुक्षौद्रंनम
द्यं।तस्यनित्यमद्यंब्राह्मणोवर्जयेदितिनिषेधात्मांसंभागादेरपिअंजनंघृतादिनागात्रस्य।कज्जलादिना
चाक्ष्णोः।उच्छिष्टमगुरोःशुक्तंनिष्ठुरवाक्यंननीरसंतस्यभवत्यातस्यप्रकरणेनिषेधात्।स्त्रियमुपभोगोप्रा
णिहिंसनं।भास्करस्यालोकनं।उदयास्तमयादिप्रबलावस्थासप्रश्लीलमसन्ननाषलीपरिवादःसदसद्रूप
स्यपरदोषस्यख्यापनं।आदिग्रहणात्स्मर्यमाणरोक्तगंधमाल्यंगृह्यते।एतानिब्रह्मचारीवर्जयेत्।गुर्वादिलक्ष
णमाह॥छ॥सगुरुर्यःक्रियाःकृत्वावेदमस्मैप्रयच्छति।उपनीयददद्वेदमाचार्यःसउदाहृतः।योसौगर्भाधि
नाद्याःउपनयनपर्यंताःक्रियाः।यथाविधिकृत्वावेदमस्मैब्रह्मचारिणेप्रयच्छतिसगुरुः॥यःपुनरुपन
यनमात्रंकृत्वावेदंप्रयच्छतिसआचार्यः॥छ॥एकदेशमुपाध्यायऋत्विक्यज्ञकृदुच्यते।एतान्मान्यायथापू
र्वमेभ्योमातागरीयसी॥वेदस्यैकदेशंमंत्रब्राह्मणयोरेकमंगानिवायोध्यापयतिसउपाध्यायः।यःपुनः
पाकयज्ञादिकंहतः॥करोतिसऋत्विग्भेतेचगुर्वाचार्योपाध्यायऋत्विजोयथापूर्वंयथाक्रमेणमान्याःपू
ज्या।एभ्यः।सर्वेभ्योमातागरीयसीपूज्यतमातथामातामान्यतायामनुः।उपाध्यायाद्दशाचार्यआचार्याणां
शतंपितासहस्रंतुपितॄन्मातागौरवेणातिरिच्यते।वेदग्रहणार्थंब्रह्मचर्यविधिमाह॥छ॥प्रतिवेदंब्रह्मचर्यं।

षोडशाब्दानि पंचवा। ग्रहणांतिकमित्येके। केशांतश्चैव षोडशे। यदा विवाहः संपन्नो न वेदानधीत्य वेदौ वा वेदं वे-
ति प्रवर्त्तते। न तदा प्रतिवेदं वेदप्रतिब्रह्मचर्यं पूर्वोक्तं षाड्शाब्दं वर्षाणि कार्यं। अशक्तौ पंच। ग्रहणांतिकमित्येके
वर्णयंति। केशांतः पुनर्गोदानाख्यं कर्म गर्भादारभ्य षोडशे वर्षे ब्राह्मणस्य कार्यं। एतच्च षाड्शवार्षिकं वेद-
व्रते वोढव्यं। इतरस्मिन्पक्षे यथासंपन्नं वेदितव्यं। राजन्यवैश्ययोरुपनयनकालवत्। द्वाविंशे चतुर्विंशे
वा द्रष्टव्यं॥ छ॥ उपनयनस्य परमावधिमाह॥ आषोडशाद्वा द्वाविंशाच्चतुर्विंशाच्च वत्सरात्। ब्रह्मक्षत्रविशां
काल उपनायनिकः परः॥ अत ऊर्द्ध्वं पतंत्येते सर्वधर्मबहिःकृताः। सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्र-
तोः॥ आषोडशाद्वर्षात् षोडशवर्षं यावत्। आद्वाविंशाच्चतुर्विंशाद्वर्षाद्ब्रह्मक्षत्रविशामुपनायनिक उपना-
यनसंबंधी परः कालो नातः परमुपनयनकालोस्ति। किंतु पतंत्येते सर्वधर्मबहिःकृताः। सर्वधर्मेष्वनधिका-
रिणो भवंति। व्रात्यस्तोमात्क्रतोर्विना। कृते तु तस्मिन्नुपनयनाधिकारिणो भवंति। आद्यास्त्रयो द्विजा इत्यु-
क्तं। तत्र हेतुमाह॥ छ॥ मातुरग्रेऽधिजायंते द्वितीयं मौंजिबंधनात्। ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः
स्मृताः॥ मातुः सकाशात्प्रथमं जायंते मौंजीबंधनाद्द्वितीयं जन्म। यस्मात्तस्मादेते ब्राह्मणक्षत्रियवैश्या उ-
च्यंते। ग्रहणाध्ययनफलमाह॥ छ॥ यज्ञानां तपसां चैव शुभानां चैव कर्मणां। वेद एव द्विजातीनां निःश्रेयसक-
रः परः॥ यज्ञानां श्रौतस्मार्तानां तपसां कायसंतापरूपाणां चांद्रायणादीनां शुभानां च कर्मणामुपनय-
नादिसंस्काराणामवबोधकत्वेन वेद एव द्विजातीनां परो निःश्रेयसकरो नान्यः। वेद एवेति तत्प्राबल्येन स्म- ६

तेरप्युपलक्षणार्थं। ग्रहणाध्ययनफलमुक्त्वेदानीं काम्यब्रह्मयज्ञाध्ययनफलमाह॥ छ॥ मधुना पयसा चैव स देवांस्त-
र्पयेद्द्विजः। पितॄन्मधुघृताभ्यां च ऋचोऽधीते च योऽन्वहं। यजूंषि शक्तितोऽधीते योऽन्वहं स घृतामृतैः। प्रीणाति देवानाज्ये-
न मधुना च पितॄंस्तथा। स तु सोमघृतैर्देवांस्तर्पयेद्योऽन्वहं पठेत्। सामानि तृप्तिं कुर्याच्च पितॄणां मधुसर्पिषा। योऽन्वहमृ-
चोऽधीते स मधुना पयसा च देवान्पितॄंश्च मधुघृताभ्यां तर्पयति। यः पुनः शक्तितोऽन्वहं यजूंष्यधीते। स घृतामृतैर्देवा-
न्पितॄंश्च मधुघृताभ्यां प्रीणाति। यस्तु सामान्यन्वहमधीते स सोमघृतैर्देवान्पितॄंश्च मधुसर्पिर्भ्यां प्रीणयति। ऋग्वादिग्रह-
णं सामान्येन तद्ग्वादिमात्रप्राप्त्यर्थं॥ छ॥ मेदसा तर्पयेद्देवानथर्वांगिरसः पठन्। पितॄंश्च मधुसर्पिर्भ्यामन्वहं शक्तितो
द्विजः। वाकोवाक्यं पुराणं च नाराशंसीश्च गाथिकाः। इतिहासांस्तथा विद्याः शक्त्याधीते च योऽन्वहं। मांसक्षीरौदनम-
धुतर्पणं स दिवौकसां। करोति तृप्तिं कुर्याच्च पितॄणां मधुसर्पिषा। ते तृप्तास्तर्पयंत्येनं सर्वकामफलैः शुभैः। यः
पुनः शक्तितोऽन्वहमथर्वांगिरसोऽधीते स देवान्मेदसा पितॄंश्च मधुसर्पिर्भ्यां तर्पयति। यस्तु वाकोवाक्यं प्रश्नोत्त-
ररूपं वेदवाक्यं पुराणं ब्राह्मादि चकारान्मानवादि धर्मशास्त्रं नाराशंसीश्च रुद्रदैवत्यान्मंत्रान्। गाथाश्च यज्ञ-
गाथेंद्रगाथाद्या इतिहासान्महाभारतादीन्। विद्याश्च वारुण्याद्याः शक्तितोऽन्वहमधीते। स मांसक्षीरौदनमधु-
भिर्देवान्पितॄंश्च मधुसर्पिर्भ्यां तर्पयति। ते तु नः तृप्ताः संतो देवाः पितरश्च एनं स्वाध्यायकारिणं सर्वकामफलैः शुभै-
रनन्योपघातलक्षणैस्तर्पयंति॥ प्रकृतं सार्थमाह॥ छ॥ यं यं क्रतुमधीयीत तस्य तस्याप्नुयात्फलं। त्रिर्वित्तपूर्णपृ-
थिवीदानस्य फलमश्नुते। तपसश्च परस्येह नित्यं स्वाध्यायवान्द्विजः। यस्य यस्य क्रतोः प्रतिपादकं वेदैकदे-

शं अन्वहमधीते। तस्य तस्य क्रतोः फलमाप्नोति। तथा वित्तपूर्णायाः पृथिव्याः॥ त्रिर्वारं दानस्य यत्फलं परस्य च
तपसः चांद्रायणादेर्यत्फलं तदपि नित्यस्वाध्यायवानाप्नोति। नित्यग्रहणं काम्यस्यापि सतो नित्यत्वज्ञापनार्थं। ए
वं सामान्येन ब्रह्मचारिधर्मानभिधायाधुना नैष्ठिकस्य विशेषमाह॥ छ। नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ
तदभावेस्य तनये पत्न्यां वैश्वानरे पि व॥ अनेन विधिना देहं साधयन्विजितेंद्रियः॥ ब्रह्मलोकमवाप्नोति न चेहा
जायते पुनः। उक्तेन प्रकारेणात्मानं निष्ठामुत्क्रांतिकालं नयतीति नैष्ठिकः। स यावज्जीवमाचार्यसमीपे वसे
त्। न वेदकालग्रहणोत्तरकालं स्वतंत्रो भवेत्॥ तदभावे पुत्रसमीपे तदभावे तद्भार्यासमीपे तदभावे वैश्वानरे पि। अ
नेनोक्तविधिना देहं साधयन् ह्रासयन् विजितेंद्रियः इंद्रियजये विशेषप्रयत्नवान्। ब्रह्मचारी ब्रह्मलोकमन्नत
त्वं प्राप्नोति। न कदाचिदिह पुनर्जायते॥ ॥इति ब्रह्मचारिप्रकरणं॥ ॥यः पुनर्वैवाह्यः तस्य विवाह
धर्मानमाह। गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया। वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा॥ पूर्वोक्तेन न्यायेन
वेदं मंत्रब्राह्मणात्मकं। व्रतानि ब्रह्मचारिधर्मानुक्तानानुवाकनयं वा पारं नीत्वा समाप्य गुरवे पूर्वोक्ताय वरमभि
लषितं यथाशक्ति दत्वा स्नायाद शक्तो तदनुज्ञया दत्तवरोपि। एषां च पक्षाणां शक्तिकालाद्यपेक्षया व्यवस्था॥
स्नानादनंतरं किं कुर्यादित्यत आह॥ छ॥ अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्। अनन्यपूर्विकां कां
तामसपिंडां यवीयसीं। अविप्लुतब्रह्मचर्यः अस्खलितब्रह्मचर्यो लक्षण्यां बाह्याभ्यंतरलक्षणैर्युक्तां बाह्या ७
नि तनुलोमकेशदशनादीनि मनुनोक्तानि आभ्यंतराण्यष्टौ पिंडान्कृत्वा इत्याद्याश्वलायनोक्तविधिना ज्ञातव्या

नि स्त्रियं नपुंसकनिवृत्तये स्त्रीत्वेन परीक्षितां॥ अनन्यपूर्विकां दानेनोपभोगेन वा पुरुषांतरापरिगृहीतां। कांतां
कमनीयां वोढुर्मनोनयनानंदकारिणीं यस्यां मनश्चक्षुषोर्निबंधस्तस्यामृद्धिरित्यापस्तंबस्मरणादे न्यूना
धिकां। गादिबाह्यदोषाभावे। असपिंडां समानः। एकः॥ पिंडो देहो यस्याः सा सपिंडा न सपिंडा असपिंडा अस
पिं पिंडा असपिंडा तां। सपिंडता च एकशरीरावयवान्वयेन भवति। तथाहि। पुत्रस्य पितृशरीरावयवान्वयेन पित्रा
सह एवं पितामहादिभिरपि पितृद्वारा तच्छरीरेण तच्छरीरावयवान्वयात्। एवं मातृशरीरावयवान्वयेन मात्रा। त
था मातामहादिभिरपि मातृद्वारेण एवं शरीरावयवान्वयात्। एवं पितृस्वपितृस्वस्रादिभिरपि। तथा पत्न्याः स
ह पत्या एकशरीरारंभकतया। एवं भ्रातृभार्याणामपि परस्परमेकशरीरारब्धैः सह एकशरीरारंभकत्वे
न। एवं यत्र यत्र सपिंडशब्दस्तत्र तत्र साक्षात्परंपरया वा एकशरीरावयवान्वयो वेदितव्यः। यद्येवं मा
तामहादीनां दशाहमाशौचं सपिंडे विधीयत इति अविशेषेण प्राप्नोति। स्यादेतत् यदि तत्र प्रत्तानामित
रे कुर्युरित्यादिविशेषवचनं न स्यात् तच्च सपिंडेषु यत्र विशेषवचनं नास्ति। तत्र दशाहवचनं भवति एवं
अवयवे च एकशरीरावयवान्वयेन सापिंड्यं वर्णनीयं। आत्मा हि जज्ञ आत्मनः इत्यादिश्रुतेः। प्रजामनु
प्रजायसे इति च। अथापि स एवायं विरूढः। प्रत्यक्षेणोपलभ्यते॥ इत्यापस्तंबवचनाच्च। तथा गर्भोपनि
षदि। एतत्षाट्कौशिकं शरीरं त्रीणि पितृतस्त्रीणि मातृतः। अस्थिस्नायुमज्जानः पितृतः। त्वग्मांसरु

क्षेत्राणि मातृत इति॥ तत्रावयवान्वयप्रतिपादनात्। निर्वाप्यपिंडान्वयेन तु मातृसंताने भ्रातृपितृव्यादिषु च
सापिंड्यं न स्यात्। समुदायशक्त्यंगीकरणेन रूढिपरिग्रहे चावयवशक्तिस्तत्र तत्रावगम्यमाना परित्यक्ता स्या
त्। परंपरयैकशरीरावयवान्वयेन सापिंड्यं यथा नातिप्रसंगस्तथा वक्ष्यामः। यवीयसीं वयसा प्रमाणत
श्च न्यूनां उद्वहेत। परिणयेत्। स्वगृह्योक्तविधिना विशेषांतरमाह॥ ॥ अरोगिणीं भ्रातृमतीमसमानार्ष
गोत्रजां। अरोगिणीं अचिकित्सनीयव्याध्यनुस्पृष्टां भ्रातृमतीं पुत्रिकाकरणशंकानिरासाय। अनेनापरिभाषि
तापि पुत्रिका न भवतीति गम्यते। असमानार्षगोत्रजां इत्येषु रिदं आर्षं नाम प्रवर इत्यर्थः। गोत्रं वंशपरंपरा प्र
सिद्धं। आर्षं च गोत्रं च आर्षगोत्रे समाने आर्षगोत्रे यस्यासौ समानार्षगोत्रजः। तस्माज्जाता न तस्माज्जाता स
मानगोत्रजा असमानगोत्रजामिति। तथा च असमानप्रवरैर्विवाह इति गौतमः॥ तथा असपिंडा च या मातुर
सगोत्रा च या पितुरिति मनुः। तथा मातृगोत्रामपि असपिंडिनीं यां केचिदिच्छंति। मातुलस्य सुतामूढा मातृगो
त्रां तथैव च। समानप्रवरां चैव गत्वा चांद्रायणं चरेदिति प्रायश्चित्तस्मरणात्। अत्र च असपिंडामित्यनेन पितृ
बंधुमातृबंध्वादिदुहितृनिषेधः। तथा असगोत्रामित्यनेन असपिंडाया अपि भिन्नसंतानजायाः समान
गोत्राया निषेधः। असमानप्रवरामित्यनेनापि असपिंडाया असगोत्राया अपि समानप्रवराया निषेधः। तथा स
पिंडामित्येतत् सार्ववर्णिकं। सर्वत्र सापिंड्यसद्भावात्। असमानगोत्रजामित्येतत् त्रैवर्णिकविषयं। यद्यपि

राजन्यविशां प्रातिस्विकगोत्राभावात् प्रवराभावः। तथापि पुरोहितगोत्रप्रवरौ वेदितव्यौ। तथा च यजमानस्यार्षे
यान् प्रवृणीत इत्युक्त्वा पौरोहित्यान् राजन्यविशां प्रवृणीत इत्याश्वलायनः। सपिंडसमानगोत्रसमानप्रवरा
सु भार्यात्वमेव नोपपद्यते। रोगिण्यादिषु भार्यात्वेऽप्यन्तेपि दृष्टविरोध एव॥ ॥ असपिंडामित्यत्रैकशरीराव
यवान्वयद्वारेण साक्षात्परंपरया वा सापिंड्यमुक्तं तच्च सर्वत्र सर्वस्य यथाकथंचिदनादौ संसारे संभवतीत्यतिप्रसंग इत्यत आ
ह। पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा। मातृतो मातुः संताने पंचमादूर्ध्वं पितृतः पितृसंताने सप्तमादूर्ध्वं सापिंड्यं निवर्तत
इति शेषः। अतश्चायं सपिंडशब्दोऽवयवशक्त्या सर्वत्र वर्तमानोऽपि निर्मंथ्यपंकजादिशब्दवन्नियतविषय एव। तथा च पित्रा
दयः षट् सपिंडाः पुत्रादयश्च षट् आत्मा च सप्तमः। संतानभेदेऽपि यतः संतानभेदः। तमादाय गणयेत्। यावत्सप्तम इ
ति सर्वत्र योजनीयं। तथा च मातरमारभ्य तत्पितृपितामहादिगणनायां पंचमपुरुषसंतानवर्तिनी मातृतः पंचमीत्युपचर्य
ते। एवं पितरमारभ्य तत्पितृपितामहादिगणनायां संतानपुरुषवर्तिनी पितृतः सप्तमीत्युपचर्यते। तथा च जामिन्योर्भगि
नीभ्रात्रोर्भ्रातृपुत्रीपितृव्ययोः। विवाहेप्यादिभूतत्वाच्छाखात्वेनैव गण्यते। यद्यपि वसिष्ठेनोक्तं। पंचमीं सप्तमीं चैव मातृ
तः पितृतस्तथेति। त्रीनतीत्य मातृतः पंचातीत्य पितृतः इति पैठीनसिना तदर्वाग्निषेधार्थं न तु तत्प्राप्त्यर्थमिति सर्व
स्मृतीनामविरोधः। एतच्च समानजातीयेषु द्रष्टव्यं। विजातीयेषु विशेषः। यथाह शंखः। यद्येकजाता बहवः पृथक्क्षेत्राः
पृथग्जनाः। एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्तते त्रिषु। एकस्माद्ब्राह्मणाज्जाताः पृथक्क्षेत्रा भिन्नजातीयासु

स्त्रीषु जाताः पृथक्जनाः । तत्रैकस्यां समानजातीयासु च स्त्रीषु जाताः । असमानजातीयासु च जातास्ते एकपिंडाः सपिंडाः । किं
तु पृथक् शौचमाशौचप्रकरणे वक्ष्यामः । पिंडस्त्वानंतर्येण त्रिपुरुषमेव सापिंड्यमिति ॥ ७ ॥ दशपूरुषविख्याताच्छ्रोत्रि
याणां महाकुलात् पुरुष एव पूरुषः दशभिः पूरुषैः पितृतः मातृतः पंचभिः पंचभिर्विख्यातो यत्कुलं तस्मात् श्रोत्रिया
णां अधीतवेदानां अध्ययनमुपलक्षणं श्रुताध्ययनसंपन्नानां महत्वं तत्कुलं च महाकुलं । पुत्रपौत्रपशुदासीग्रा
मादिग्रामादिसमृद्धं तस्मात्कन्यां आहरेन्नेवेति नियम्यते ॥ ७ ॥ एवं सर्वत्र प्राप्तौ सत्यामपवादमाह ॥ स्फीतादपीन सं
चारिणो रोगदोषसमन्वितान् । संचारिणो रोगाः कुष्ठापस्मारक्षयतयः शुक्रशोणितद्वारेणानुप्रविशंति दोषः पुन
र्हीनक्रियानिःपुरुषादयो मनुनोक्ताः । एतैः समन्वितात् स्फीतादपि धनधान्यादिना महाकुलादपि नोद्वहेत्कन्या ॥ ७ ॥ एवं क
न्याग्रहणे नियममुक्त्वा कन्यादाने वरनियममाह । एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः । यत्नात्परीक्षितः पुंस्त्वे
युवा धीमान् जनप्रियः । एतैरेव पूर्वोक्तैर्गुणैर्युक्तो दोषैश्च वर्जितो वरो योग्यो भवति । तस्यायमपरो विशेषः । सवर्णोऽनुत्कृ
ष्टो वा न हीनवर्णः । स्वयं च श्रुताध्ययनसंपन्नः । यत्नात्प्रयत्नेन पुंस्त्वे परीक्षितः । परीक्षोपायश्च नारदेन दर्शितः ।
यस्याप्सु प्लवते बीजं ह्रादि मूत्रं च फेनिलं । पुमान् स्याल्लक्षणैरेतैर्विपरीतस्तु षंढकः इति । युवा न ह्रस्वः । धीमान् लौकि
कवैदिकव्यवहारे निपुणमतिः । जनप्रियः स्मितपूर्वाभिभाषणादिभिरनुरंजनः ॥ ७ ॥ रतिपुत्रधर्मार्थत्वेन विवा ९
हस्त्रिविधः । तत्र पुत्रार्थो द्विविधो नित्यः काम्यश्च । तत्र नित्ये प्रजार्थे सवर्णः श्रोत्रियो वर इत्यनेन सवर्णा मुख्या दर्शि

ता ॥ ७ ॥ इदानीं काम्ये नित्यसंयोगे वानुकल्पो वक्तव्य इत्याह ॥ यदुच्यते द्विजातीनां शूद्रादारोपसंग्रहः । न तन्मम
मतं यस्मात्तत्रायं जायते स्वयं । यदुच्यते । कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः । इत्युपक्रम्य ब्राह्मणस्य च
तस्रो भार्याः क्षत्रियस्य तिस्रो वैश्यस्य द्वे इति ॥ द्विजातीनां शूद्रो वेदनमिति । नैतद्याज्ञवल्क्यस्य मतं । यस्मादयं
द्विजातिस्तत्र स्वयं जायते । तज्जायाजाया भवति यदस्यां जायते पुनरिति श्रुतेः । अयं च तत्रायं जायते स्वयमि
ना ति । हेतुवदतानेत्यकपुत्रोत्पादनं काम्यपुत्रोत्पादनाय वा शूद्रस्य शूद्रापरिणयनमिषेधं कुर्वता नित्यकपुत्र
त्रोत्पादनानुकल्पे काम्ये च पुत्रोत्पादने ब्राह्मणस्य क्षत्रियावैश्ये क्षत्रियस्य वैश्याभ्यनुज्ञाता भवति ॥ ७ ॥ इदानीं
रतिकामस्योत्पन्नपुत्रस्य वा विनष्टभार्यस्याश्रमांतरेनधिकारिणो गृहस्थाश्रमावस्थामात्राभिकांक्षिणः परि
णयनक्रममाह । तिस्रो वर्णानुपूर्वेण द्वे तथैका यथाक्रमं । ब्राह्मणस्य । क्षत्रियविशां भार्याः स्वाः शूद्रजन्मनः । व
र्णक्रमेण स्युस्तिस्रः क्षत्रियस्य द्वे वैश्यस्य एका शूद्रस्य स्वैव भार्या भवति । सवर्णाः पुनः सर्वेषां मुख्याः स्थितैव ।
पूर्वस्याभावे उत्तरोत्तरा भवति ॥ अयमेव क्रमो नैत्यकानुकल्पे ॥ काम्ये च पुत्रोत्पादनविधौ ॥ अतश्च यच्छूद्रापु
त्रमध्ये परिगणने विनागसंकीर्तनं च तथाविप्रान्मूर्धावसिक्तो हीत्यपूर्वक स्पष्टितास्ते षड्विधिसमेतेति चेतद्र
तकाम्यस्याश्रममात्राभिकांक्षिणो वानांतरीयकतयोत्पन्नस्य ॥ ७ ॥ विवाहानाह ॥ ब्राह्मो विवाह आहूय दी
यते शक्त्यलंकृता । तज्जः पुनात्युभयतः पुरुषानेकविंशतिं । स ब्राह्माभिधानो विवाहः । यस्मिन् कुलक्षण

यवरायाहूय यथाशक्त्यलंकृता कन्या दीयते । उदकपूर्वं तस्यां जातः पुत्रः उभयतः पित्रादींश्च पुत्रादींश्च दश आ-
त्मानं चैकविंशं पुनाति । सहत्विश्चेत् ॥ छ ॥ यज्ञस्थ ऋत्विजे दैव आदायार्षस्तु गोद्वयं ॥ चतुर्दश प्रथमजः पुना-त्यु
त्तरजश्च षट् । स दैवो विवाहः । यज्ञानुष्ठाने वितते ऋत्विजे यथाशक्त्यालंकृता कन्या दीयते । यत्र पुनर्गोमिथुना-
मादाय कन्या प्रदीयते स आर्षः । प्रथमजो दैवविवाहश्च चतुर्दश पुनाति । सप्तावरान् सप्त परान् उत्तरजश्चार्ष-
ना विवाहः षट् पुरो नीतित्रीन् पूर्वांस्त्रीन् परान् ॥ छ ॥ इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने । स कायः पावये-
त्तज्जः षट् षड्वंश्यान् सहात्मना । सह धर्मं चरतामिति परिभाष्य कन्या दीयते । स प्राजापत्यः तज्जः षट् पूर्वान्
षडपरानात्मना सह इत्येवं त्रयोदश पुनाति ॥ छ ॥ आसुरो द्रविणादानात् गांधर्वः समयान्मिथः । राक्षसो युद्ध-
हरणात् पैशाचः कन्यकाछलात् । आसुरः पुनः द्रविणादानात् गांधर्वः स्तु परस्परानुरागेण भवति राक्षसो युद्धेना-
पहरणात् ॥ ६ ॥ सवर्णादिपरिणयने विशेषमाह । पाणिर्ग्राह्यः सवर्णासु गृह्णीयात् क्षत्रिया शरं वैश्या प्रतोदमा-
दद्याद्वेदने त्वग्रजन्मनः । सवर्णासु विवाहे गृह्योक्तविधिना पाणिरेव ग्राह्यः । क्षत्रियस्य कन्या उत्तरां शरं गृह्णीयात्
वैश्या प्रतोदमादद्यात् उत्कृष्टवेदने इति शूद्रा पुनर्वसनस्य दशां यथाह मनुः ॥ वसनस्य दशा ग्राह्या शूद्रयो-
त्कृष्टवेदने इति ॥ छ ॥ दातृक्रममाह । पिता पितामहो भ्राता सकुल्यो जननी तथा । कन्याप्रदः पूर्वनाशे प्रकृति- १०
स्थः परः परः । अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ । गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरं । एतेषां पित्रा-

दीनां पूर्वस्य पूर्वस्याभावे परः परः कन्याप्रदः । प्रकृतिस्थश्चेत् ॥ यदि उन्मादादिदोषवान् भवति । अतो यस्याधिकारः सो-
ऽप्रयच्छन् ऋतौ हत्या भ्रूणहत्यां प्राप्नोति । एतच्चोक्तलक्षणवरसंभवे वेदितव्यं यदा दातृणामभावस्तदा कन्यैव गम्यं गम-
नार्हं उक्तलक्षणं स्वयमेव वरं चरयेत् ॥ छ ॥ सकृत्प्रदीयते कन्या हरंस्तां चोरदंडभाक् ॥ सकृदेव कन्या प्रदीयत इति
शास्त्रनियमः ॥ अतस्तां दत्त्वा अपहरन् कन्यां चोरवद्दंड्यः ॥ छ ॥ एवं सर्वत्र निषेधप्राप्ते अपवादमाह । दत्तामपि हरे-
त्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत् । यदि पूर्वस्मात् वराच्छ्रेयान् विद्याभिजनाद्यतिशययुक्तो वर आगच्छति पूर्वस्य पातकापे-
तोऽदुष्टत्वे वा । तदा दत्तामपि हरेत् । एतच्च सप्तमपादात्प्राक् द्रष्टव्यं ॥ छ ॥ अनाख्याय ददद्दोषं दंड्य उत्तमसाहसं । अ-
दुष्टां च त्यजन् दंड्यो दूषयंस्तु मृषा शतं ॥ यः पुनश्चक्षुर्ग्राह्यं दोषमनाख्याय कन्यां प्रयच्छति । असौ उत्तमसाहसं दंड्यः
उत्तमसाहसं च वक्ष्यति । अदुष्टां च प्रतिगृह्य त्यजन्नुत्तमसाहसं दंड्यः । यः पुनर्विवाहात्प्राक् रागद्वेषादिना सद्भिः कन्या-
दोषैर्दीर्घरोगादिभिर्दूषयति स पणानां वक्ष्यमाणलक्षणानां शतं दंड्यः ॥ छ ॥ अनन्यपूर्विकामित्यत्रानन्यपूर्वा परिणेयो-
क्ता तत्रान्यपूर्वा कीदृशी स्यादि । अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः । स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत् ।
अन्यपूर्वा द्विविधा । पुनर्भूः स्वैरिणी चेति । पुनर्भूरपि द्विधा क्षताक्षता च तत्राक्षता संस्कारात् प्राक् पुरुषसंबंधदूषि-
ता । अक्षता पुनः संस्कारदूषिता । या पुनः कौमारं पतिं त्यक्त्वा कामतः सवर्णमाश्रयति सा स्वैरिणी ॥ छ ॥ एवं सर्वप्रका-
रेणान्यपूर्वापर्युदासे प्राप्ते विशेषमाह । अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया । सपिंडो वा सगोत्रो वा घृताभ्यक्त ऋतावि-
यात् । आगर्भसंभवाद्गच्छेत्पतितस्त्वन्यथा भवेत् । अनेन विधिना जातः क्षेत्रजोऽस्य भवेत्सुतः । दात्तामल[illegible]पुत्रापित्रादिभिः पु
न्य

त्रार्थमनुज्ञातो देवरो भर्तुः कनीयान् भ्राता सपिंडो वा उक्तलक्षणः सगोत्रो वा एतेषां पूर्वस्य पूर्वस्याभावे परः परो घृताभ्यक्त
सर्वांगस्तावेव वक्ष्यमाणलक्षणे ऋतावियात् गच्छेत् । आगर्भोत्पत्तेः । ऊर्ध्वं तु न गच्छेदन्यथान्येन वा प्रकारेण पतितो भवति । अनेन वि
धिनोत्पन्नः पूर्वपरिणेतुः क्षेत्रजः पुत्रो भवेत् । एतच्च वाग्दत्ताविषयमित्याचार्याः । यस्या म्रियेत कन्याया वाचा सत्ये कृते
पतिः । तामनेन विधानेन निजो विंदेत देवर इति मनुस्मरणात् ॥ ब ॥ व्यभिचारिणीमाह ॥ हृताधिकारां मलिनां पिंडमा
त्रोपजीविनीं । परिभूतामधःशय्यां वासयेद्व्यभिचारिणीं ॥ यो व्यभिचरति तां हृताधिकारां भृत्यभरणाद्यधिकाररहि
तां । मलिनामंजनाभ्यंजनशुक्लवस्त्राभरणशून्यां । प्राणयात्रामात्रभोजनां । धिक्कारादिभिः परिभूतां । भूतलशायि
नीं स्ववेश्मन्येव वासयेत् । वैराग्यजननार्थं न शुद्ध्यर्थं । यस्तु सः परदारेषु तच्चैनाचारेषु नमिति । इत्थं के प्रायश्चि
त्तोपदेशात् ॥ बृ ॥ तस्याः प्रायश्चित्तार्थमर्थवादमाह । सोमः शौचं ददौ स्त्रीणां गंधर्वो ललितां गिरं । पावकः स
र्वमेध्यत्वं मेध्या वै योषितो ह्यतः । परिणयनात्पूर्वं सोमगंधर्ववह्नयः स्त्रियो भुक्त्वा यथाक्रमं । तासां शौचं मधुरवच
नं सर्वमेध्यत्वानि दत्तवंतः । तस्मात्स्त्रियः सर्वत्र स्पर्शनालिंगनादिषु मेध्याः शुद्धाः स्मृताः ॥ बृ ॥ न च तस्यास्तर्हि
दोषो नास्तीत्याशंकनीयमित्याह । व्यभिचाराद्दृतौ शुद्धिर्गर्भे त्यागो विधीयते । गर्भभर्तृवधादौ च तथा महति पात
के । अप्रकाशितान्मनोव्यभिचारात्पुरुषांतरसंभोगसंकल्पात् यदुत्पन्नं तस्य ऋतौ रजोदर्शने शुद्धिः ॥ प्रकटे तेन
गर्भे त्याग एव । ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः । अप्रजाता विशुध्यंति प्रायश्चित्तेन नेतराः । इति स्मर ११
णात् । तथा गर्भवधे भर्तृवधे महापातके च ब्रह्महत्यादौ आदिग्रहणात् शिष्यादिगमने त्यागः ॥ चतस्रस्तु परित्याज्याः

शिष्यगा गुरुगा च या ॥ पतिघ्नी च विशेषेण जुंगितोपगता च या । इत्यंगिरसः स्मरणात् । जुंगितः प्रतिलोमजः । त्या
गश्च उपभोगधर्मकार्ययोः न तु तस्याः । निरुध्यादेकवेश्मनीति नियमात् ॥ छ ॥ द्वितीयपरिणयने धनेत्याह । सु
रापी व्याधिता धूर्ता वंध्यार्थघ्न्यप्रियंवदा । स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा । सुरां पिबतीति सुरापी स्त्रीशापि
पतित्यर्धं शरीरस्य यस्य भार्या सुरां पिबेदिति सामान्येन प्रतिषेधात् । व्याधिता दीर्घरोगग्रस्ता ॥ धूर्ता विसंवादि
नी । वंध्या निःफला ॥ अर्थघ्नी अर्थनाशिनी । अप्रियंवदा निष्ठुरभाषिणी । स्त्रीप्रसूः स्त्रीजननी । पुरुषद्वेषिणी स
र्वदाहितकारिणी । अधिवेत्तव्येति प्रत्येकं संबध्यते । अधिवेदनं भार्यांतरपरिग्रहः ॥ छ ॥ किं चाधिविन्नापि ।
भर्तव्या महदेनोऽन्यथा भवेत् । यत्रानुकूल्यं दंपत्योस्त्रिवर्गस्तत्र वर्द्धते । साधिविन्ना पूर्ववद्दानमानसत्कारै
र्भर्तव्या । अन्यथाभरणे महदेनः पापं । वक्ष्यमाणो दंडश्च । न च भरणे सति केवलं पापपरिहारः । यतो यत्र दंपत्यो रानु
कूल्यं चित्तैक्यं धर्मार्थकामानां प्रतिदिनमभिवृद्धिः ॥ छ ॥ स्त्रियं प्रत्याह । मृते जीवति वा पत्यौ या नान्यमुपगच्छति
सेह कीर्तिमवाप्नोति मोदते चोमया सह । मृते जीवति वा भर्तरि या चापल्यादन्यं पुरुषं नैवोपगच्छति । सेह लोके ।
विपुलां कीर्तिमवाप्नोति । उमया सह क्रीडति । पुण्यकृत्वात् ॥ छ ॥ अधिवेदनकारणाभावे अधिवेत्तारं प्रत्याह
आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं । त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः । आदेशसंपादिनी । दक्षा
शीघ्रकारिणी । वीरसूः पुत्रवती । प्रियवादिनी मधुरभाषिणी । यस्त्वेतामधिविंदति । स राज्ञा स्वधनस्य तृतीयमं

शोदाप्यः। निर्धनस्तु भरणं आच्छादनादि दाप्यः ॥ छ ॥ स्त्रीधर्मानाह ॥ स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः
आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः। स्त्रीभिः सदा भर्तृवचनं कार्यं। यस्मादयमेव परमुत्कृष्टो धर्मः स्त्री
णां स्वर्गादिहेतुत्वात्। यदा तु भर्त्ता महापातकादिदूषितस्तदा आशुद्धेः संप्रतीक्ष्यः न त्याज्यस्तत्र। तत्र कालं
तु भर्तृवचनं न त्याज्यं तत्र ॥ छ ॥ स्त्री यदारसंग्रहस्य फलमाह ॥ लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः
यस्मात्तस्मात्स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः। लोके आनन्त्यं वंशस्याविच्छेदो दिवः प्राप्तिः स्वदारसंग्रहस्य प्र
योजनं। कथमित्याह। पुत्रपौत्रप्रपौत्रकैः। लोकानन्त्यं अग्निहोत्रादिभिश्च स्वर्गप्राप्तिरित्यन्वयः। यस्मात्स्त्रीभ्य
एतद्द्वयं भवति। तस्मात्स्त्रियः सेव्याः उपभोग्याः प्रजार्थं रक्षितव्याश्च धर्मार्थे। लयाचायस्तु वेद धर्मप्रजाश्च संप
त्तिः प्रयोजनं दारसंग्रहस्योक्तं। धर्मप्रजासंपन्ने दारे नान्यां कुर्वीतेति वदतां रतिफलं तु लौकिकमेव। पुत्रोत्प
त्त्यर्थं स्त्रियः सेव्या इत्युक्तं तत्र विशेषमाह ॥ षोडशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु संविशेत् ॥ ब्रह्मचर्येव
पर्वाण्याद्याश्चतस्रश्च वर्जयेत्। स्त्रीणां गर्भधारणयोग्यावस्थोपलक्षिताः कालो ऋतुः स च रजोदर्शनदिवसा
दारभ्य षोडशाहोरात्रः। तस्मिन्नृतौ युग्मासु समासु रात्रिषु रात्रिग्रहणात् दिवसनिषेधः। संविशेत् गच्छेत्।
पुत्रार्थी युग्मास्विति बहुवचनं समुच्चयार्थं। अतश्चैकस्मिन्नपि ऋतौ अप्रतिषिद्धासु युग्मासु रात्रिषु गच्छेत्। एवं गच्छ १२
न्ब्रह्मचार्येव भवति। अतो यत्र ब्रह्मचर्यं श्राद्धादिषु चोदितं तत्र गच्छतोपि न ब्रह्मचर्यस्खलनदोषो नास्ति। पर्वाणि

आद्याश्चतस्रश्च वर्जयेत्। पर्वाणीति बहुवचनादाद्यर्थावगमादष्टमीचतुर्दश्योर्ग्रहणं ॥ यथाह मनुः ॥ अमावास्या
मष्टमीं पौर्णमासीं चतुर्दशीं। ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥ अतो अमावास्यादीनि च रजोदर्शनादारभ्य
चतस्रो रात्रीश्च वर्जयेत् ॥ छ ॥ किंच ॥ एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत् ॥ सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत् त्
पुमान्। एवमुक्तेन प्रकारेण स्त्रियं गच्छन् क्षामां न गच्छेत्। क्षामता च तस्मिन्काले रजस्वलात्वेनैव भवति। अथ तेन न
त्र भवति तदा कल्पया क्षामतापुत्रोत्पत्त्यर्थं पथ्याम्लिग्धभोजनात्। पुमान्पुंसोधिके शुक्रे स्त्री भवत्यधिके स्त्रिया इति वचनात्
यदा युग्मायां रात्रौ शोणिताधिक्यं तदा स्त्रैण्यं न भवति। पुरुषाकृतिः। अयुग्मायामपि शुक्राधिक्ये पुमानेव स्त्र्याकृतिः
कालस्य निमित्तत्वात्। शुक्रशोणितयोश्चाधानकारणत्वेन प्राबल्यात्। तस्मात्क्षामता कर्तव्या। मघां च पौष्णं न
क्षत्रे वर्जयेत्। चशब्दादेकादशादिषु न स्नानगतेच कारात्। पुंनक्षत्रेषु च योगलग्नादिसंपन्नौ सकृदेकस्यां रात्रौ न
द्धिस्थिवतितो लक्षणैर्युक्तं पुत्रं जनयति। पुमान् प्रतिहतपुंस्त्वः ॥ छ ॥ एवमृतौ नियममुक्त्वा इदानीमनृतौ नियम
माह ॥ यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्। स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः। भार्याया इच्छानतिक्र
मेण प्रवृत्तिरस्यास्तीति यथाकामी भवेत्। वाशब्दो नियमान्तरपरिग्रहार्थेन पूर्वनियमनिवृत्त्यर्थः। स्त्रीणां वरमिन्द्र
दत्तमनुस्मरन्। यथाताश्चक्रुवन्। वरं वृणामहा ऋत्वियात्प्रजां विन्दामहै काममाविजनितोः संभवामेति ॥ तस्मादृत्वि
याः स्त्रियः प्रजां विन्दन्ति काममाविजनितोः संभवन्ति। वृतं ह्यासामिति ॥ अपि च स्वदारेष्वेव निरतस्तन्मनस्को भवेदित्यनु

बध्यते। अवकारेणर्त्वन्तरगमनं निवर्त्तयति॥ प्रायश्चित्तस्मरणात्। उक्तं यत्रापि दृष्टप्रयोजनमाह। स्त्रियो रक्ष्याय
तः स्मृता इति॥ यस्माच्च स्त्रियो रक्ष्याः स्मृतास्तु ताः। कर्त्तव्याश्च सुरक्षिता इति॥ तच्च सुरक्षणं यथाकामित्वेनर्त्वन्त
रागमनेन च भवतीति॥ अत्राह॥ तस्मिन् युग्मासु संविशेदिति। किमयं विधिर्नियमः परिसंख्या वा। उच्यते। न तावद्वि
धिः प्राप्तार्थत्वात्। नापि परिसंख्या दोषत्रयसमासक्तेः॥ अतो नियमं प्रतिपेदिरे न्यायविदः। कः पुनरेषां भेदः॥
अत्यन्ताप्राप्तप्रापणं विधिः। यथाग्निहोत्रं जुहुयाद् दृष्टका कर्त्तव्या इति। पक्षे प्राप्तस्याप्राप्तपक्षान्तरप्रापणं नियमः
। यथा समे यजेतेति दर्शपूर्णमासाभ्यां यजेतेति यागः कर्त्तव्यतया विहितः। स च देशमन्तरेण कर्त्तुं शक्यते इत्या
र्थिको देशः॥ प्राप्तः स च समो विषमश्चेति द्विविधः॥ यदा यजमानः समे यियक्ष्यते। समे तेति वचनं तदा स्ते। स्वार्थस्य प्र १
सत्वात्॥ यदा तु विषमे देशे यियक्षते॥ तदा समे यजेतेति स्वार्थं विधत्ते॥ स्वार्थस्य तदानीमप्राप्तत्वात्। विषमदेशनि
वृत्तिस्त्वार्थी चोदितदेशेनैव यागनिष्पत्तेश्चोदितदेशोपादानेन। यथाशास्त्रं यागोऽनुष्ठितः स्यादिति। तथा प्राङ्मु
खोऽन्नानि भुञ्जीतेतीदमपि स्मार्त्तमुदाहरणं। पूर्वेण व्याख्यातं। एकस्मिन्नेकत्र प्राप्तस्यान्यतो निवृत्त्यर्थमेकत्र पुनर्वच
नं परिसंख्या॥ तद्यथा। इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र मन्त्रः स्वसामर्थ्यादश्वाभिधान्या गर्द
भाभिधान्याश्च रशनाया ग्रहणे विनियुक्तः। पुनरश्वाभिधानीमादत्त इति वचनेनाश्वाभिधान्यां विनियुज्यमानो ग १२
र्दभाभिधान्या निवर्त्तते। पंच पंचनखा भक्ष्या इति॥ अत्र हि यदृच्छया शशादिषु श्वादिषु भक्षणं प्राप्तं। पुनः शशादि

ष्वश्रूयमाणं श्वादिभ्यो निवर्त्तत इति। किं पुनरत्र युक्तं। परिसंख्येत्याह। तथा हि कृतदारसंग्रहस्य स्वेच्छयैव ऋतौ गमनं प्राप्त
मिति नं विरोधेरयं विषयः। नापि नियमस्य। गृह्यस्मृतिविरोधात्। एवं हि स्मरंति गृह्यकाराः दारसंग्रहानन्तरं त्रिरात्रं द्वा
दशरात्रं संवत्सरं वा ब्रह्मचारी स्यादिति। तत्र द्वादशरात्रात् संवत्सराद्वा पूर्वमेव ऋतुसंभवे॥ ऋतौ गच्छेदेवेति निय
मा ब्रह्मचर्यस्मरणं बाध्यते। अपि च॥ प्राप्तेनार्थवचनं विशेषणपरं युक्तं। प्राप्तं च ऋतौ नार्या गमनमिच्छयैवातो य
दि गच्छेत्तावेवेतिव्यन्निर्युक्ता। किं च नैयमिकपुत्रोत्पत्तिविधेरेव ऋतौ गमनं नित्यप्राप्तमेवेति॥ ऋतौ गच्छेदेवेति निय
मोऽनर्थकः स्यात्। नियमे चादृष्टं कल्पनीयं। ऋतौ गन्तव्यमेवेति नियमे। असन्निहितस्य व्याध्यादिनात्र समर्थस्यापि
दोषश्चाशक्यार्थोपदिष्टः स्यात्॥ विध्यनुवादविरोधश्च नियमे॥ तथा ह्येकवाक्यः सन् ऋतुचरितस्तमेवार्थं पक्षे तु वद
ति। पक्षे विधत्ते चेति। तस्मादृतावेव गच्छेन्नान्यत्रेति परिसंख्यैव युक्ता तदिदं नारुचिविश्वरूपादयो नानुमन्यन्ते य
तो नियम एव युक्तः। पक्षे स्वार्थविधिसंभवात्। अगमने दोषश्रवणाच्च। ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति
घोरायां भ्रूणहत्यायां युज्यते नात्र संशय इति। न च विध्यनुवादविरोधः। अनुवादाभावात्। विध्यर्थत्वाद्वचनस्य
। तत्र हि विध्यनुवादविरोधो यत्र हि विधेयावधितया तदेवानुवेदितव्यं। अप्राप्ततयान्योद्देशेन विधानं च। यथा
वाजपेयाधिकरणपूर्वपक्षे। वाजपेयेन स्वाराज्यकामो यजेतेति वाजपेय उद्देशेन गुणविधानावधित्वेन यागोऽनुवेदि
तव्यः। स एव स्वाराज्यलक्षणफलोद्देशेन विधातव्यश्चेति। न चात्रानुवादेनेह रूपमस्ति। यत्तु नियमेऽदृष्टं कल्प्यमिति

क्तं। तत्परिसंख्यायामपि समानं अन्यत्र गच्छतो दोषकल्पनात्॥ यत्तु नैयमिकपुत्रोत्पादनविध्याक्षेपेणैवर्त्तौ गम
नप्राप्तेर्न नियम इति। स एवायं नैयकपुत्रोत्पादनविधिः स्यान्मतं॥ एवं गच्छन् स्त्रियं क्षामां लक्षण्यं पुत्रं जनयेदिति।
अभिगमनानिरिक्तः पुत्रोत्पादनविधिः। तच्च न। गमनकरणिकायाभावनाया एव पुत्रोत्पत्तिकर्मतापदर्शयते। ए
वं गच्छन् लक्षण्यं पुत्रं जनयेदित्यनेन यथा अग्निहोत्रं जुहुयात् स्वर्गं भावयेदिति। न च सन्निहितादेरशक्यार्थवि
धित्वप्रसंगः। सन्निहितशक्तयोरेवोपदेशात्॥ इतरस्मात्तु योनार्यासन्निधौ नोपगच्छतीति यः स्वदारान्तस्त्वतस्मात् २
न्स्वस्थः सन्नोपगच्छतीति च विशेषोपादानात्। अनिच्छानिवृत्तिस्तु नियमविधानादेव॥ न च विशेषणपरता। पक्षे
नावार्थविधिसंभवात्। नापि गृह्यस्मृतिविरोधः। संवत्सरान्सर्वमेवर्त्तुदर्शने संविशतो नब्रह्मचर्यस्खलनदोषः
यथाश्राद्धादिषु तस्मात् स्वार्थहानिपरार्थकल्पनाप्राप्तबाधलक्षणदोषत्रयवती परिसंख्या न युक्ता। पंच पंचन
खाभक्ष्या इत्यत्र यद्यपि शशादिषु भक्षणस्य पक्षे प्राप्तेर्नियमः। शशादिषु यादिषु च प्राप्ते परिसंख्येत्युभयसंभ
वः। तथापि नियमपक्षे शशाद्यभक्षणे दोषप्रसंगं न चान्यादिभक्षणे अदोषप्रसंगे न च प्रायश्चित्तस्मृतिविरोध इ
ति परिसंख्यैवाश्रिता। एतेन सायंप्रातर्द्विजातीनामशनं श्रुतिनोदितं इत्यत्रापि नियमो व्याख्यातः। नान्तरा भोजनं
कुर्यादिति च वचनं तु न रुक्तं स्यात्परिसंख्यायामेवं च नियमेऽसत्यनाहूता वितिवीक्षालप्स्यते। निमित्तादृतौ नैमित्तिक १४
मप्यावर्त्तत इति न्यायात्॥ याथाकामी भवेद्वित्ययमपि नियम एव अन्यतो। वपिस्त्रीकामनायां सत्यां। स्त्रियमभिरमये

देवेति। तां तामुपेयात् सर्वत्र वा प्रतिषिद्धवर्जं इत्येतदपि गौतमीयं सूत्रद्वयं वैनियमपरमेवाऽसतामुपयादेवान्तर २
वपि स्त्रीकामनायां प्रतिषिद्धवर्जमुपेयादेवेत्यलमतिप्रसंगेन॥ छ॥ किंच। नष्टे भ्रातृपितृज्ञातिश्वश्रूश्वशुरदे
वरैः॥ बंधुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः। नष्टे प्रवृत्तिभिः पूर्वोक्ताः साध्व्यः॥ स्त्रियो यथा शान्त्यजे कारवस
नभोजनभूषादिभिः संमाननीयाः यस्मात्ताः पूजिताः धर्मार्थकामान्वर्द्धयंति। पुनः समर्पितगृहव्यापारया किंनु
तयानुवर्तितव्यमित्याह॥ छ॥ सयतोपस्कराद्क्षा हृष्टा व्ययपराङ्मुखी कुर्यात् श्वशुरयोः पादवंदनं भर्तृतत्परा स
यतः स्वस्थाने निवेशितउपस्करो गृहोपकरणवर्गो यया सा तथोक्ता॥ यथोलूखलमुशलशूर्पादेः कंडनस्थाने दृष
दुपलयोर्गेनयेषणस्थाने इत्यादि। दक्षा गृहव्यापारकुशला॥ हृष्टा सदैव प्रहसिता। व्ययपराङ्मुखी। न व्ययशीला
स्वादिति सर्वत्र शेषः। किंच॥ श्वशुरश्च श्वश्रूश्च श्वशुरौ श्वशुरः श्वश्र्वा इत्येकशेषः॥ तयोः पादवंदनं नित्यं कुर्या
त्॥ श्वसुरग्रहणं मान्यान्तरोपलक्षणार्थं भर्तृतत्परा भर्तृवशवर्तिनी। सतीत्युपर्वोक्तं कुर्यात्॥ भर्तृसन्निधानमुक्त्वे
प्रोषितभर्तृशितया किं कर्तव्यमित्याह॥ छ॥ क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनं। हास्यं परगृहे यानं त्यजेत्प्रोषि
तभर्तृका। देशान्तरगतभर्तृका क्रीडां कं। कादिभिः शरीरसंस्कारं उद्वर्तनादिभिः समाजो जनसमूहः। उत्सवो विवा
हादिस्तयोर्द्दर्शनं। हास्यं विश्रंभेण परगृहगमनं त्यजेदिति प्रत्येकं संबध्यते॥ छ॥ किंच। रक्षेत्कन्यां पिता विन्नां पतिः
पुत्रास्तु वार्द्धके। अभावे ज्ञातयस्तेषां स्वातंत्र्यं न क्वचित्स्त्रियाः॥ पाणिग्रहात्प्राक्पिता कन्यामकार्यकरणाद्रक्षे।

मृतऊर्द्धं भर्त्तृतदभावे पुत्राः। तदभावे च तेषां उक्तानां अभावे ज्ञातयो ज्ञाती। नामभावे राजा। पक्षद्वयावसाने तु रा-
जा भर्त्ता प्रभुः स्त्रिया इति वचनात् अतः क्वचिदपि स्त्रीणां नैव स्वातंत्र्यं॥ छ॥ किंच॥ पितृमातृसुतभ्रातृश्वश्रूश्वशुरम- २
तुलैः। हीना न स्याद्विना भर्त्ता गर्हयान्यथा भवेत्। भर्त्रा विना भर्तृरहिता। पित्रादिरहिता न स्यात्। यस्मात्तद्रहिता
गर्हणीया निंद्यान्यथा भवेत्। एतच्च ब्रह्मचर्यपक्षे भर्त्तुरिष्टे ब्रह्मचर्यं तदन्वारोहणं वेति विष्णुस्मरणात्। अन्वा- २
रोहणे महानभ्युदयः। तथाच व्यासः। कपोतिश्यानव्याजेन दृष्टिवान्। पतिव्रता संप्रदीप्तं प्रविवेश हुताशनं॥
तत्र चित्रांगदधरं भर्त्तारं सान्वपद्यत। ततः स्वर्गगतः पक्षी भार्यया सह संगतः। कर्मणा पूजितस्तत्र रेसे च सह भार्यये मे
ति। तथाच शंखांगिरसौ। तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानुषे। तावत्कालं वसेत्स्वर्गे भर्त्तारं यानुगच्छति। इ-
ति प्रतिपाद्य तयोरवियोगं दर्शयति। व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्। तद्वदुद्धृत्य सा नारी सह तेनैव मो-
दते। तत्र सा भर्तृपरमा स्तूयमानाप्सरोगणैः। क्रीडते पतिना सार्द्धं यावदिंद्राश्चतुर्दशेति॥ तथा ब्रह्मघ्नो वा कृतघ्नो
वा मित्रघ्नो वा भवेत्पतिः। पुनात्यविधवा नारी तमादाय मृता तु या। मृते भर्तरि या नारी समारोहेद्धुताशनं। सारुंधती
समाचारा स्वर्गलोके महीयते। यावच्चाग्नौ मृते पत्यौ स्त्री नात्मानं प्रदाहयेत्। तावन्न मुच्यते सा हि स्त्रीशरीरात्कथं-
चनेति। हारीतोपि। मातृकं पैतृकं चापि यत्र चैव प्रदीयते। कुलत्रयं पुनात्येषा भर्त्तारं यानुगच्छतीति। आर्त्तार्त्ते मु- १५
दिते हृष्टा प्रोषिते मलिना कृशा। मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रतेति। अयं च सर्वासां स्त्रीणामगर्भिणीनां २

मबालापत्यानामाचंडालं साधारणो धर्मः। भर्त्तारं यानुगच्छतीत्यविशेषोपादानात्। यानि च ब्राह्मण्या अनुगमननिषेध-
पराणि वाक्यानि मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात्। जीवंती तद्धितं कुर्यान्मरणादात्मघातिनी। या स्त्री
ब्राह्मणजातीया मृतं पतिमनुव्रजेत्। सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत्॥ इत्येवमादीनि तानि पृथक्चित्या-
धिरोहणविषयाणि पृथक्चितिं समारुह्य न विप्रा गंतुमर्हतीति विशेषस्मरणात्॥ अनेनैव क्षत्रियादिस्त्रीणां पृ-
थक्चित्यनुज्ञा गम्यते। यत्तु केश्चिदुच्यते पुरुषाणामिव स्त्रीणामप्यात्महननस्य प्रतिषिद्धत्वादितिप्रहृद्ध स्वर्गा-
भिलाषकायाः प्रतिषेधशास्त्रमतिक्रमंत्या अनुगमनोपदेशः श्येनवत्॥ यथा तीव्रक्रोधाक्रांतस्यातस्य प्रतिषेध-
शास्त्रमतिक्रांतः श्येनोपदेश इति येनापि न करणिकायाः भावनायाः भाव्यं तद्धिंसायां विधिसंस्पर्शाभावेन प्रति-
षेधसंस्पर्शे तत्र हिंसा स्वयं हिंसासाधनं द्रव्यखड्गादीनां विनापि कर्मजत्वेन फलद्वारेण श्येनस्यानर्थत्वं वर्णयंति तेषां
मते हिंसा एव स्वर्गार्थतया अनुगमनशास्त्रेण विधीयत्वात् प्रतिषेधसंस्पर्शाभावात् अग्नीषोमीयवत्स्पष्टमेवानुगम-
नस्य श्येनवैषम्यं यत्तु मतं हिंसा नाम मरणानुकूलो व्यापारः। श्येनश्च परमरणानुकूलव्यापाररूपत्वात्सैव।
कामाधिकारे च करणांशे रागतः प्रवृत्तिसंभवेन विधेरप्रवर्त्तकत्वात्। रागप्रयुक्तहिंसारूपत्वात् श्येनः प्रतिषिद्ध-
स्वरूपेणैवानर्थक इति। अत्राप्यनुगमनशास्त्रेण मरणस्यैव स्वर्गसाधनतया विधानात्। आत्ममरणे यद्यपि रागतः
प्रवृत्तिस्तथापि मरणानुकूले व्यापारे अग्निप्रवेशादिविति कर्त्तव्यतारूपे विधित एव प्रवृत्तिरिति निषेधस्यावकाशः
वायव्यं श्वेतमालभेत भूतिकाम इतिवत्तस्मात्स्पष्टमेवानुगमनस्य श्येनवैषम्यं। यत्तु तस्मादु ह न पुरायुषः स्वःकामी

श्रेयादिति श्रुतिविरोधादनुगमनमयुक्तमिति तन्न वक्तव्यः कामपायुषः प्राग्न प्रेयादिति स्वर्गलोकोद्देशेनायुषः प्राग
युर्न कर्तव्यो मोक्षार्थिना। यस्मादायुषः शेषे सति नित्यनैमित्तिककर्मानुष्ठानद्वारेण क्षपितकलंकस्य श्रवणम
नननिदिध्यासनसंपत्तौ सत्यामात्मज्ञानेन नित्यनिरतिशयानंदब्रह्मप्राप्तिलक्षणमोक्षसंभवः। तस्मादनित्य
ल्पसुखस्वर्गार्थमायुर्व्ययो न कर्तव्य इत्यर्थः। अतश्च मोक्षमनिच्छन्त्याल्पसुखरूपस्वर्गार्थिन्या अनुगमनं युक्त
मितरकाम्यानुष्ठानवदिति सर्वमनवद्यं॥ छ॥ किंच॥ पतिप्रियहिते युक्ता स्वाचारा विजितेंद्रिया। सेह कीर्तिमवा
प्नोति प्रेत्य चानुत्तमां गतिं। प्रियमनवद्यत्वेन मनोनुकूलं आयत्यां यदुपस्कारं तद्धितं। प्रियं च हितं च प्रियहिते तत्प
तुः प्रियहिते तस्मिन्युक्ता निरता। स्वाचारा शोभन आचारो यस्याः सा तथोक्ता। शोभनश्चाचारो दर्शितः शंखे
न। नानुक्ता गृहान्निर्गच्छेन्नानुत्तरीया न त्वरितं व्रजेन्न परपुरुषं भाषेत। अन्यत्र वणिक्प्रव्रजितवृद्धवैद्ये
भ्यो न नाभिं दर्शयेदा गुल्फाद्वासः परिदध्यान्न स्तनौ विवृतौ कुर्यात्। न हसेदपावृतं। न भर्तारं तद्बन्धून्वा द्विष्या
त्। न गणिकाधूर्ताभिसारिणीप्रव्रजिताप्रेक्षणिकामायामूलकुहककारिकादुःशीलादिभिः सहैकत्र तिष्ठे
त्। संसर्गेण हि चारित्रं दुष्यतीति। विजितेंद्रिया। विजितानि संयमितानींद्रियाणि श्रोत्रादीनि वागादीनि मनः सहि
तानि यया। सेह लोके। कीर्तिं ख्यातिं परलोके चोत्तमां गतिं प्राप्नोति अयं च सकल एव स्त्रीधर्मो विवाहादू
र्ध्वं वेदितव्यः प्रागुपनयनात्कामचारवादभक्षा इति स्मरणात्। वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः इ १९
ति च अनेकभार्यत्वे त्वाह॥ छ॥ सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत्। सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेत

रा॥ सवर्णायां सत्यामन्यामसवर्णा नैव धर्मकार्यं कारयेत्। स्वपि बह्वीषु धर्म्ये विधौ धर्मानुष्ठाने ज्येष्ठया विना ज्येष्ठां
मुत्क्रम्य इतरा मध्यमा वा कनिष्ठा वा नानियोक्तव्या। प्रमीतपतिका या विधिमुक्ता इदानीं प्रमीतभार्यस्याह। छ
दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः। आहरेद्विधिवद्दारानग्नींश्चैवाविलंबयन्। एवंविधां वृत्तवतीमाचारव
तीं विपन्नां स्त्रियमग्निहोत्रेण श्रौतेन तदभावे स्मार्तेनाग्निना दाहयित्वा पतिर्भर्ता अनुत्पादितपुत्रो निष्पुत्रो
वा आश्रमांतरस्थानधिकृतो वा अनंतरमेव पुनर्दारानग्नींश्च विधिवदाहरेदविलंबयन् शीघ्रमेव। अनाश्रमी न
तिष्ठेत्तु दिनमेकमपि द्विजः। इति दक्षस्मरणात्। एतच्चाधाने सहाधिकृताया एव नान्यस्याः। न च पुनर्द्वितीयां चेद्वयो
भार्यां दहेद्वैतानिकाग्निभिः। जीवंत्यां प्रथमायां हि सुरापानसमं हि तदिति। तथा। मृतायां तु द्वितीयायां योऽग्नि
होत्रं समुत्सृजेत्। ब्रह्मघ्नं तं विजानीयाद्यश्च कामात्समुत्सृजेत्। इति एवमादि तदाधाने सहाधिकृताया
अग्निदाने वेदितव्यं॥ छ॥ ॥इति विवाहप्रकरणं॥ ॥ब्राह्मणस्य च तस्रो भार्याः क्षत्रियस्य तिस्रो वै
श्यस्य द्वे शूद्रस्यैकेत्युक्तं तासु च पुत्रोत्पादयितव्या इत्युक्तं॥ इदानीं कस्यां कस्मात्कः पुत्रो भवतीति विवेक्तु
माह॥ छ॥ सवर्णेभ्यः सवर्णासु जायंते हि सजातयः। अनिंद्येषु विवाहेषु पुत्राः संतानवर्धनाः। सवर्णेभ्यो ब्रा
ह्मणादिभ्यः सवर्णासु ब्राह्मण्यादिषु सजातयो मातापित्रोः समानजातीयाः पुत्रा भवंति। विन्नास्वेष विधिः स्म
तः इति। सर्वशेषत्वेनोपसंहारः छिन्नासु सवर्णास्विति संबध्यते। विन्नाशब्दस्य संबंधिशब्दत्वाद्वेत्तृ
भ्यः सवर्णेभ्य इति लभ्यते एकः सवर्णस्य शब्दस्य स्पष्टार्थः। अतश्चायमर्थः संक्षेपः उक्तेन विधिना ऊढायां सव

र्ण्यां वोढुः सवर्णादुत्पन्नास्तु समानजातीया भवंति। अतश्च कुंडगोलककानीनसहोढादीनां सावर्ण्यमुक्तं भ
वति। ते च सवर्णेभ्योऽनुलोमप्रतिलोमेभ्यश्च भिद्यमाना साधारणधर्मैरहिंसादिभिरधिक्रियंते। शूद्रास्तु सधर्मा
णः सर्वे प्रध्वंसजास्स्मृताः इति स्मरणात्। अपध्वंसजाः व्यभिचारजाताः शूद्रधर्मैरपि द्विजशुश्रूषादिभिरधिक्रियं
ते न तु कुंडगोलकयोर्ब्राह्मण्यं। तेषां श्राद्धे प्रतिषेधोपपत्तेः। न्यायविरोधश्च। यो यज्जातीयाद्यज्जातीयायामुत्पन्नः
स तज्जातीय एव यथा गोः गवि गौः। अश्वाद्वडवायामश्वः। तस्माद्ब्राह्मणाद्ब्राह्मण्यामुत्पन्नो न ब्राह्मण इति विरुद्धं॥
यथा कानीनगूढजादीनुपक्रम्य सजातीयेष्वयं प्रोक्तः स्तनयेषु मया विधिरिति वचनविरोधश्च। नैतत्सारं। ब्राह्मणे
न ब्राह्मण्यामुत्पन्नो ब्राह्मण इति न नियम इत्यर्थः। श्राद्धे प्रतिषेधः। यथात्यंतमधमस्य पतितस्य श्राद्धे प्रतिषेधः
। न च न्यायविरोधः। यत्र यत्संगम्या जातिर्भवति तत्र तथा ब्राह्मण्यादि जातिस्फुरतिलक्षणा। यथा स्मरणं भव
ति। यथा समानेपि ब्राह्मण्ये कौंडिन्यो वसिष्ठो त्रिगोत्रेण इति स्मरणलक्षणं गोत्रं। तथा मद्यपत्वे समानेपि ब्राह्मणा
द्विजातिः स्मरणलक्षणा। मातापित्रोश्चैतदेव जातिलक्षणं। न चानवस्था। अनादित्वात्संसारस्य। शास्त्रार्थव्य
वहारवत्। सजातीयेष्वयं प्रोक्त इति वचनं कानुवादत्वात्। यथा संतत्वं व्याख्यास्यते। क्षेत्रजस्तु मातृसमानजा
तीयो नियोगस्मरणात् विशिष्टसमाचाराच्च। तथा च धृतराष्ट्रपांडुविदुराः क्षेत्रजाः संतो मातृसमानजातीयाः इ
त्यलमतिप्रसंगेनाकिंचित्करेषु ब्राह्मणादिषु विवाहेषु पुत्राः संतानवर्धनाः। अरोगिणो दीर्घायुषो धर्मप्रजाः सं १७
भवंति वर्णत्रये इदानीमनुलोमानाह॥ छ॥ विप्रान्मूर्धावसिक्तो हि क्षत्रियायां विशः स्त्रियां। अंबष्ठः शूद्र्यां निषादो

जातः पारशवोपि वा। ब्राह्मणात्क्षत्रियायां विन्नायामुत्पन्नो मूर्धावसिक्तो नाम पुत्रो भवति। वैश्यकन्यायां विन्नायामंब
ष्ठो नाम पुत्रो भवति। शूद्रायां विन्नायां निषादो नाम पुत्रो भवति। निषादो नाम कश्चिन्मत्स्यघातजीवी प्रतिलोमजः समा
नोदिति पारशवोऽयं निषाद इति संज्ञाविकल्पः। विप्रादिति सर्वत्रानुवर्तते। यत्तु ब्राह्मणेन क्षत्रियायामुत्पादितः क्ष
त्रिय एव भवति। क्षत्रियेण वैश्यायां वैश्य एव भवति। वैश्येन शूद्रायां शूद्र इति शंखस्मरणं। तत्क्षत्रियादिधर्मप्राप्त्य
र्थं न पुनर्मूर्धावसिक्तादिजातिनिराकरणार्थं क्षत्रियादिजातिप्राप्त्यर्थं वा। अतश्च मूर्धावसिक्तादीनां क्षत्रियादेरुक्तै
रेव दंडाजिनोपवीतादिभिरुपनयनादिकं कार्यं। प्रागुपनयनात्कामचारादि शूद्रवदेव वेदितव्यं॥ छ॥ वैश्याशूद्र्यो
स्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ। वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः। वैश्यायां शूद्रायां च विन्नायां रा
जन्यान्माहिष्योग्रौ पुत्रौ यथाक्रमं भवतः। वैश्येन शूद्रायां विन्नायां करणो नाम पुत्रो भवति। एष सवर्णमूर्धावि
सिक्तादिसंज्ञाविधिः विन्नासु ऊढासु स्मृतत्वक्तो वेदितव्यः। एते च मूर्धावसिक्तांबष्ठनिषादमाहिष्योग्रकरणाः ष
डनुलोमजाः पुत्रा वेदितव्याः॥ प्रतिलोमानाह॥ छ॥ ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा। शूद्राज्जातस्तु
चांडालः सर्वधर्मबहिष्कृतः॥ ब्राह्मण्यां क्षत्रियवैश्यशूद्रैरुत्पादिता यथाक्रमं सूतवैदेहिकचांडालाख्याः पुत्रा भवं
ति। तत्र चांडालः सर्वधर्मबहिष्कृतः॥ छ॥ माहिष्येण करण्यां तु रथकारः प्रजायते। असत्संतस्तु विज्ञेयाः प्रतिलो
मानुलोमजाः। क्षत्रियेण वैश्यायामुत्पादितो माहिष्यो वैश्येन शूद्रायामुत्पादिता करणी। तस्यां माहिष्येणोत्पादितो र
थकारो नाम जात्या भवति। तस्य चोपनयनादिकार्यं वचनाद्यथा। शंखः क्षत्रियवैश्यानुलोमजोत्पन्नो रथकार

स्तस्येज्यादानोपनयनसंस्कारक्रियाश्चाप्रतिष्ठा रथसूत्रवास्तुविद्याध्ययनवृत्तिता चेत्येवं ब्राह्मणक्षत्रियोत्पन्नमूर्धाव
सिक्तमाहिष्याद्यनुलोमसंकरजात्यंतरजात उपनयनादिप्राप्तिश्चावेदितव्या। तयोर्द्विजत्वात्। संज्ञास्तु स्मृत्यंतरोक्ता र
द्रष्टव्याः। एतच्च प्रदर्शनमात्रमुक्तं। संकीर्णसंकरजातानामानंत्यात् वक्तुमशक्यत्वात्। तत एतावदत्र विवक्षितमसंतः
प्रतिलोमजाः। संतश्चानुलोमजा ज्ञातव्या इति। सवर्णेभ्यः सवर्णासु जायंत इत्यादिना वर्णप्राप्तौ कारणमुक्तं लक्षणमि
दानीं कारणांतरमाह। छ। जात्युत्कर्षो युगे ज्ञेयः सप्तमे पंचमेऽपि वा। व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरं। जातयो॥
मूर्धावसिक्ताद्यास्तासामुत्कर्षो ब्राह्मणत्वादिप्राप्तिर्जात्युत्कर्षो युगे जन्मनि सप्तमे पंचमे पि वा षष्ठे वा बोद्धव्यो
व्यवस्थितश्चायं विकल्पः। व्यवस्था च। ब्राह्मणेन शूद्रायामुत्पादिता निषादी सा ब्राह्मणेनोढा दुहितरं काचिज्जन
यति। सापि ब्राह्मणेनान्यामित्यनेन प्रकारेण षष्ठी सप्तमं ब्राह्मणेन वैश्यायामुत्पादिता अंबष्ठा। साप्यनेन प्रकारे
ण पंचमी षष्ठं ब्राह्मणं जनयति। मूर्धावसिक्ताप्यनेन प्रकारेण चतुर्थी पंचमं ब्राह्मणमेवमुग्रा क्षत्रियोढा माहिष्या
च यथाक्रमं षष्ठं पंचमं क्षत्रियं जनयति। तथा करणी वैश्याद्वा पंचमं वैश्यमेवमन्यत्राप्यूहनीयं। किंच कर्मणां व्य
त्यये विपर्यासे यथा ब्राह्मणो मुख्यया वृत्त्या अजीवन् क्षात्रेण कर्मणा जीवेदित्युक्तस्तेनाप्यजीवन् वैश्यवृत्त्या तया
प्यजीवन् शूद्रवृत्त्या। क्षत्रियोपि स्वकर्मणाजीवनार्थेनाजीवन् वैश्यवृत्त्या शूद्रवृत्त्या वा। वैश्योपि स्ववृत्त्याजीवन् शू
द्रवृत्त्येति तदा सप्तमे षष्ठे पंचमे वा जन्मनि साम्यं यस्य हीनवर्णस्य कर्मणा जीवति। तस्मात्समानजातित्वं भवति। त १८
द्यथा। ब्राह्मणः शूद्रवृत्त्या जीवन् स्वापत्यं जनयति शूद्रत्वमुत्पादयति। सोपि तयैव वृत्त्या जीवन् पुत्रांतरमित्ये

वं परंपरया सप्तमे जन्मनि शूद्रमेव जनयति। वैश्यवृत्त्या तु जीवन् षष्ठे वैश्यं। क्षत्रवृत्त्याजीवन् पंचमे क्षत्रियं।
क्षत्रियोपि शूद्रवृत्त्याजीवन् षष्ठे शूद्रं वैश्यवृत्त्याजीवन् पंचमे वैश्यं। वैश्योपि शूद्रवृत्त्याजीवन् तामपरित्यजन् पु
त्रपरंपरया पंचमे जन्मनि शूद्रं जनयतीति। पूर्ववच्चाधरोत्तरं। अस्यार्थः। वर्णसंकरे अनुलोमजाः प्रतिलोमजाश्च
दर्शिताः। संकीर्णसंकरजाताश्च रथकारनिदर्शनेन दर्शिताः। इदानीं वर्णसंकरसंजाताः प्रदर्श्यंते। अधरे चोत्तरे
च अधरोत्तरं। यथा मूर्धावसिक्तायां क्षत्रियवैश्यशूद्रैरुत्पादितास्तथा अंबष्ठायां वैश्यशूद्राभ्यां। निषाद्यां शूद्रेणोत्पादि
ता अधराः। प्रतिलोमजास्तथा मूर्धावसिक्तांबष्ठानिषादीषु ब्राह्मणेनोत्पादिताः। माहिष्योग्रयोर्ब्राह्मणेन क्षत्रियेण
चोत्पादिताः करिण्यां ब्राह्मणेन क्षत्रियेण वैश्येन चोत्पादिताः। उत्तरे अनुलोमजाः। एवमन्यत्राप्यूहनीयं। एवमध
रोत्तरं पूर्ववदसत्सदिति बोध्यं॥ ॥इति वर्णजातिविवेकप्रकरणं॥ ४ ॥श्रौतस्मार्तानि कर्माणि ऽ
ग्निसाध्यानि दर्शयिष्यन् कस्मिन्नग्नौ किं कर्तव्यमित्याह॥ छ॥ कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दाय
कालाहृते वापि श्रौतं वैतानिकाग्निषु॥ स्मृत्युक्तं वैश्वदेवादिकं कर्म लौकिकं यत्प्रतिदिनं पाकरूपं तदपि गृ
हस्थो विवाहाग्नौ आवसथ्याग्नौ विवाहसंस्कृते कुर्वीत। विभागकालाहृते वा वैश्यकुलादग्निमानीयेत्यादिनोक्त
संस्कारसंस्कृते अपि शालाग्नौ वा गृहपतावाहृते संस्कृत एव। ततश्च कर्म तत्र यातिक्रमे प्रायश्चित्तीयते। श्रौ
तमुक्तमग्निहोत्रादिकं कर्म वैतानिकाग्निषु आहवनीयादिषु कुर्वीत। गृहस्थधर्मानाह॥ छ॥ शरीरचिंतां निर्वर्त्य

कृतशौचविधिर्द्विजः। प्रातः संध्यामुपासीत दंतधावनपूर्वकं। शरीरचिंतामावश्यकादिकां दिवासंध्यासु कर्णस्थब्रह्मसू
त्र इत्यादिकं कविधिना निर्वर्त्य गंधलेपक्षयकरमित्यादिनोक्तेन विधिना कृतशौचविधिर्द्विजः दंतधावनपूर्वकं प्रातः
संध्यामुपासीत दंतधावनविधिश्च। कंटकीक्षीरवृक्षोत्थं द्वादशांगुलसंमितं कनिष्ठिकाग्रवत्स्थूलं पर्वार्द्धकृतकूर्चकं
।दंतधावनमुद्दिष्टं जिह्वोल्लेखनिका तथेति। अथ दंतधावनमित्यनेन तृणलोष्टांगुल्यादिनिषेधः। पलाशाम्रादिनिषेध
श्च स्मर्तव्यः रोकोह दन्तधावनमंत्रश्च। आयुर्बलं यशो वर्चः प्रजा पशुवसूनि च। ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वन
स्पते इति॥ ब्रह्मचारिप्रकरणोक्तस्यापि संध्यावंदनस्य पुनर्वचनं दंतधावनपूर्वकत्वप्रतिपादनार्थं दंतधावनं त्वत्य
गीतदि ब्रह्मचारी वर्जयेदिति तन्निषेधात्॥ छ॥ कृत्वाग्नीन् सूर्यदैवत्यान् जपेन्मंत्रान् समाहितः। वेदार्थानधिगच्छेच्च
शास्त्राणि विविधानि च। ततः संध्यावंदनानंतरमग्नीनाहवनीयादीन् यथोक्तेन विधिना हुत्वा उपासनाग्निं वा तदनंत
रं सूर्यदैवत्यान् उदुत्यं जातवेदसमित्यादीन् मंत्रान् जपेत् समाहितो विक्षिप्तचित्तः। तदनंतरं वेदार्थान् निरुक्तव्याकर
णादिश्रवणेनाधिगच्छेज्जानीयात्। चकारादधीतं चान्यस्येद्वि विधानि शास्त्राणि मीमांसा धर्मशास्त्रादीनि धर्मार्थारोग्यप्रति
पादकानि अधिगच्छेत्॥ छ॥ उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये। स्नात्वा देवान् पितृंश्चैव तर्पयेदर्चयेत्तथा। तद
नंतरमीश्वरमभिषेकादिगुणयुक्तमन्यं वा श्रीमंतमकुत्सितयोगक्षेमार्थं अलब्धलाभो योगः। लब्धपरिपालनं क्षेम १९
स्तदर्थमुपेयात् उपासीत। उपेयादित्यनेन सेवां प्रतिषेधति। चेतनग्रहणे नाज्ञाकरणं सेवा। तस्याः स्ववृत्तित्वेन प्रति।

षेधात्। ततो मध्याह्ने शास्त्रोक्तेन विधिना नद्यादिषु स्नात्वा देवान् स्वगृह्योक्तान् पितृंश्च चकारात् ऋषींश्च देवादितीर्थेन
तर्पयेत्। तदनंतरं गंधकुसुमाक्षतैर्हरिहरहिरण्यगर्भप्रभृतीनामन्यतमं यथाशासनमृग्यजुःसाममंत्रैस्तत्प्रकाशनै
स्तन्नामभिर्वा चतुर्थ्यंतैर्नमस्कारयुक्तैराराधयेद्यथोक्तेन विधिना॥ छ॥ वेदाथर्वपुराणानि सेतिहासानि शक्तितः। जप
यज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत्। तदनंतरं वेदाथर्वपुराणेतिहासादीनि स्वस्तानि वा आध्यात्मिकीं च जपयज्ञ
सिद्ध्यर्थं यथोक्तेन विधिना यथाशक्ति जपेत्॥ छ॥ बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः। भूतपितृमरब्रह्म
मनुष्याणां महामखाः। बलिकर्म भूतयज्ञः स्वधा पितृयज्ञः होमो देवयज्ञः स्वाध्यायो ब्रह्मयज्ञः अतिथिसत्क्रिया म
त्वा नुष्ययज्ञः एते पंचमहायज्ञाः अहरहः कर्तव्याः नित्यत्वात्। यत्तु नरेषां फलश्रवणं तदेषां पावनत्वख्यापनार्थं न काम्य
त्वप्रतिपादनाय॥ छ॥ देवेभ्यस्तु हुतादन्नाच्छेषाद्भूतबलिं हरेत्। अन्नं भूमौ श्वचांडालवायसेभ्यश्च निक्षिपेत्। स्व
गृह्योक्तेन विधिना देवेभ्यो होमं कृत्वा तदवशिष्टेनान्नेन भूतेभ्यो बलिं हरेत्। अन्नग्रहणमपक्वमुद्रासार्थं। तदनंत
रं यथाशक्ति अन्नमावन्नं श्वचंडालवायसेभ्यो निक्षिपेत्। चशब्दात्कृमिपापरोगिपतितेभ्यः। यथाह मनुः। शुनां च पति
तानां च श्वपचां पापरोगिणां। वायसानां कृमीणां च शनकैर्निक्षिपेद्भुवीति। एतच्च सायं प्रातः कर्तव्यमथ सायंप्रातः सि
द्धस्य हविष्यस्य जुहुयादित्याश्वलायनस्मरणात्। इह केचिद्वैश्वदेवाख्यस्य कर्मणः पुरुषार्थत्वमन्नसंस्कारकर्म
त्वं चेच्छंति॥ अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादित्यन्नसंस्कारकर्मता प्रतीयते। अथातः पंचमहायज्ञा
इत्युपक्रम्य तानेतान्यहरहः कुर्वीतेति नित्यत्वाभिधानात् पुरुषार्थत्वं चावगम्यते। इति तद्युक्तं। पुरुषार्थत्वे

संस्कारकर्मत्वानुपपत्तेः। तथाहि। द्रव्यसंस्कारकत्वपक्षे अन्नार्थता वैश्वदेवकर्मणः॥ पुरुषार्थत्वे वैश्वदेवकर्मा-
र्थता द्रव्यस्येति परस्परविरोधात्। पुरुषार्थत्वमेव युक्तं महायज्ञैश्च ब्राह्मीयं क्रियात॥ तनुरिति। तथा च वैश्वदेवेऽनि-
र्वृत्ते यद्यन्योऽतिथिराव्रजेत्। अन्नं तस्मै यथाशक्ति प्रदद्यान्न बलिं हरेदिति मनुस्मरणात्। पुरुषार्थत्वे वैश्वदेवाख्यं
कर्म न प्रतिपाकमावर्त्तनीयं। तस्माद्द्वयं सायंप्रातरित्याहिनोत्पत्तिप्रयोगौ दर्शितौ। तानेतान्यज्ञानूयथाकालं अहरहः
२ कुर्वीतेति अधिकारिविधिरिति सर्वमस्तुत्यमवद्यं॥ छ॥ अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलं। स्वाध्यायं सततं कुर्या-
न्न पचेदन्नमात्मने। प्रत्यहमन्नं पितृमनुष्येभ्यश्च यथाशक्ति देयमन्नाभावे कंदमूलफलादि। तस्याप्यभावे जलं देय-
मपि शक्त्यात्। स्वाध्यायं सततं कुर्यात्। अविस्मरणार्थं। न पचेदन्नमात्मार्थमन्नग्रहणं सकलादनीयद्रव्यप्रदर्शना-
र्थं। कथं तर्हि। तद्देवताद्युद्देशेनैव॥ छ॥ बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः। संभोज्यातिथिभृत्यांश्च दंपत्योः
शेषभोजनं परिणीता पितृगृहे स्थिता स्ववासिनी। शेषाः प्रसिद्धाः। बालादीनतिथिभृत्यांश्च संभोज्य भोजनं पित्वा दंपत्योः
शेषभोजनं कर्त्तव्यं॥ छ॥ अपोशानेनोपरिष्टादधस्तादश्नता तथा॥ अनग्नममृतं चैव कार्यमन्नं द्विजन्मना। तुंआने-
न द्विजन्मना उपरिष्टादधस्ताच्चापोशानेन कर्मणा। अन्नमनग्नममृतं च कार्यं। द्विजन्मग्रहणं उपनयनप्रभृति
सर्वाश्रमसाधारणार्थं॥ छ॥ अतिथित्वेन वर्णानां देयं शक्त्यानुपूर्वशः। अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैः।
वैश्वदेवानंतरं वर्णानां ब्राह्मणादीनामतिथित्वेन युगपत्प्राप्तानां ब्राह्मणाद्यानुपूर्व्येण यथाशक्ति देयं। सायंकाले- २०
पि यद्यतिथिरागच्छति। तदा असौ न प्रणोद्यः अप्रत्याख्येय एव। यद्यप्यदनीयं किमपि नास्ति तथापि वाग्भूतृणोदकैः

सत्कारं कुर्यात्॥ छ॥ सत्कृत्य भिक्षवे भिक्षा दातव्या सुव्रताय च। भोजयेच्चागतान्काले सखिसंबंधिबांधवान्। भिक्षवे
संन्यासिने भिक्षा दातव्या। सुव्रताय ब्रह्मचारिणे यतये सत्कृत्य स्वस्तिवाच्य भिक्षाप्रदानपूर्वं इत्यनेन विधिना भिक्षा
दातव्या। भिक्षा च ग्राससम्मिता। भोजनं हंतकारं च अग्रं भिक्षामथापि वा। असंभवे नरो दद्यादुदपात्रमथापि वा। य-
थाविभवतो दद्यात्पूर्वाभावे परं परं। न विद्यमाने पूर्वस्मिन्नुत्तरप्राप्तिरिष्यते। ग्रासमात्रा भवेद्भिक्षा पुष्कलं तच्चतुर्गु-
णं। हंतस्तच्चतुर्गुणं स्यादग्रं तत्त्रिगुणं भवेत्। इति शातातपस्मरणात्। भोजनकाले चागतान्सखिसंबंधिबांधवा-
न् भोजयेत्। सखा मित्रं संबंधिनो येभ्यः कन्या प्रदत्ता प्रतिगृहीता वा मातृपितृसंबंधिनो बांधवाः॥ छ॥ महोक्षं वा महा-
जं वा श्रोत्रियायोपकल्पयेत्। सत्क्रियान्वासनं स्वादुभोजनं सूनृतं वचः। महांतमुक्षाणं धौरेयं महाजं वा श्रोत्रि- २
याभ्यागतायोपकल्पयेत्। तवदर्थमयमस्माभिः परिकल्पित इति। तस्मै त्वर्थं न तु दानाय व्यापादनं न यथा। य-
था सर्वमेतद्भवदीयमिति प्रतिश्रोत्रियमुक्ताः संभवात्। अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु इति निषेधाच्चात-
स्मात्सत्क्रियाद्येव कर्त्तव्यं। सत्क्रिया स्वागतवचनासनपाद्यार्घ्याचमनादिदानं। तस्मिन्नुपविष्टे पश्चादुपवेशनम-
न्वासनं स्वादुभोजनं मृष्टमशनं। सूनृतं वचः। धन्या वयमद्य भवदागमनादित्यादि। एतच्च श्रोत्रियेऽश्रोत्रिये पु-
नरश्रोत्रियस्यासनोदके इति गौतमोक्तं वेदितव्यं॥ छ॥ प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः। प्रियो विवाह्य-
श्च तथा यज्ञं प्रत्यृत्विजः पुनः। स्नातकः विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातकश्च। आचार्यः उक्तलक्षणः।

पार्थिवो वश्यमाणलक्षणः प्रियो मित्रं। विवाह्यो जामाता। चकाराच्छ्वशुरपितृव्यमातुलादीनां ग्रहणं। ऋत्विजो वृत्वा म
धुपर्कमाहरेत्। स्नातकायोपस्थिताय राज्ञे चाचार्यश्वशुरपितृव्यमातुलानां चेत्याश्वलायनस्मरणात्। एतस्मात
कादयः प्रतिसंवत्सरं गृहमागताः अर्घ्या मधुपर्केण संपूज्याः अर्घशब्दो मधुपर्कं लक्षयति। ऋत्विजः उक्तल
क्षणाः संवत्सरादर्वागपि प्रतियज्ञं मधुपर्केण संपूज्याः॥ छ॥ अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः। मान्यावेतौ गृ
हस्थस्य ब्रह्मलोकमभीप्सतः। अध्वनि वर्तमानोऽतिथिर्वेदितव्यः। श्रोत्रियवेदपारगावध्वनि वर्तमानौ ब्रह्मलो
कमभीप्सतो गृहस्थस्य मान्यावतिथी वेदितव्यौ। यद्यप्यध्ययनमात्रेण श्रोत्रियस्तथापि शिक्षाद्यध्ययनसंपन्नोऽ
त्र श्रोत्रियोऽभिधीयते। एकशाखाध्यापनक्षमो वेदपारगः॥ छ॥ पराकरुचिर्न स्यादनिंद्यामंत्रणादृते। वाक्पा २
णिपादचापल्यं वर्जयेच्चातिभोजनं। परपाके रुचिर्यस्यासौ तथोक्तो नैव पराकरुचिः स्यादनिंद्येनामंत्रणं वि
ना। अनिंद्येनामंत्रितो नापक्रामेदिति स्मरणात्। वाक्पाणिपादचापल्यं वाक् च पाणी च पादौ च वाक्पाणिपादं
तस्य चापल्यं वर्जयेत्। वाक्चापल्यमसत्यानृतादिभाषणं पाणिचापलं वृथा नास्फोटनादि। पादचापलं लंघ
नोत्प्लवनादि। चकारान्नेत्रचापलं वर्जयेत्। न शिश्नोदरपाणिपादचक्षुर्वाक्चापलानि कुर्यादिति गौतमस्मर
णात्। अतिभोजनं च वर्जयेदनारोग्यादिहेतुत्वात्॥ छ॥ अतिथिं श्रोत्रियं तृप्तमासीमांतमनुव्रजेत्। अहःशेषं स २९
सीत शिष्टैरिष्टैश्च बंधुभिः। पूर्वोक्तं श्रोत्रियातिथिं वेदपारगातिथिं च भोजनादितृप्तं सीमांतं यावदनुव्रजेत्। ततो

भोजनानंतरं अहःशेषं शिष्टैरितिहासपुराणादिवेदिभिरिष्टैश्च काव्यकथाप्रपंचचतुरैर्बंधुभिश्चानुकूलालाला
पकश्रवैः समासीत॥ छ॥ उपास्य पश्चिमां संध्यां हुत्वाग्नींस्तानुपास्य च। भृत्यैः परिवृतो भुक्त्वा नातितृप्त्याथ संविशे
त्। ततः पूर्वोक्तेन विधिना पश्चिमां संध्यामुपास्याग्नीन् अग्निं वा हुत्वा तानुपास्योपस्थायानंतरं भृत्यैः पूर्वोक्तैः स्ववासिन्या
दिभिः परिवृतो नातितृप्त्या भुक्त्वा चकारादायव्ययादी गृहचिंतां निर्वर्त्यानंतरं संविशेत् स्वप्यात्॥ छ॥ ब्राह्मे मुहूर्ते
चोत्थाय चिंतयेदात्मनो हितं। धर्मार्थकामान् स्वे काले यथाशक्ति न हापयेत्। ततो ब्राह्मे मुहूर्ते उत्थाय पश्चिमेऽर्द्धप्र
हरे प्रबुध्यात्मनो हितं कृतं करिष्यमाणं च वेदार्थसंशयांश्च चिंतयेत्। तदानीं चित्तस्याव्याकुलत्वेन तत्प्रतिभास
नयोग्यत्वात्। ततो धर्मार्थकामान् स्वोचिते काले यथाशक्ति न परित्यजेत् यथासंभवं सेवेतेत्यर्थः। पुरुषार्थत्वा
त्। यथाह गौतमः। न पूर्वाह्णमध्यंदिनापराह्णानफलान् कुर्यात् धर्मार्थकामेभ्यस्तेषु धर्मोत्तरः स्यादिति। अत्र
यद्यप्येतेषां सामान्येन सेवनमुक्तं तथापि कामार्थयोर्धर्मो विशेषेणानुष्ठानं तयोर्धर्ममूलत्वात्। एवं प्रतिदिनमु
नुष्ठेयं॥ छ॥ विद्याकर्मवयोबंधुवित्तैर्मान्या यथाक्रमं। एतैः प्रभूतैः शूद्रोऽपि वार्द्धके मानमर्हतीति। विद्या पूर्वोक्ता
कर्म श्रौतस्मार्तं वय आत्मनोऽधिकं॥ सप्तत्या ऊर्ध्वं बंधु॥ बंधु स्वजनसंपत्तिः वित्तं ग्रामरत्नादिकं एतैर्युक्ताः क्र
मेण मान्याः पूजनीयाः एतैः कर्मबंधुवित्तैः प्रभूतैः प्रवृद्धैः समस्तैर्व्यस्तैर्वा युक्तः शूद्रोऽपि वार्द्धके अशीतिवर्षे मान
मर्हति। शूद्रोऽप्यशीतिकोऽवर इति गौतमस्मरणात्॥ छ॥ वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणां। पंथा देयो नृपस्ते
षां मान्यः स्नातश्च भूपतेः। वृद्धः पक्वकेशः प्रसिद्धः भारी भाराक्रांतः नृपोऽत्र विषयनिर्वर्तकः क्षत्रियमात्रं स्नातो विद्याव्रतेन

यस्मात्तकेः। स्त्रीप्रसिद्धा रोगी व्याधितः। वरो विवाहोद्यतः चक्री शाकटिकः। चकारान्मत्तोन्मत्तादीनां ग्रहणं वालवृ-
द्धमत्तोन्मत्तोपहतदेहभाराक्रान्तस्त्रीस्नातकप्रव्रजितेभ्य इति शंखस्मरणात्। एतेभ्यः पंथा देय एतेषामभिमुखा-
गतेषु पंथा यथाक्रमेण। एषांदिनां राज्ञा सह समवाये राजा मान्य इति तस्मै पंथा देयो नृपतेरपि स्नातको मान्यः स्ना-
तकग्रहणं स्नातकमात्रादि प्रायेण तु ब्राह्मणाभिप्रायेण तस्य सदेव गुरुत्वात् यथाह शंखः। अथ ब्राह्मणायाग्रे पं-
था राज्ञ इत्येके। तच्चानिष्ट गुरुत्वाद्ब्राह्मणो राजानमतिशेते। तस्मै पंथा इति हारीतादीनां पथि परस्परसमवा-
ये न त्वाविद्यानिर्वा विशेषो द्रष्टव्यः॥ ११७॥ इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च। प्रतिग्रहोधिको विप्रे याजना- २
ध्यापने तथा। वैश्यस्य क्षत्रियस्य च कारात् ब्राह्मणस्य द्विजानुलोमानां च यागाध्ययनदानानि साधारणानि कर्मा-
णि ब्राह्मणस्याधिकानि प्रतिग्रहयाजनाध्यापनानि तथेति स्मृत्यंतरोक्तं तदुपसंग्रहो यथाह गौतमः। कृषिवा-
णिज्ये वा स्वयं कृतं कुसीदं चेति। अध्यापनं तु क्षत्रियवैश्ययोर्ब्राह्मणप्रेरितयोरनवृत्तिन स्वेच्छया। आपत्कल्पो
ब्राह्मणस्याब्राह्मणाद्विद्योपयोगोऽनुगमनं शुश्रूषा समाप्ते ब्राह्मणो गुरुरिति गौतमस्मरणात्। एतान्यनापदि ब्रा- २
ह्मणस्य षट्कर्माणि। तत्र त्रीणि इज्यादीनि धर्मार्थानि प्रतिग्रहादीनि वृत्त्यर्थानि षट्सु कर्मसु त्रीणि कर्मा-
णि जीविकायाजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति मनुस्मरणात्। अतस्त्वादीनि त्र्यवश्यकर्तव्यानि न प्र-
तिग्रहादीनि द्विजातीनामध्ययनमिज्या दानं ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः पूर्वेषु नियम इति गौत- २२
मस्मरणात्॥ ११८॥ प्रधानं क्षत्रिये प्रजानां परिपालनं। कुसीदं कृषिवाणिज्यं पाशुपाल्यं विशः स्मृतं। क्षत्रियस्य पा-

लनं प्रधानं कर्म धर्मार्थं वृत्त्यर्थं च वैश्यस्य च कुसीदं कृषिवाणिज्यपशुपालनानि वृत्त्यर्थानि कर्माणि कुसीदं च वृध्या-
र्थं द्रव्यप्रयोगः लाभार्थं क्रयविक्रयौ वाणिज्यं शेषं प्रसिद्धं शास्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्पशुकृषी विशः। आजीवना- २
र्थं धर्मस्तु दानमध्ययनं यजिरिति मनुस्मरणात्॥ ११९॥ शूद्रस्य द्विजशुश्रूषा तयाजीवन्वणिक् भवेत्॥ शिल्पैर्वा
विविधैर्जीवेद्द्विजातिहितमाचरन्। शूद्रस्य द्विजशुश्रूषा प्रधानं कर्म धर्मार्थं वृत्त्यर्थं ब्राह्मणशुश्रूषा परमो धर्मः
। विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते। इति मनुस्मरणात्। यदा पुनर्द्विजशुश्रूषया जीवितुं न शक्नोति तदा त
वणिक् भूत्वा जीवेत् नानाविधैः शिल्पैर्द्विजातीनां हितं कुर्वन् यथाह शंखः। कर्मभिः द्विजातिशुश्रूषायामयोगेन
वर्तितादृशानि कुर्वन्नित्यर्थः। तानि च देवलेनोक्तानि शूद्रधर्मो द्विजातिशुश्रूषा पापवर्जनं कलत्रादिपोषणं
कर्षणपशुपालनभारोद्वहनपण्यव्यवहारचित्रकर्मनृत्यगीतवेणुवीणामुरजमृदंगवादनानीति॥ १२०॥ किं-
च। भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियापरः। नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेत्। भार्यायामेव न साधा- २
रणस्त्रीषु परस्त्रीषु चारतिरभिगमनं यस्य स तथोक्तः। शुचिर्बाह्याभ्यंतरशौचयुक्तः। द्विजवद्भृत्यभर्ता श्राद्ध-
क्रियारतः श्राद्धानि नित्यनैमित्तिककाम्यानि च क्रियाः स्नातकव्रतानि अविरुद्धानि तेषु रतः नम इत्यनेन मंत्रे-
ण शूद्रः कान्पंचमहायज्ञान्न हापयेत् नमस्कारमंत्रं केचित् देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वा-
हायै नित्यमेव नमो नमः। इति वर्णयंति। नम इत्यन्ये वेष्टदेवं तत्र लौकिकेग्नौ कर्तव्यं विवाहेग्नावित्यर्थः। चार्याः

॥छ॥ इदानीं साधारणधर्मानाह ॥ अहिंसा सत्यमस्तेयं शौचमिंद्रियनिग्रहः। दानं दमो दया क्षांतिः सर्वेषां धर्मसा
धनं ॥ हिंसा प्राणिपीडा तस्या अकरणमहिंसा सत्यमप्राणिपीडाकयथार्थवचनं अस्तेयमदत्तानुपादानं शौचं
बाह्यमाभ्यंतरं च बुद्धिकर्मेंद्रियाणां नियतविषयवृत्तितेंद्रियनिग्रहः ॥ यथाशक्ति प्राणिनामन्नोदकादिदाने
नार्त्यपहारो दानं ॥ अंतःकरणसंयमो दमः ॥ आपन्नरक्षणं दया ॥ अपकारे विचित्तस्य अविकारः क्षांतिः। एते
सर्वेषां पुरुषाणां धर्मसाधनं ॥ छ ॥ वयोबुद्ध्यर्थवाग्वेषश्रुताभिजनकर्मणां ॥ आचरेत्सदृशीं वृत्तिमजिह्मामश
ठां तथा। वयो बाल्ययौवनादि बुद्धिर्नैसर्गिकी लौकिकवैदिकव्यवहारेषु अर्थो वित्तं गृहक्षेत्रादि वाग्वचनं वे
षो वस्त्रमाल्यादिविन्यासः। श्रुतं पुरुषार्थशास्त्रश्रवणं अभिजनः कुलं कर्म वृत्त्यर्थप्रतिग्रहादि एतेषां व
यःप्रभृतीनां सदृशीमुचितां वृत्तिमाचरणं आचरेत् ॥ यथाहुः स्वोचितां न यौवनोचितां एवं बुद्ध्यादिष्वपि योज्यं अजि
ह्मामवक्रां अशठाममत्सरां ॥ छ ॥ एवं स्मार्त्तानि कर्माणि अनुक्रम्य श्रौतानि कर्माण्युपक्रामति त्रैवार्षिकाधिकान्नो यः।
स हि सोमं पिबेद्द्विजः। प्राक्सौमिकीः क्रियाः कुर्याद्यस्यान्नं वार्षिकं भवेत् ॥ त्रिवर्षजीवनपर्याप्तं त्रैवार्षिकं अधिकं वा
अन्नं यस्य स एव सोमं पिबेत् यागं कुर्यात् नातोल्पधनः। अतः स्वल्पीयसि द्रव्ये सोमं पिबति द्विजः। सपीतसोमपू
र्वोपि न तस्याप्नोति तत्फलं इति दूषणस्मरणात्। एवं काम्यानि प्रायेण नित्यस्यावश्यकर्तव्यत्वान्नियमः। य
स्य वर्षजीवनपर्याप्तमन्नं भवति प्राक्सौमिकीः सोमात्प्राक् प्राक्सोमं याक्सोमेन वाः। प्राक्सौमिकाः स्ताः अग्निहो २३

त्रदर्शपूर्णमासपशुचातुर्मास्यानि काम्यानि तद्विकाराश्च ताः क्रियाः कुर्यात् ॥ छ ॥ एवं काम्यश्रौतानि कर्माण्यभिधा
येदानीं नित्यान्याह। प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा। कर्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि। संवत्स
रे संवत्सरे सोमयागः कार्यः पशुः प्रत्ययनं अयने दक्षिणोत्तरसहिते निरूढः पशुयागः तथा प्रतिसंवत्सरं वा पशु
ना संवत्सरे संवत्सरे यजेत षट्सु षट्सु मासेष्वित्येके इति श्रवणात्। आग्रयणेष्टिश्च सस्योत्पत्तौ कर्तव्या। चातुर्मा
स्यानि प्रतिसंवत्सरं कर्तव्यानि ॥ छ ॥ एषामसंभवे कुर्यादिष्टिं वैश्वानरीं द्विजः। एषां सोमप्रभृतीनां पूर्वोक्तानां नित्या
नां कथंचिदसंभवे तत्काले वैश्वानरीमिष्टिं कुर्यात् ॥ छ ॥ किंच ॥ हीनकल्पं न कुर्वीत सति द्रव्ये फलप्रदं। यो
यद्धीनकल्पत्वेनोक्तः स सति द्रव्ये सौ न कर्तव्यः यच्च फलदं ॥ काम्यं कर्म तद्धीनकल्पेन कुर्वीत न कर्तव्यमिति ॥ छ ॥ चां
ते डालो जायते यज्ञकरणात् शूद्रभिक्षितात् ॥ यज्ञार्थलब्धमददद्भासः ॥ काकोपि वा भवेत् ॥ यज्ञार्थमर्थं भिक्षित्वा
यो न सर्वं प्रयच्छति ॥ स याति भासतां विप्रः काकतां वा शतं समाः इति। भासः शकुनकाकः प्रसिद्धः ॥ छ ॥ कुसूलकुंभी
श्र धान्यो वा त्र्यहिको श्वस्तनोपि वा ॥ कुसूलं कोष्ठकं कुंभी उष्ट्रिका कुसूलं च कुंभी च कुसूलकुंभ्यौ ताभ्यां परिमितं धान्यं यस्य
स तथोक्तः। कुसूलधान्यः स्यात् कुंभीधान्यो वा तत्र स्वकुटुंबपोषणद्वादशाहमात्रपर्याप्तधनं कुसूलधान्यः कुंभी
धान्यस्तु स्वकुटुंबपोषणषडहपर्याप्तधनः त्र्यहः पर्याप्तधनमस्यास्तीति त्र्याहिकः श्वोर्थं धान्यमस्तीति श्वस्तनः न
विद्यते श्वस्तनं यस्यासौ अश्वस्तनः ॥ छ ॥ कुसूलधान्यादिसंचयोपायमाह। जीवेद्वापि शिलोंछेन श्रेयानेषांप

रः परः शिलोञ्छादिर्नियतितपरित्यक्तकणशरीरग्रहणं शिलं । एकैकस्य त्यक्तस्य कणस्योपादानं उञ्छः ॥ शिलोञ्छेन च शिलो-
ञ्छेन तत्र वा कुसूलधान्यादिश्चतुर्विधो गृहस्थो जीवेत् । एषां कुसूलधान्यादीनां ब्राह्मणानां गृहस्थानां चतुर्णां परः
पश्चात्यः श्रेयान् उत्कृष्टतमः प्रशस्यतमः एतत्तु यद्यपि द्विजः प्रवर्त्तत तथापि ब्राह्मणस्यैकस्य वृत्तिमर्हतीति विद्यो-
पशमादियोगात् ॥ यथाह मनुः । अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः । या वृत्तिस्तां समास्थाय विप्रो जीवेदना-
पदीति । विप्रस्यैव प्रसक्तस्य कुसूलधान्यको वा स्यात्कुम्भीधान्यक एव वा इत्याद्यभिहितत्वात् । एतच्चातिसंयततया या-
वरं प्रस्तुयते न विप्रमात्राभिप्रायेण । तथा च सति त्रैवार्षिकाधिकान्नो यः स हि सोमं पिबेदित्यनेन न विरोधः । तथा च
गृहस्थानां द्वैविध्यं तत्र तत्रोक्तं यथाह देवलः । द्विविधो गृहस्थो यायावरः । शालीनश्च तयोर्यायावरः प्रवरो याजना-
ध्यापनप्रतिग्रहरिक्थसंचयवर्जयेनात् ॥ षट्कर्मविशिष्टत्वेऽपि चतुष्पदगृहग्रामधनधान्ययुक्तो लोकानुवर्त्ती शाली-
न इति ॥ ७ ॥ शालीनोऽपि चतुर्विधः याजनाध्यापनप्रतिग्रहकृषिवाणिज्यपाशुपाल्यैः षड्भिर्जीवत्येकोऽयजनादि-
भिस्त्रिभिरन्यो याजनाध्यापनाभ्यामपरः चतुर्थस्त्वध्यापनेनैव यथाह मनुः । षट्कर्मैकोऽभवत्येषां त्रिभिरन्यः
प्रवर्त्तते । द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति । इति अत्र च प्रतिग्रहोऽधिकोऽविरुद्ध इत्यादिना शालीनस्य वृत्त-
यो दर्शिताः । यायावरस्य जीवे द्वादिविधशिलोञ्छवृत्तेति ॥ ॥इति गृहस्थप्रकरणं॥ ॥एवं श्रौतस्मार्त्तानि कर्माणि गृ- २४
हस्थस्याभिधायेदानीं स्नानादारभ्य ब्राह्मणस्यावश्यकर्त्तव्यानि विधिप्रतिषेधात्मकानि मानससंकल्परूपाणि स्नातक-

व्रतान्याह ॥ न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः ॥ न विरुद्धप्रसंगेन संतोषी च भवेत्सदा ॥ ब्राह्मणस्य प्रतिग्रहा-
दयोऽर्थप्राप्त्युपाया दर्शिताः ॥ अत्र विशेष उच्यते ॥ स्वाध्यायविरोधिनमर्थमप्रतिषिद्धमपि नेहेत नान्विच्छेत् । न यत-
स्ततो न कुतश्चित् अविदिताचारात् न विरुद्धप्रसंगेन विरुद्धमयाज्ययाजनादिप्रसंगो नृत्यगीतादिः विरुद्धं च प्र-
संगश्च विरुद्धप्रसंगस्तेनार्थं नेहेतेति संबध्यते नञ् आवृत्तिः प्रत्येकं पर्युदासार्थं सर्वत्राप्यस्मिन् स्नातकव्रतप्रकरणे
नञ्शब्दः पर्युदासार्थ एव किंच अर्थलाभेऽपि संतोषी परितुष्टो भवेत् ॥ चकारात् संयतश्च संतोषपरमास्थाय सु-
खार्थी संयतो भवेदिति मनुस्मरणात् ॥ ७ ॥ कुतस्तर्हि धनमन्विच्छेदित्याह ॥ राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं
क्षुधा । दंभिहैतुकपाखंडिबकवृत्तींश्च वर्जयेत् । क्षुधा सीदन् पीड्यमानः । स्नातको राज्ञो विहितवृत्तात् अन्तेवा-
सिनो वक्ष्यमाणलक्षणात् याज्यात् यजनार्हाच्च धनमाद(द्यात्) । दीनः क्षुधा सीदन् नित्यनैमित्तिकविभागादिप्राप्तकुटुंबपोषणप-
र्याप्तधनो न कुतश्चित् अर्थमन्विच्छेदिति गम्यते किंच दंभिहैतुकादीन् सर्वकार्येषु लौकिकवैदिकशास्त्रीयेषु
वर्जयेत् । चकाराद्विकर्मस्थबैडालव्रतिकान् शठान् । हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेदिति । लो-
करंजनार्थमेव कर्मानुष्ठायी दंभी युक्तिबलेन सर्वत्र संशयकारी हैतुकः । त्रैविद्यबाह्यापरिगृहीताश्रमिणः पाखं-
डिनः । बकवदस्य वर्त्तनमिति बकवृत्तिः । यथाह मनुः । अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः । शठो मिथ्यावि-
नीतश्च बकवृत्तिरुदाहृतः । इति प्रतिषिद्धसेविनो विकर्मस्थाः बिडालो मार्जारस्तस्य व्रतं यस्यासौ बिडा-
लव्रतिकः धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदंभकः । बैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसंधकः इति स्मरणात् । त्रा

डः सर्वत्र वक्रः। एतैः संसर्गनिषेधात्॥ एवं स्वयमेवं विधो न भवेदिति गम्यते॥ छ॥ किंच॥ शुक्लांबरधरो नीचकेशश्म
श्रुनखः शुचिः। न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः॥ शुक्ले अंबरे वाससी धारयतीति शुक्लांबरधरः। केशाश्च श्मश्रू
णि च नखाश्च केशश्मश्रुनखं नीचं कृत्तं केशश्मश्रुनखं यस्यासौ तथोक्तः। शुचिरंतर्बहिश्च स्नानानुलेपनस्रगादिभिः सु
गंधी भवेत्। यथाह गौतमः। स्नातको नित्यं शुचिः सुगंधः स्नानशील इति॥ सुगंधित्वविधानाद्दुर्गंधमाल्यस्य निषेधः। तथा
च गोभिलः। न निर्गंधां स्रजं धारयेदन्यत्र हिरण्यस्रज इति॥ सदा स्नातक एवं कृतो न वेदेन वा सति संभवे न जीर्णमलवद्वासा
न वेद्वि विभवे सतीति स्मरणात्॥ न च भार्याया दर्शने तस्यां कुर्वतः स्थितायां अश्नीयात्। अवीर्यवदपत्यं भवेत्॥ तथा श्रु
तिः। जायाया अंते नाश्नीयादवीर्यवदपत्यं भवतीति॥ अतस्तया सह भोजनं दूरादेव निरस्तं। नैकवासाः। नापि संस्थितः
उत्थितः अश्नीयादिति संबध्यते॥ छ॥ किंच॥ न संशयं प्रपद्येत नाकस्मादप्रियं वदेत्। नाहितं नानृतं चैव न स्तेनः स्या
न्न वार्धुषी॥ कदाचिदपि संशयं प्राणविपत्तिसंशयावहं कर्म न प्रपद्येत। न कुर्यात्। यथा व्याघ्रचौराद्युपद्रुतदेशक्रम
णादि। अकस्मान्निष्कारणं किंचिदपि पुरुषमप्रियं उद्वेगकारि वाक्यं न वदेत्॥ न चाहितं अनृतं वा प्रियमपि चकारादस
त्यं बीभत्साकस्वैरकस्मान्न वदेदिति संबध्यते॥ एतच्च परिहासादिव्यतिरेकेण गुरूणामपि समं हास्यं कर्तव्यं कुटि
लं विना। इति स्मरणात्। न च स्तेनः अन्यदीयस्यादत्तस्य ग्रहीता न स्यात्। प्रतिषिद्धवृद्ध्युपजीवी वार्धुषी न वार्धुषी स्यात्
छ॥ किंच॥ दाक्षायणी ब्रह्मसूत्री वेणुमान् सकमंडलुः॥ कुर्यात्प्रदक्षिणं देवमृद्गोविप्रवनस्पतीन्॥ दाक्षायणं सुव २५
र्णं तद्वान् दाक्षायणी॥ ब्रह्मसूत्रं यज्ञोपवीतं तदस्यास्तीति ब्रह्मसूत्री वैणवयष्टिमान् कमंडलुमान् स्यादिति सर्वत्र

संबंधनीयं। अत्र च ब्रह्मचारिप्रकरणे उक्तस्यापि यज्ञोपवीतस्य पुनर्वचनं द्वितीयप्राप्त्यर्थं यथाह वसिष्ठः। स्ना
तकानां द्वितीयं स्यादंतर्वासस्तथोत्तरं॥ यज्ञोपवीते द्वे यष्टिः सोदकश्च कमंडलुरिति। अत्र च दाक्षायणी ति
सामान्याभिधानेऽपि कुंडलधारणमेव कार्यं॥ वैणवीं धारयेद्यष्टिं सोदकं च कमंडलुं॥ यज्ञोपवीतं वेदं च शुभे रौ
क्मे च कुंडले इति मनुस्मरणात्॥ तथा देवं देवतां मृदमुद्धृतां गां ब्राह्मणं च वनस्पतिं चाश्वत्थादिं प्रदक्षिणं कुर्या
त्। एतत् दक्षिणतः कृत्वा व्रजेत्। एवं च चतुष्पथादीनपि मृदं गां देवतां विप्रं घृतं मधु चतुष्पथं॥ प्रदक्षिणानि कुर्वी
त प्रज्ञातांश्च वनस्पतीन्॥ इति मनुस्मरणात्॥ छ॥ न मेहेन्नदीच्छायावर्त्मगोष्ठाम्बुभस्मसु॥ न प्रत्यग्न्यर्कगोसो
मसंध्याम्बुस्त्रीद्विजन्मनः॥ नद्यादिषु न मेहेत् न मूत्रपुरीषोत्सर्गं न कुर्यात्। एवं श्मशानादावपि यथाह शंखः। न
गोमयकृष्टोप्तशाड्वलवति श्मशानवल्मीकपर्वतपुलिनेषु मेहेत्। स्नाताधारत्वादिति। तथाग्न्यादीन् प्रति अ
ग्न्यादीनामभिमुखो न मेहेत् तन्नाप्येतान् पश्यन् यथाह गौतमः॥ न वाय्वग्निविप्रादित्यापो देवता गाश्च प्रतिपश्यन्
वा मूत्रपुरीषामेध्यान्युत्सृजेत्। न एतान् प्रतिवातौ प्रसारयेत् इति एतद्व्यतिरेकेण भूमिमयज्ञियैस्तृणैराच्छाद्यो
त्सार्य मेहनं कार्यं। यथाह वसिष्ठः। परिवेष्टितशिरा भूमिमयज्ञियैस्तृणैरंतर्धाय मूत्रपुरीषे कुर्यात्॥ छ॥ नेक्षेता
र्कं न नग्नां स्त्रीं न च संसृष्टमैथुनां। न च मूत्रं पुरीषं वा नाशुचीराहुतारकाः। नैवार्कमीक्षेत यद्यप्येतत्सामान्येनोक्तं त
थाप्युद्यास्तमयराहुग्रस्तोदकप्रतिबिंबमध्यान्हवर्तिन एवादित्यस्य ग्रहणं निषिध्यते तेन सर्वदा यथोक्तं मनुना नेक्षेतो
द्यंतमादित्यं नास्तं यंतं कदाचन नोपसृष्टं न वारिस्थं न मध्यं नभसो गतं इति। उपस्नोगादन्यत्र नग्नां स्त्रियं नेक्षेत॥ अ

न्यत्र मैथुनादि त्याश्वलायनः। संस्रष्टमैथुनोऽकृतोयानो गां तेऽनग्नामनेक्षेतवकाराज्झौ जनादिकमाचरंतीत थाम
तः। नाश्नीयाद्भार्यया सार्द्धं नैनामीक्षेत चाश्नतीं। क्षुवतीं जृंभमाणां च न चासीनां यथासुखं। नांजयंतीं स्वके नेत्रे न च
न्यक्तामनाहतां। न पश्येत्प्रसवंतीं च श्रेयस्कामो द्विजोत्तमः इति। मूत्रपुरीषे च न पश्येत्तथा अशुचिः सन् राजतारक
श्च न पश्येत्। चकारादुदके स्वप्रतिबिंबं न चोदके निरीक्षेत स्वरूपमिति धारणेति वचनात्॥ छ॥ अयंमे वज्र इत्येकं
सर्वमंत्रमुदीरयन्। वृषन्यतो गच्छेत् स्वये बन्यकृशिरान्न च। वर्षति सत्यं यमे वज्रः पाप्मानमपहंतु इति मंत्रमु
च्चारयन्। अप्रावृतो गच्छेत् अनाच्छादितः स्यात्। न प्रधावेच्च वर्षतीति प्रषेधात्। न च प्रत्यकृशिरास्वपात्। चकारान्न
नग्नः शयीत एकश्चशून्यगृहे न च नग्नः शयीतेति न च स्वप्यादन्य गेह इति मनुस्मरणात्॥ छ॥ ष्ठीवनासृक्शकृन्मू
त्ररेतांस्यप्सु न निक्षिपेत्। पादौ प्रतापयेन्नाग्नौ न चैनं पिलंघयेत्॥ ष्ठीवनमुद्गीरणं। असृक्रक्तं शकृत्पुरीषं शेषं प्र
सिद्धं। अप्सु न निक्षिपेत्॥ एवं तु पादीनपि यथाह शंखः। तुषकेशकरीषभस्मास्थिश्लेष्मनखलोमान्यप्सु न क्षिप
त्। न पादेन पाणिना वा जलमभिहन्यादिति। अग्नौ च पादौ न प्रतापयेत्। नाप्युल्लंघयेत्। चकारात् ष्ठीवनादीन्यग्नौ
न निक्षिपेत्। मुखोपधमनादिचाग्नेर्न कुर्यात्॥ तथा च मनुः॥ नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियं। नामे
ध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्। अधस्तान्नोपदध्याच्च न चैनमभिलंघयेत्। न चैनं पादतः कुर्यान्न प्राणाबाध
माचरेत्॥ छ॥ जलं पिबेन्नांजलिना न शयानं प्रबोधयेत्। नाक्षैः क्रीडेन्न धर्मघ्नैर्व्याधितैः न संविशेत्॥ जलमंजलिना सं २६
हताभ्यां पाणिभ्यां न पिबेत्॥ जलग्रहणं पेयमात्रोपलक्षणं विद्यादिभिरात्मनोऽधिकं शयानं न प्रबोधयेत् नोद्वाय

येत्। श्रेयांसं न प्रबोधयेदिति विशेषात्॥ अक्षादिभिर्न क्रीडेत्॥ धर्मघ्नैः पश्वादिभिर्न क्रीडेत्। व्याधितैः ज्वराद्य
भिभूतैरेकत्र न संविशेत्॥ छ॥ विरुद्धं वर्जयेत्कर्म प्रेतधूमं नदीतरं। केशभस्मतुषांगारकपालेषु च संस्थितिं। जनप
दकुलाचारग्रामविरुद्धं कर्म वर्जयेत्। प्रेतधूमं चाज्यान् नदीतरणं वर्जयेत् इति संबध्यते। केशादिषु च संस्थि
तिं च वर्जयेत्। चकारादस्थिकपालामेध्येषु च॥ छ॥ नाचक्षीत धयंतीं गां नाद्वारेण विशेत्क्वचित्। न राज्ञः प्रति
गृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः। परस्यक्षीरादि पिबंतीं गां परस्मै नाचक्षीत न च निवर्तयेत्। अद्वारेण पथेन क्वचि
दपि नगरे ग्रामे मंदिरे वा न प्रविशेत्। न कृपणस्य शास्त्रातिक्रमकारिणो सकाशात्प्रतिगृह्णीयात्॥ छ॥ प्रतिग्रहे
सूनिचक्रिध्वजिवेश्यानराधिपाः। दुष्टा दशगुणं पूर्वात्पूर्वादेते यथोत्तरं। प्रतिग्रहे साध्येस्त्यासेदयः एवं पूर्वस्मा
त्पूर्वस्मात्परो दशगुणं दुष्टः। सूना प्राणिहिंसास्त्यास्यास्तीति सूनी प्राणिहिंसापरः चक्री तैलिकः ध्वजी सुराविक्र
कायी वेश्या पण्यस्त्री नराधिपः अनंतरोक्तः॥ छ॥ अध्ययनधर्मनाद॥ ॥ अध्यायानामुपाकर्म श्राविण्यां श्रवणे
न वा॥ हस्तेनौषधिभावे वा पंचम्यां श्रावणस्य च॥ अधीयंत इत्यध्याया वेदास्तेषामुपाकर्म उपक्रमं ओषधीनां प्रादुर्भा
वे सति श्रावणमासस्य पौर्णमास्यां श्रवणनक्षत्रयुक्ते वा दिने हस्तेन युक्तायां पंचम्यां वा स्वगृह्योक्तविधिना कुर्यात्॥
ततः कुर्ह्य सार्द्धं चतुरो मासान्वेदानधीयीत तथा च मनुः॥ श्रावण्यां प्रोष्ठपद्यां वाप्युपाकृत्य यथाविधि। युक्तश्छंदां
स्यधीयीत मासान्विप्रोऽर्द्धपंचमान् इति॥ पौषमासस्य रोहिण्यामष्टकायामथापि वा। जलांते छंदसां कुर्यादुत्सर्गं वि
धिवद्बहिः॥ पौषमासस्य रोहिण्यामष्टकायां वा ग्रामाद्बहिर्जलसमीपे वेदानां स्वगृह्योक्तविधिनोत्सर्गं कुर्यात्।

त्यदाश्रुत्वर्नाद्यपदमासे उपाकर्म तदा माघशुक्लपक्षप्रथमदिवसे उत्सर्गं कुर्यात्। यथोक्तं मनुना। पौषे तु छंदसां कुर्या
द्बहिरुत्सर्जनं द्विजः। माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनीति॥ तदनंतरं पक्षिणीमहोरात्रं वा विरम्य शुक्लपक्षेषु
वेदान्कृष्णपक्षेषु वेदांगानि अधीयीत॥ तथा च मनुः। यथाशास्त्रं तु कृत्वैवमुत्सर्गं छंदसां बहिः॥ विरमेत्पक्षिणीं रात्रिं या।
प्येकमहर्निशं। अत ऊर्ध्वं तु छंदांसि शुक्लेषु नियतः पठेत्॥ छ॥ अनाध्यायानाह॥ ॥अहं प्रेतेष्वनध्यायः शिष्य।
र्त्विग्गुरुबंधुषु। उपाकर्मणि चोत्सर्गे स्वशाखश्रोत्रिये तथा॥ उक्तेन मार्गेणाधीयानस्य शिष्यर्त्विग्गुरुबंधुषु प्रेतेषु मृ
तेषु त्र्यहमनध्यायः। त्रीन् अहोरात्रान् अध्ययनं वर्जयेत्॥ उपाकर्मण्युत्सर्गाख्ये च कर्मणि कृते त्र्यहमनध्ययनं
उत्सर्गे तु मतं पक्षिण्यहोरात्रं वा सहास्येति विकल्पः॥ स्वशाखश्रोत्रिये स्वशाखाध्यायिनि मृते च त्र्यहमनाध्या
यः॥ छ॥ संध्यागर्जितनिर्घातभूकंपोल्कानिपातने। समाप्य वेदं द्युनिशमारण्यकमधीत्य च॥ संध्यायां मेघध्वनौ।
निर्घाते आकाशे उत्पातध्वनौ भूमिचलने उल्कापतने मंत्रस्य ब्राह्मणस्य वा समाप्तौ आरण्यकाध्ययने च द्युने च।
द्युनिशमहोरात्रे अनाध्यायः॥ छ॥ पंचदश्यां चतुर्दश्यामष्टम्यां राहुसूतके। ऋतुसंधिषु भुक्त्वा वा श्राद्धिकं प्रति
गृह्य च। पंचदश्याममावास्यायां पूर्णमास्यां च चतुर्दश्यामष्टम्यां राहुसूतके चंद्रसूर्योपरागे द्युनिशमनध्यायः।
यत्तु त्र्यहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके इति तत्र ग्रस्तास्तविषयं। ऋतुसंधिगतासु च प्रतिपत्सु श्राद्धिकं भोज
नेतत्प्रतिग्रहे च द्युनिशमनाध्यायः। एतच्चैकोद्दिष्टव्यतिरिक्तविषयं। तत्र तु त्रिरात्रं॥ प्रतिगृह्य द्विजो विद्वानेकोद्दि २७
ष्टस्य केतनं। त्र्यहं न कीर्त्तयेद्ब्रह्म इति स्मरणात्॥ छ॥ पशुमंडूकनकुलश्वाहिमार्जारमूषकैः॥ कृतेंतरे त्वहो

रात्रं शक्रपाते तथोच्छ्रये। अध्येतृणां पश्वादिभिरंतरागमने कृते शक्रध्वजस्यावरोपणे दिवसं उच्छ्राये दिवसे च अहो
रात्रमनाध्यायः। द्युनिशमिति प्रकृते पुनरहोरात्रग्रहणं संध्यागर्जितनिर्घातभूकंपोल्कानिपातनेष्वाकालिकत्व
ज्ञापनार्थं आकालिका निर्घातभूकंपराहुदर्शनोल्का इति गौतमवचनात्। निमित्तकालादारभ्यापरेद्युर्यावत्स ए
व कालः तावत्कालः। तत्र तत्र त्वाकालिकोनाध्यायः। एतच्च प्रातःसंध्यास्तनिते। सायंसंध्यास्तनिते उ त्रिरात्रमेव।
सायंसंध्यास्तनिते रात्रिः। प्रातःसंध्यास्तनिते अहोरात्रमिति हारीतस्मरणात्। यत्तु गौतमेनोक्तं। श्वनकुलसर्पमं
डूकमार्जाराणां त्र्यहमुपवासो विप्रवासश्चेति॥ तन्महाध्ययन एव॥ छ॥ श्वक्रोष्टुगर्दभोलूकसामबाणार्त्तनि
स्वने। अमेध्यशवशूद्रांत्यश्मशानपतितांतिके। क्रोष्टा शृगालः। बाणो वंशः। उलूको घूकः। आर्त्तो दुःखितः। ते
षां ध्वानिनां निस्वने तावत्कालमनध्यायः। वीणादिनिस्वनेपि वेणुवीणाभेरीमृदंगदत्तिशब्देष्विति गौतमनिचयि।
द्युत्स्तनितसंप्लवे। भुक्त्वार्द्रपाणिरंभोंतरर्द्धरात्रेतिमारुते। अशुचौ देशे शवे चावात्मनि च। तथा विद्युत्संप्लवे पु
नःपुनः मेघघोषे तात्कालिकोनाध्यायः। भुक्त्वार्द्रपाणिर्नाधीयीत जलमध्ये च॥ अर्द्धरात्रे महानिशाख्ये मध्यप्रहर
द्वयेतिमारुते ह्यपि नाधीयीत॥ छ॥ पांसुवर्षे दिग्दाहे संध्यानीहारभीतिषु॥ धावतः पूतिगंधे च शिष्टे च गृहमा
गते॥ पांसिके रजोवर्षे दिग्दाहे यत्र ज्वलिताइव दिशो दृश्यंते। संध्यायां नीहारे भूमिकायां भीतिषु चौरराजादिकृत
सु तावत्कालमनाध्यायः। धावतस्त्वरितं गच्छतो नाध्यायः। पूतिगंधे कुत्सितगंधे अमेध्यमद्यादिगंधे शिष्टे च श्रोत्रियादौ
गृहमागते तदनुज्ञावधिरनाध्यायः। छ॥ खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे॥ सप्तत्रिंशदनाध्यायानेतांस्ता।

ल्लनात्कालिकान् विद्युः। यानं रथादि ईरणं प्रेरणं खरं मरुत्ख्रमिवोष्ट्रखरादीनामारोहणे तावत्कालमनध्यायः। एवं वृक्षारो-
हणादिनोक्तं केत्यस्माद्धस्त्यसप्तत्रिंशदनध्यायात् तावत्कालिकान् विद्युः। अध्ययनविधिज्ञाः विद्युरित्यनेन स्म-
त्यंतरोक्तान् अन्यानपि संगृह्णाति॥ यथाह मनुः॥ शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकां॥ नाधीयीता-
मिषं जग्ध्वा सूतकान्नाद्यमेव चेति॥ ३७॥ एवमनध्यायान् उक्त्वा प्रकृतानि स्नातकव्रतान्याह॥ देवर्त्विक्स्नातका-
चार्यराज्ञां छायां परस्त्रियाः। नाक्रमेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनानि च। देवानां ऋत्विक्स्नातकाचार्यराज्ञां
परस्त्रियाश्च छायां नाक्रामेत्। नाधितिष्ठेन्न लंघयेदिति च बुद्धिपूर्वकं। यथाह मनुः॥ देवतानां गुरो राज्ञः स्ना-
तकाचार्ययोरपि। नाक्रामेत्कामतश्छायां बभ्रुणो दीक्षितस्य चेति॥ बभ्रुणो नकुलवर्णस्य यस्य कस्यचित्तद्ग-
रत्यस्य वा सोमादेर्बभ्रुणः इति नपुंसके निर्देशात्। रक्तादीनि च नाधितिष्ठेत्। आदिग्रहणात् स्नानोदकादेर्ग्र-
हणं उद्वर्तनमपस्नानं विण्मूत्रे रक्तमेव च। श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत्तु कामतः इति॥ ३८॥ विप्राहिक्ष-
त्रियात्मानो नावज्ञेयाः कदाचन॥ आमृत्योः श्रियमाकांक्षेन्न कंचिन्मर्मणि स्पृशेत्। विप्रो बहुश्रुतो ब्राह्मणो
अहिः सर्पः क्षत्रियो नृपतिरेते कदाचिदपि नावमंतव्याः॥ आत्मा च स्वकीयो नावमंतव्यः॥ आमृत्योर्यावज्जीवं श्रि-
यमिच्छेत् न कंचिन्मर्मणि स्पृशेत्। कस्यचिदपि मर्मदुश्चरितं न प्रकाशयेत्॥ ३९॥ दूरादुच्छिष्टविण्मूत्रपादां-
भांसि समुत्सृजेत्। श्रुतिस्मृत्युदितं सम्यक् नित्यमाचारमाचरेत्। भोजनादुच्छिष्टविण्मूत्रे पादप्रक्षालनो- २९
दकं च गृहात् दूरात्समुत्सृजेत्। श्रौतं स्मार्तं चाचारं नित्यं सम्यगनुतिष्ठेत्॥ ४०॥ गोब्राह्मणानलान्नानि नोच्छिष्टो

न पदा स्पृशेत्। न निंदाताडने कुर्यात् पुत्रं शिष्यं च ताडयेत्॥ गोब्राह्मणं अनलं वह्निं अन्नं अदनीयं विशेषतः। पदा अशु-
चिर्न स्पृशेत्। पादेन तु अनुच्छिष्टोपि। यदाह मनुः॥ प्रमादात्तु स्पृशति तदा आचमनोत्तरकालं स्पृष्ट्वा नानशुचिर्नित्यमद्भिः
प प्राणादीन् स्पृशेत्। गात्राणि चैव सर्वाणि नाभिं पाणितलेन तु इत्येवं प्राणादीन् उपस्पृशेत्। कस्यचिदपि निंदाताडने न कुर्यात्।
एतच्चानपकारिणि॥ अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगंगतः। दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नर इति॥ पुत्र-
शिष्यार्थमेव ताडयेन्न च कारादिनापि ताडनं च रज्ज्वादिना तत्र मांगव्यतिरेकेण कार्यं। शिष्यशिष्टिरवधेनाशक्तौ
रज्जुवेणुविदलाभ्यां तनुभ्यां अन्येन घ्नन् राज्ञा शास्य इति गौतमवचनात्। पृष्ठतस्तु शरीरस्य नोत्तमांगेन वक्षसीति
वचनात्॥ ४१॥ कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत्। अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु। कर्मणा कायेन।
यथाशक्ति धर्ममनुतिष्ठेत्॥ तमेव मनसा ध्यायेत्। तमेव वाचा वदेत्। धर्मविहितमपि लोकविद्विष्टं लोकाभिशस्तिज-
ननं मधुपर्के गोवधादिकं नाचरेत्। यस्मादस्वर्ग्यं अग्नीषोमीयवत्स्वर्गसाधनं न भवति॥ ४२॥ मातृपितृतिथिभ्रातृजा-
मिसंबंधिमातुलैः। वृद्धबालातुराचार्यवैद्यसंश्रितबांधवैः। ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः। विवादं व-
र्जयित्वा तु सर्वाँल्लोकान् जयेद्गृही॥ माता जननी पिता जनकः अतिथिः अध्वनीनः भ्राता सोदरो भिन्नोदरश्च जामयो
वा विद्यमानभर्तृकाः स्त्रियः संबंधिनो वैवाह्याः मातुलो मातृभ्राता वृद्धः समस्थवरवयस्कः बाल आषोडशात् आतुरो रोगी
आचार्यः उपनेता वैद्यो भिषक् आसंश्रितः उपजीवी बांधवाः पितृपक्षा मातृपक्षाश्च मातुलश्वशुरपादानमादरा-
र्थं ऋत्विक् याजकः पुरोहितः शांत्यादेः कर्ता अपत्यं पुत्रादि भार्या सहधर्मचारिणी दासः कर्मकरः सनाभयः सोदराः

आरण्यः इत्युपाधानमजानाति । नगिनीश्चास्यर्थ एतैर्मन्त्रादिभिः सह वाक्कलहं परित्यज्य सर्वान्प्राजापत्यादीन्लोका
न्प्राप्नोति ॥ ॥ पंचपिंडाननुद्धृत्य न स्नायात्परवारिषु । स्नायान्नदीदेवखातह्रदप्रस्रवणेषु च । परवारिषु परसंबं
धिषु च सर्वसत्वोद्देशेनापरित्यक्तेषु तडागादिषु पंचपिंडाननुद्धृत्य न स्नायात् । अनेनस्य शास्त्रतु ज्ञातेषु पिंडोद्धर
णमंतरेणापि स्नानमन्यत्तु ज्ञातं । नद्यादिषु कथं तदित्याह ॥ स्नायान्नदीति साक्षात्परंपरया वा समुद्रगाः अवंत्यो न
द्यः । देवखातं देवनिर्मितं पुष्करादि ह्रदः कप्रवाहाभिखातः सजलो महान्निम्नदेशो ह्रदः । पर्वतादेः प्रदेशा
त्प्रक्षरतुदकं प्रस्रवणं एतेषु पंचपिंडाननुद्धृत्यैव स्नायात् । एतच्च नित्यस्नानविषयं । सति संभवे नदीषु देवखा
तेषु तडागेषु सरस्सु च स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु चेति नित्यग्रहणात् शौचार्थं तु यथासंभवं परवारिषु पिं
डानुद्धरणेपि सर्वस्य न निषेधः ॥ ॥ परशय्यासनोद्यानगृहयानानि वर्जयेत् । अदत्तान्यग्निहीनस्य नान्नमश्नीयादना
पदि । शय्या कशिपुः । आसनं पीठादि उद्यानं आम्रवणादि गृहं प्रसिद्धं यानं रथादि परसंबंधीन्येतान्यननुज्ञातानि व
र्जयेत् । नोपभुंजीत अन्नोप्यान्नानाह । अग्निहीनस्येति अग्निहीनस्य श्रौतस्मार्ताग्न्यधिकाररहितस्य शूद्रस्य प्रतिलो
मजस्य चाधिकारवतोप्यग्निरहितस्यान्नमनापदि न भुंजीत प्रतिगृह्णीयाच्चेति गौतमवचनात् ॥ ॥ कदर्यबद्धचौ
राणां क्लीबरंगावतारिणां । वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणां । कदर्यो लुब्धः । आत्मानं धर्मकार्याणि पुत्रदारांश्च
पीडयेत् लोभतः । पितरौ च तथा नित्यं स कदर्य इति स्मृतः ॥ इत्युक्तः ॥ बद्धो निगडादिना वाचा सन्निरुद्धश्च चौरो ब्राह्म २५
णसुवर्णव्यतिरिक्तपरस्वापहारी । क्लीबो नपुंसकः । रंगावतारी नटचारणमल्लादि । वेणुच्छेदजीवी वैणुः । अभिश

स्तः पतनीयैः कर्मभिरभियुक्तः । वार्धुष्यो निषिद्धवृद्ध्युपजीवी गणिका पण्यस्त्री । गणदीक्षी बहुयाजकः । इत्येषाम
न्नं नाश्नीयादित्यनुवर्तते ॥ ॥ चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषां । क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजिनां । चि
कित्सको भिषक् वृत्त्युपजीवी आतुरो महारोगोपसृष्टः वातव्याध्यश्मरीकुष्ठमेहोदरभगंदराः । अर्शांसि ग्रहणी
त्यष्टौ महारोगाः । प्रकीर्तिता इति । क्रुद्धः कुपितः । पुंश्चली व्यभिचारिणी मत्तो मद्यादिना गर्वितः । विद्विट् शत्रुः । क्रूरो ह
दान्यंतरकषायः । वाक्कायव्यापारेणोद्वेजकः उग्रः पतितो ब्रह्महादिः व्रात्यः पतितसावित्रीकः दांभिको दंभः । उच्छिष्ट
भोजी परभुक्तोज्झिताशी एतेषां चिकित्सकादीनामन्नं नाश्नीयात् ॥ ॥ अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनां
शस्त्रविक्रयकर्मारतंतुवायश्ववृत्तिनां । अवीरा स्त्री स्वतंत्रा व्यभिचारमंतरेणापि पतिपुत्ररहिता अन्ये सुवर्णका
रः । सुवर्णस्य विकारांतरकृत् स्त्रीजितः सर्वत्र स्त्रीवशवर्ती ग्रामयाजी ग्रामस्य शांत्यादिकर्ता बहूनां वा उपनेता शस्त्र
विक्रयी शस्त्रविक्रयोपजीवी कर्मारो लोहकारः तक्षादिश्च तंतुवायः सूचीशिल्पोपजीवी श्वभिः । वृत्तिवर्तनं जीवनं
यस्यास्ति श्ववृत्ती एतेषामन्नं नाश्नीयात् ॥ ॥ नृशंसराजरजककृतघ्नवधजीविनां । चैलधावसुराजीवसहोपपति
वेश्मनां । पिशुनानृतिनोश्चैव तथा चाक्रिकबंदिनां । एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा । निर्दयो नृशंसः । राजा
नृपतिस्तस्मात्चर्यात् पुरोहितश्च । यथा शंखः ॥ नीतावगीतरुदितावकृष्टक्षुतपरिक्षुतविस्मितोन्मत्तावक्षुतराज
पुरोहितान्नानि वर्जयेदिति । रजको वस्त्रादीनां नीलादिरागकारकः । कृतघ्नः उपकृतस्य हंता । वधजीवी प्राणिवधे
न वर्त्तकः । चैलधावो वस्त्रनिर्णेजनकृत् सुराजीवो मद्यविक्रयजीवी उपपतिर्जारः सह उपपतिना वेश्म यस्यासौ स

हीयपतिर्वेत्रमायिपिशुनः परदोषस्य ख्यापनः। अनृती मिथ्यावादी। चाक्रिकः तैलिकः। शाकटिकश्चेति। अभिशस्तपतित
वार्द्धिक इति निंदेनाभिधानात्। बंदिनः स्तावकाः। सोमविक्रयी सोमलताया विक्रेता एषामन्नं न भोक्तव्यं सर्वे चैते कद
र्यादयो द्विजा एव कदर्यत्वादिदोषदुष्टा अभोज्यान्नाः। इतरेषां शूद्राणां स्वभावात् प्राप्तिपूर्वकत्वात् प्रतिषेधस्य ॥ छ ॥
अथ हीनस्यान्नमहापद नापदीति अत्र शूद्रस्याभोज्यान्नत्वमुक्तं प्रतिप्रसवमाह। शूद्रेषु दासगोपालकुलमित्रा
र्द्धसीरिणः। भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्। दासा गर्भदासादयः। गोपालो गवां पालनेन यो जीवति। कु
लमित्रं पितृपितामहादिक्रमायातं। अर्द्धसीरी हलपर्यायसीरोपलक्षणं कृषिफलभागहारी नापितः। यश्च वाङ्मनः
कायकर्मभिः। आत्मानं निवेदयति तवाहमिति। एते दासादयः शूद्राणां मध्ये भोज्यान्नाः। आद्यान्ताः चकारात् कुंभ
कारकुलमित्रार्द्धकृषिनिवेदितेनो भोज्यान्ना इति वचनात् ॥ ॥इति स्नातकव्रतप्रकरणं॥ ॥ छ ॥ न स्वाध्याय
विरोध्यर्थमित्यादिना ब्राह्मणस्य स्नातकव्रतानि अभिधायेदानीं द्विजातिधर्मानाह ॥ अनर्चितं वृथामांसं केशकीटस
मन्वितं शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितं। उदक्यास्पृष्टं संघुष्टं पर्यायान्नं च वर्जयेत्। गोघ्रातं शकुनोच्छिष्टं पदा
स्पृष्टं च कामतः। अनर्चितं अर्चार्हाय यत् अवज्ञया दीयते वृथामांसं वक्ष्यमाणप्राणात्ययादिव्यतिरेकेण देवाद्यर्च
नशिष्टं यन्न भवति आत्मार्थमेव साधितं। केशकीटादिभिश्च समन्वितं संयुक्तं शुक्तं यमनम्लं केवलं कालपरिवासे
न द्रव्यांतरसंसर्गात् कालपरिवासाद्वा अम्लीभवति दध्यादिव्यतिरेकेण तत् शुक्तं न पापीयसोन्नमश्नीयान्न दधिपक्वं। २९
शुक्तं न पर्युषितं। अन्यत्र रागषाडवतक्रदधिगुडगोधूमयवपिष्टविकारेभ्य इति शंखस्मरणात्। पर्युषितं रात्र्यंतरितं

पक्वोषितमुच्छिष्टं भुक्तावशिष्टं पतितेक्षितं पतितादिभिरीक्षितं। उदक्या रजस्वला तया स्पृष्टं उदक्याग्रहणं चांडालाद्युपल
म क्षणार्थं। अमेध्यपतितचांडालपुक्कसरजस्वलाकुनखिकुष्ठिसंस्पृष्टान्नं वर्जयेदिति शंखस्मरणात्। कोर्थीत्यर्थी इति यद्वुद्घो
ष्य दीयते तत् संघुष्टान्नं। असंबंधव्यपदेशेन यद्दीयते तत्पर्यायान्नं। यथा ब्राह्मणान्नं ददत् शूद्रः शूद्रान्नं ब्राह्मणो द
दत् उभावेतावभोज्यान्नौ भुक्त्वा चांद्रायणं चरेदिति। पर्याचांतमिति पाठे परिगतमाचांतं गंडूषग्रहणं यस्मिंस्तत् पर्याचांतं
तन्न भोक्तव्यं। एतदुक्तं भवति। गंडूषग्रहणादूर्ध्वमाचमनात्प्राक् न भोक्तव्यं पार्श्वाचांतमिति पाठे एकस्यां पंक्तौ पार्श्वस्थे
आचांते न भोक्तव्यं। भस्मोदकादिविच्छेदं विना वर्जयेदित्येकं संबध्यते। तथा गोघ्रातं गवाघ्रातं शकुनेन काकादि
नाभुक्तं आस्वादितं शकुनोच्छिष्टं पदास्पृष्टं बुद्धिपूर्वं पादेन स्पृष्टं वर्जयेत् ॥ छ ॥ पर्युषितस्यापवादमाह॥ ॥ अन्नं न
पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितं। अस्नेहा अपि गोधूमयवगोरसविक्रियाः। मंडकसक्तुकिलाटकूर्चिकाद्या अस्ने
हा अपि चिरसंस्थिता भोज्याः। यदि विकारांतरमनापन्नाः। अपूपधानाकरंभसक्तुयावकतैलपायसशाकानि शुक्ता
नि वर्जयेदिति वसिष्ठस्मरणात् ॥ छ ॥ संधिन्यनिर्दशावत्सगोपयः परिवर्जयेत्। औष्ट्रमैकशफं स्त्रैणमारण्यकमथा
विकं। या वृषेण संधीयते सा संधिनी चशावत्सा विजानीयात् वृषाक्रांता च संधिनीमिति त्रिकांडस्मरणात्। या चैकां वेला
मतिक्रम्य दुह्यते या च वत्सांतरेण संधीयते सा संधिनी। प्रसूता अनतिक्रांतदशाहा निर्दशा मृतवत्सा अवत्सा संधिनी च
अनिर्दशा च वत्सा तासां गवां पयः क्षीरं परिवर्जयेत्। संधिनीग्रहणं स्यंदनीयमस्वोरुपलक्षणार्थं यथाह गौ
तमः। स्यंदिनीयमसूसंधिनीनां चेति। स्रवत्पयस्तनी स्यंदनी यमसूर्यमप्रसविनी एवमजामहिष्योर्निर्दशायोः पयो वर्जयेत्

गोमहिष्यजानामनिर्दशानामिति वसिष्ठस्मरणात्। पयोग्रहणात्तद्विकाराणामपि दध्यादीनां निषेधः॥ औष्ट्रम
मौष्ट्रं पयोमूत्रादि। एकशफं वडवादयस्तत्संबन्धमेकशफं स्त्रैणं स्त्रीणां। स्त्रीग्रहणमजाव्यतिरिक्तद्विस्तनीनामु
पलक्षणार्थं सर्वासां द्विस्तनीनां क्षीरमभोज्यमजावर्जमिति शंखस्मरणात्। आरण्यकं वा आरण्याः तेषामिदमार
ण्यकं क्षीरं माहिषव्यतिरेकेण आरण्यानां च सर्वेषां मृगाणां महिषीं विनेति वचनात्॥ अवेर्जातमाविकं वर्जयेदि
ति प्रत्येकं संबध्यते औष्ट्रमित्यादि विकारप्रत्ययनिर्देशात् केवलविकारमात्रस्य पयोमूत्रादेः सर्वदा निषेधः। नित्यमा
विकमपेयमौष्ट्रमाविकमैकशफं चेति गौतमस्मरणात्॥ मू॥ देवतार्थं हविः शिग्रुं लोहितान्व्रश्चनांस्तथा। अनुपाकृ
तमांसानि विड्जानि कवकानि च॥ देवतार्थं बल्युपहारनिमित्तं साधितं॥ हविः हवनार्थं प्राक् होमात्। शिग्रुः शोभांजन
लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवान् वृक्षच्छेदजातानलोहितानपि। यथाह मनुः॥ लोहितान्वृक्षनिर्यासा
न्व्रश्चनप्रभवांस्तथा। इति लोहितग्रहणात् हिंगुकर्पूरादीनामनिषेधः॥ अनुपाकृतमांसानि यज्ञे आकृ
तस्य पशोर्मांसानि विड्जानि मलोत्थादि जन्म विड्वीजवृक्षोत्पन्नानि पुरीषस्थाने उत्पन्नानि च तण्डुलीयकप्रभृती
नि च। कवकानि छत्राकाणि वर्जयेदिति प्रत्येकमभिसंबध्यते॥ मू॥ क्रव्यादपक्षिदात्यूहशुकप्रतुदटिट्टिभा
न्। सारसैकशफान्हंसान्सर्वांश्च ग्रामवासिनः। क्रव्यादाः आममांसादनशीलाः पक्षिणो गृध्रादयः। दात्यूह
श्चातकः। शुकः कीरः। चञ्च्वा प्रतुद्य भक्षयन्तीति प्रतुदाः श्येनादयः। टिट्टिभः तन्नामानुकारी। सारसो लक्ष्मणः ३१
अश्वादयः हंसाः प्रसिद्धाः ग्रामवासिनः पारापतप्रभृतयः एतान् क्रव्यादादीन् वर्जयेत्॥ मू॥ कोयष्टिप्लवच

क्राह्वबलाकाबकविष्किरान्। वृथाकृसरसंयावपायसापूपशष्कुलीः। कोयष्टिः --- प्लवः जलकुक्कुटः। चक्राह्व
श्चक्रवाकः। बलाकाबकौ प्रसिद्धौ। नखैर्विकीर्य भक्षयन्तीति विष्किराश्चकोरादयः एवमुक्ते लावकमयूरादीनां भक्ष्य
त्वग्रामकुक्कुटस्य ग्रामवासित्वादेव निषेधः। एतान्कोयष्ट्यादीन्वर्जयेत् वृथा देवाद्युद्देशमन्तरेण साधिताः कृसरसंयाव
पायसापूपशष्कुलीर्वर्जयेत्। कृसरस्तिलमुद्गसिद्ध ओदनः। संयावः क्षीरगुडघृतादिकृतः उत्करिकाख्यः। पायसं पयसा सि
द्धमन्नं। अपूपः अस्नेहपक्वो गोधूमविकारः। स्नेहपक्वो गोधूमविकारः शष्कुली। न पचेदन्नमात्मन इति कृसरादीनां
निषेधे सिद्धे पुनरभिधानं प्रायश्चित्तगौरवार्थं॥ मू॥ कलविङ्कं सकाकोलं कुररं रज्जुदालकं। जालपादान्खंजरीटान्
अज्ञातांश्च मृगद्विजान्। कलविङ्को ग्रामचटकः। ग्रामवासित्वेन प्रतिषेधे सत्यरण्यचरत्वात्पुनर्वचनं॥ काकोलो द्रोण
काकः। कुररः क्रौञ्चः। रज्जुदालको वृक्षकुक्कुटः। जालपादा जालकारपादाः अजालपादा अपि हंसाः संनीतिरूप
क्वचनं हंसानां। खञ्जरीटाः खञ्जनाः। जातितोऽज्ञाता मृगपक्षिणश्च एतान्कलविङ्कादीन्वर्जयेत्॥ मू॥ चाषांश्च
रक्तपादांश्च सौनं वल्लूरमेव च। मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्। किकिदीवयः रक्तपादाः कादम्बकप्र
भृतयः। सौनं घातस्थाने नवमांसं प्राणिनामपि। वल्लूरं शुष्कमांसमस्वामीनाः। एते चाषादीन्वर्जयेत् चकारान्ना
लिकाशणकुम्भककसुनालाबुविड्वरान्। कुम्भीतककुद्दालकाकोविदारांश्च वर्जयेत्॥ तथा कालकृतानि पुष्पाणि
च फलानि च। विकारवृक्षादि यत्किंचित्प्रयत्नेन वर्जयेत्। तथा वटप्लक्षाश्वत्थकपित्थानि पमातुलिङ्गफलानि वर्जयेत् इ
ति स्मरणात्। एतान् संधिनीक्षीरप्रभृतीन् अनुक्तांतान् कामतोऽभ्यस्य त्रिरात्रमुपवसेत्। अकामतस्त्वहोरात्रं शेषे

शूपवसोदहरितिमनुस्मरणात्। यत्तुनःशेशेनोक्तंबकबलाकाहंसचक्रवाककारंडवरुटहचरककपोतपाराप
तपांडुक्षुकसारिकासारसटिटिभोलूककंककरक्रपादचारखनासवायसकोकिलशार्ङ्गलिकुकुटहारीतखंजलोक्ष
द्वादशरात्रमनाहारपिबेत्गोमूत्रयावकमितितदकृतकालाभ्यासेमतिपूर्वेसमस्तभक्षणेचेदितव्यं॥ छ॥ पलांडुंविड्वरा
हंचछत्राकंग्रामकुक्कुटं। लशुनंगृंजनंचैवजग्ध्वाचांद्रायणंचरेत्। पलांडुःस्वल्पकंदनालोलशुनाकारी॥ विड्वराहो
ग्रामसूकरः छत्राकंसर्पछत्रं। ग्रामकुक्कुटःप्रसिद्धः। लशुनंश्वेतकंदनादं। गृंजनंलशुनाकारिलोहित
स्थूलकंदं। एतान्षट्सकृत्कामतोजग्ध्वानद्धुत्थित्वाचांद्रायणंवक्ष्यमाणलक्षणंचरेत्। ग्रामकुक्कुटछत्राकयोः
पूर्वप्रतिषिद्धयोरिहाभिधानंपलांड्वादिसमानप्रायश्चित्तार्थंमतिपूर्वंचिरतरात्प्यासेनुवात्रकंविड्वराहंचलशुन
ग्रामकुक्कुटं। पलांडुंगृंजनंचैवमत्याजग्ध्वापतेत्द्विजइतिमनूक्तं। अमतिपूर्वाभ्यासे॥ अमत्यैतानिषट्जग्ध्वा
कृच्छ्रंसांतपनंचरेत्। यतिचांद्रायणंवापीतिदृष्टव्यं। अमतिपूर्वाभ्यासेतुप्रागुक्तंलशुनपलांडुगृंजनविड्वरा व
हग्रामकुक्कुटकंनीतकन्देलादादशरात्रंपयःपिबेदिति॥ छ॥ भक्ष्याःपंचनखाःसेधागोधाकच्छपशल्यकाः। श
शश्चमत्स्येष्वपिहिसिंहतुंडकरोहिताः। तथापाठीनराजीवौसशल्काश्चद्विजातिभिः। सेधाश्वावित्गोधाकृकलाशा
नुकारिणीमहतीकच्छपःकूर्मःशल्लकःशल्लीशशःप्रसिद्धः। पंचनखानांमार्जारवानरादीनांमध्येसेधादयोभक्ष्याःप्र
कारात्खड्गोपियथाहगौतमः। पंचनखाःशल्लकश्वावित्गोधाखड्गकच्छपइतिमनुरपि॥ श्वाविधंशल्यकंगोधा ३२
खड्गकूर्मशशांस्तथा। भक्ष्यान्पंचनखेष्वाहुरनुष्ट्रांश्चैकतोदतइति। यत्तुनर्वसिष्ठेनखड्गेषुविवदंतइत्युक्त

मुक्तं। तच्छ्राद्धादन्यत्रखड्गमांसैर्निवेदनमक्षय्यंपितृकर्मणीतिश्राद्धेफलप्रकृतिदर्शनात्। तथामत्स्यानांमध्येसिंह
तुंडादयोभक्ष्याः। सिंहतुंडःसिंहमुखः। रोहितोरोहितवर्णः। पाठीनःचंद्रकाख्यः। राजीवःपद्मवर्णः। सहशल्कैर्याशुक्ला
कारैःवर्त्ततइतिसशल्काः। एतेचसिंहतुंडादयोनियुक्तस्यैवभक्ष्याः। पाठीनरोहितावाद्यौनियुक्तौहव्यकव्ययोः। राजीवा
सिंहतुंडाश्चसशल्काश्चैवसर्वशः॥ इतिमनुस्मरणात्॥ द्विजातिग्रहणंशूद्रव्युदासार्थं॥ छ॥ अनर्चितंवृथामांसमि
त्यास्यद्विजातिधर्मानुक्तोदानीचातुर्वर्ण्यप्रसाद॥ अतःशृणुध्वंमांसस्यविधिंभक्षणवर्जने। मांसस्यप्रोक्षितादेर्भक्षणेन
व्यतिरिक्तस्यप्रतिषिद्धस्यचवर्जनेप्रोक्षितादिव्यतिरेकेणमांसंभक्षयामीत्येवंसंकल्परूपविधिंसामस्त्येनवःअनन्त
योर्हमुनयःशृणुध्वं॥ छ॥ तत्रभक्षणेविधिरत्रोच्यते। प्राणात्ययेतथाश्राद्धेप्रोक्षितंद्विजकाम्यया। देवान्पितॄन्समभ्य
र्च्यखादन्मांसंनदोषभाक्॥ अन्नाभावेतथाव्याध्यभिभवेनवामांसभक्षणमंतरेणप्राणबाधोभवति। तदानियमेन
मांसंभक्षयेत्। सर्वतएवात्मानंगोपायेदित्यात्मरक्षणविधानात्। तस्मादुद्रत्पुरायुषःस्वःकामीप्रेयादितिमरणनि
षेधाच्च। तथाश्राद्धेनिमंत्रितोमांसंनियमेनभक्षयेत्। अभक्षणेदोषश्रवणात्। यथाविधिनियुक्तस्तुयोमांसंनात्ति।
मानवः। सप्रेत्यपशुतांयातिसंभवानेकविंशतिमनुस्मरणात्। प्रोक्षणाख्यःश्रौतसंस्कारस्तत्संस्कृतस्यपशोर्यागा
र्थस्याग्नीषोमीयादेर्हुतावशिष्टमांसंप्रोक्षितंतद्भक्षयेत्। अभक्षणेयागानिष्पत्तेः। द्विजकाम्ययाब्राह्मणभोजनार्थंदे
वपित्र्यर्थंचियन्नाधितंतेनतान्यभ्यर्च्य। वशिष्टंभक्षयेन्नदोषभाक्भवति। एवंभत्स्यभरणावसिष्टमपि। यज्ञार्थंब्रा।

ह्मणे। वैश्याच्छूद्रस्याप्यगम्यस्त्रियः। गत्यागमंचैवहत्यर्थं अगम्योत्याचरन् शूद्रा इति मनुस्मरणात्। न दोषस्तामिति दोषान्ना
वमात्रं वदता अतिथ्याद्यर्चनावशिष्टस्यान्यभक्षणमात्रं न श्रोत्रियादिवन्नियम इति दर्शितं एवमप्रतिषिद्धानामपि श्राद्धा
नां प्राणात्ययादिव्यतिरेकेण भक्षणं त्याज्यं गमात् श्रुतस्यापि मांसं प्रतिविधिनिषेधाधिकारो गम्यते॥ ७॥ इदानीं श्रोत्रिया
दव्यतिरिक्तस्य हथा मांसमित्यनेन प्रतिषिद्धभक्षणे निंदार्थवादमाह। वसेत्स नरके घोरे दिनानि पशुरोमभिः। संमिता
नि दुराचारो यो हंत्यविधिना पशून्। अविधिना देवाद्युद्देशमंतरेण यः पशून्हंति स तस्य पशोर्यावंति रोमाणि तावंति दि
नानि घोरतरके वसेत्। हंतीत्युपलक्षणं विधेपि घातको गृह्यते। यथाह मनुः। अनुमंता विशसिता निहंता क्रयविक्रयी। संस्क
र्त्ता चोपहर्त्ता च खादकश्चेति घातकाः॥ ७॥ इदानीं वर्जने विधिमाह॥ सर्वान्कामानवाप्नोति हयमेधफलं तथा। गृहेपि नि
वसन्विप्रो मुनिर्मांसविवर्जनात्। यः श्रोत्रियादिव्यतिरेकेण मया मांसं न भक्षयितव्यमिति सत्यसंकल्पोऽनवतिस
सर्वान्कामानवाप्नोति निर्विघ्नं प्राप्नोति विप्रग्रहणाद्यत्वात् यथाह यद्ध्यायति यत्कुरुते रतिं बध्नाति यत्र च। तदवाप्नोत्ययत्नेन ते
यो हिनस्ति न किंचनेति। एतच्चातुर्थिकफलमुख्यं फलमाह। हयमेधफलं तथेति। एतच्च सांवत्सरिकसंकल्पस्य। वर्षे
वर्षेऽश्वमेधेन यो यजेत शतं समाः। मांसानि च न खादेद्यस्तयोः पुण्यफलं समं इति मनुस्मरणात्। तथा गृहेपि वस
न्पि ब्राह्मणादिश्चातुर्वर्णिको मुनिवन्मानतीयो भवति मांसत्यागात्। एतच्च न प्रतिषिद्धमांसविषयं। नापि श्रोत्रियादिवि २२
षयं परियोषाद तिथ्याद्यर्चनशिष्टास्यनुज्ञातविषयं इति॥ ॥इति भक्ष्यप्रकरणं॥ ॥७॥ ॥इति

दानीं द्रव्यशुद्धिमाह॥ सौवर्णराजताब्जानामूर्ध्वपात्रग्रहाश्मनां। शाकरज्जुमूलफलवासोविदलचर्मणां। पात्राणां च
चमसानां च वारिणा शुद्धिरिष्यते। सौवर्णं सुवर्णकृतं॥ राजतं रजतकृतं अब्जं मुक्ताफलशंखशुक्त्यादि। ऊर्ध्वपात्रं यज्ञि
यो लूखलादि ग्रहादिसोमचर्यां ग्रहाः॥ षाडशिप्रभृतयः अश्मा हषदादि शाकं वास्तुकादि रज्जुर्बल्वजादिनिर्मिता
मूलमार्द्रकादि फलमाम्रादि वासो विदलं वेणुवादि चर्म अजादीनां॥ विदलचर्मणोर्ग्रहणं तद्विकाराणां छत्रवरत्रादि
नामुपलक्षणार्थं पात्राणि प्रोक्षणीपात्रप्रभृतीनि चमसा होतृचमसादयः॥ एतेषां सौवर्णादीनां लेपरहितानामुच्छि
ष्टस्पर्शनादौ वारिणा प्रक्षालनेन शुद्धिः॥ ७॥ चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेन वारिणा। चरुः स्थाली। स्रुक्स्रु
वौ प्रसिद्धौ। सस्नेहानि पात्राणि प्राशित्रहरणादीनि एतानि चलेपरहितानि उष्णेन वारिणा शुध्यंति निर्लेपं कांचनेनो
ऽद्भिरेव विशुध्यति॥ अब्जमश्ममयं चैव राजतं चानुपस्कृतमिति मनुस्मरणात्। अनुपस्कृतमरवातखुरितसंलेपा
नां तैजसानां मणीनां च सर्वस्याश्ममयस्य च भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः। इति मनुनोक्तं हष्टव्यम्
द्भस्मनोरेककार्यत्वाद्विकल्पः। आयसस्य समुच्चीयंते। काकादिमुखोपघाते तु भस्म शकुनिमुखावस्पृष्टं निर्लिखेत्
श्वापदमुखावमृष्टं पात्रं न प्रयुंजीतेति हष्टव्यं। एतच्च मार्जारादन्यत्र मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिरिति मनु
स्मरणात्॥ ७॥ स्फ्यशूर्पाजिनधान्यानां मुसलोलूखलानसां। स्फ्यो वज्रः यज्ञांगं अनः शाकटं शेषं प्रसिद्धं। एतेषामुष्णे
न वारिणा शुद्धिः। पुनरजिनग्रहणं यज्ञांगाजिनप्राप्त्यर्थं॥ ७॥ प्रोक्षणं संहतानां च बहूनां धान्यवाससां। संहता नामुक्तं
शुद्धिश्चार्थ अवयविनां बहूनां वाससां वसो ग्रहणमुक्तशुद्धीनामुपलक्षणार्थं। उक्तशुद्धीनां धान्यवासःप्रभृतीनां च

ष्ट्रानां राशीकृतानि तत्र चांडालादिस्पृष्टानि अल्पानि वस्तूनि चास्पृष्टानामुक्तैव शुद्धिरितरेषां प्रोक्षणमिति तथा च प-
रस्त्यंतरं। वस्त्रधान्यराशीनामेकदेशस्य दूषणे। तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हतीति। यदा पुनः स्पृष्टानां बहु-
त्वमस्पृष्टानां चाल्पत्वं। तदा सर्वेषामेव क्षालनं। यथाह मनुः। अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससां। प्रक्षा-
लनेन त्वल्पानामद्भिः शौचं विधीयते। इति स्पृष्टानामस्पृष्टानां समत्वे प्रोक्षणमेव बहूनां प्रोक्षणविधानेनाल्पाना-
क्षालनेन शुद्धिः। पुनरल्पानां क्षालनवचनस्य समेपि क्षालननिवृत्त्यर्थत्वात्। इयत्स्पृष्टमियदस्पृष्टमित्यविवे-
केपि क्षालनमेव पाक्षिकस्यापि दोषपरिहर्तव्यत्वात्। अनेकपुरुषोद्धार्यमाणानां तु धान्यवासप्रभृतीनां स्पृष्टानां
च प्रोक्षणमेवेति निबंधस्ततः॥ छ॥ निर्लेपानां स्पर्शमात्रदुष्टानां शुद्धिमुक्त्वेदानीं सलेपानां शुद्धिमाह। तक्षणं दारु-
शृंगास्थ्नां गोवालैः फलसंभुवां। मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि। दारूणामेव महिषादिशृंगाणां करिवराहा-
द्यस्थ्नां। अस्थिग्रहणाद्दंतजानामपि ग्रहणं उच्छिष्टस्नेहादिलिप्तानां मद्यस्नोदकादिभिरनपगतलेपानां यावन्नापैत्य-
मेध्याक्तात् गंधलेपश्च तत्कृतः। तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिष्विति। सामान्यशुद्धिविधानात्। तक्षणं ताव-
न्मात्राणां गोवालैरुद्घर्षणान्न शुद्धिः। यज्ञपात्राणां स्रुक्स्रुवादीनां यज्ञकर्मणि प्रयुज्यमानानां दक्षिणेन हस्तेन दर्भैर्द-
शापवित्रेण वा यथाशास्त्रं कर्मांगतया मार्जनं कर्तव्यं। एतच्च श्रौतमुदाहरणं। अन्येषामपि सुवर्णादीनां पात्राणां स्मा-
र्त्तलौकिककर्मसु कृतशौचानामेवांगित्वमिति दर्शयितुं यज्ञांगानां पुनः कृतशौचाभिदं दशापवित्रादिमार्जनं संस्का- ३४
रार्थमिति विशेषः॥ छ॥ इदानीं सलेपानामेव केषांचिच्छ्रेपायकर्षणे विशेषदेत्तनाह। सोषैरुदकगोमूत्रैः। शुध्यत्याविक-

कौशिकं। सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथा। ऊषारमृत्तिकासहितेन गोमूत्रेणोदकेन वा लेपापेक्षया आविकं
ऊर्णामयं कौशिकं कोशप्रभवं। टसरीयादि प्रक्षालितं शुध्यति। उदकगोमूत्रैरिति बहुवचनं पश्चादपुदकप्राप्त्यर्थं
अंशुपट्टं वल्कलतंतुकृतं सश्रीफलैः बिल्वफलसहितैः। कुतपं पर्वतीयछागरोमनिर्मितः कंबलः। अरिष्टफलस-
हितैः फलेनकसहितैरुदकगोमूत्रैः शुध्यतीत्यनुवर्त्तते एतच्चोच्छिष्टस्नेहादियोगे सति वेदितव्यं। अत्योपघाते तु प्रो-
क्षणादिक्षालनासहत्वात्। सर्वत्र द्रव्याविनाशेन शुद्धेरिष्टत्वात्। तथा च देवलः। और्णकौशेयकुतपपट्टक्षौमाः शौचा भवं-
त्येते शोषणप्रोक्षणादिभिरित्यभिधायाह। तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः। धान्यकल्कैस्तु फलकैः रसैः क्षा-
रानुगैरपीति क्षौमवद्देवशाणस्य समानयोनित्वात्। और्णादिग्रहणं तदारब्धतूलिकादिप्राप्त्यर्थं अतः तस्याल्पोपघाते ने-
व क्षालनं कार्यं अमेध्यलेपादन्यत्र तूलिकामुपधानं पुष्परक्तं वरं तथा शोषयित्वातपे किंचित्करैः सन्मार्जयेन्मुहुः।
पश्चाच्च वारिणा प्रोक्ष्य विनियुंजीत कर्मणि। तान्यप्यतिमलिष्टानि यथावत्परिशोधयेदिति देवलस्मरणात्। पुष्परक्ता-
नि कुंकुमकुसुंभादिरक्तानि पुष्परक्त। ग्रहणं अन्यस्यापि हरिद्रादिरक्तस्य क्षालनासहस्य प्राप्त्यर्थं न मांजिष्ठादेः तस्य
क्षालनसहत्वात्तशारवनापुक्तं। रागद्रव्याणि प्रोक्षितानि शुचीनीति। सगौरसर्षपैः क्षौमं पुनः पाकान्महीमयं गौरसर्ष-
पसहितैरुदकगोमूत्रैः क्षौमं तु मात्र अतसीतंतुनिर्मितं क्षौमं शुध्यति पुनः पाकेन च मृन्मयं घटादि एतच्चोच्छिष्टस्ने-
हलिप्ते वेदितव्यं। चंडालाद्युपघाते तु त्याग एव यथाह पराशरः। चंडालाद्यैस्तु संस्पृष्टं धान्यवस्त्रमथापि वा। प्रक्षालनेन
शुद्ध्येत परित्यागान्महीमयमिति॥ छ॥ कारुहस्तः शुचिः पण्यं भैक्ष्यं योषिन्मुखं तथा। कारवो रजकादयः। उधावकरूप

कारवाद्यास्तेषां सदा हस्तः शुचिः शुचित्वं च तस्याभ्येकर्मणि वस्त्रधावनादौ सूतकादिसंभवेनापि। तथा च स्मृत्यंतरे। कारवः
शिल्पिनो वैद्या दासीदासास्तथैव च। राजानो राजभृत्याश्च सद्यःशौचाः प्रकीर्तिता इति। पण्यं पणार्हं विक्रेयं यद्व्रीह्यादि।
अनेककर्तृजनकरपरिगृहीतमप्यपवित्रं न भवति। सूतकादिनिमित्तेन च वणिजां निषिद्धानां समूहे नैव दोषस्तद्वद्ब्रह्मचार्यादिगृ
हं अनाचांतस्त्रीप्रदानाच्छुचि रथ्याक्रमणादिना यन्न दुष्यति। तथा योषिन्मुखं संभोगकाले शुचि स्त्रियश्च रतिसंसर्गे इ
ति स्मरणात्॥ ॥ इदानीं भूशुद्धिमाह॥ भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा। सेकादुल्लेखनाल्लेपाद्गृहं मार्जन
लेपनात्। मार्जन्या पांसुतृणादीनां प्रोत्सारणं मार्जनं। दाहः तृणकाष्ठादेः। कालो यावता कालेन लेपादिद्रव्यो न वर्तितावा
न्। गोक्रमणं गवां पादपरिग्रहणं। सेकः क्षीरगोमूत्रगोमयवारिभिः प्रवर्षणं वा। उल्लेखनं तक्षणं खननं तक्षणं खननं वा।
लेपो गोमयादिभिः। एतैः समस्तैर्वा मार्जनादिभिः अमेध्याद्युपहता मलिना च भूमिः शुध्यतीति। तथा देवलः। यत्र प्रसूयते ना
री म्रियते यत्र वा। चंडालाध्युषितं यत्र विष्ठादिसंगतिः। एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्तिता। श्वसूकरखरोष्ट्रादिसंस्
पृष्टा दुष्टतां व्रजेत्। अंगारतुषकेशादि तस्माद्भूर्मलिना भवेत्। अमेध्या दुष्टा मलिनेति त्रिधोध्यन्तमेवसैव विध्यमस्तिय शुद्धि
विभागं दर्शयति स्पृष्टा दुष्टतां व्रजेत्। अंगारतुषकेशादि तस्माद्भूर्मलिना भवेत्। अमेध्या दुष्टा मलिनेति त्रिधा। पंचधा वा च
तुर्धा वा भूरमेध्या विशुध्यति। दुष्टा त्रिधा द्विधा चैव शुध्यते मलिनैकधेति। यत्र मनुष्या दह्यंते यत्र चांडालैरध्युषितं तयोः
पंचभिर्दहनकालगोक्रमसेकोल्लेखनैः शुद्धिः। यत्र मनुष्या जायंते यत्र च म्रियंते यत्र चात्यंतं विष्ठादिसंगतिस्तासां दाह ३५
वर्जितैस्तैरेव चतुर्भिः। श्वसूकरखरैः स्थिरकालमध्युषिताया गोक्रमणसेकोल्लेखनैस्त्रिभिः। उष्ट्रग्रामकुक्कुटादिभिः स्थि

रकालमधिवासितायाः सेकोल्लेखनाभ्यां शुद्धिः। अंगारतुषादिभिः स्थिरकालमधिवासितायास्तूल्लेखनेन शुद्धिः। मार्जनाल्ले
लेपनेन सर्वत्र समुच्चीयत एव। गृहं मार्जनाल्लेपनाच्छुध्यतीति गृहस्य पृथगुपादानं संमार्जनलेपनयोः प्रतिदिवसप्रा
प्त्यर्थं। गोघ्रातेन्ने तथा केशमक्षिकाकीटदूषिते। सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये। गोघ्राते गोजिघ्रासोपहते
न्नेऽदनीयमात्रे तथा केशकीटमक्षिकादिदूषिते केशग्रहणं लोमादिप्राप्त्यर्थं। कीटाः पिपीलिकादयः। उदकं भस्म मृद्वा
पि यथासंभवं प्रक्षेप्तव्यं शुध्यर्थं। यत्तु गौतमेनोक्तं नित्यमभोज्यं केशकीटावपन्नमिति तत्कीटकेशादिभिः सह यत्प
क्वं तद्विषयं। त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः। भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य च। त्रपुप्रभृतीनां
प्रसिद्धानि तेषां क्षारोदकेनाम्लोदकेन वारिणा चोपघातापेक्षया समस्तैर्व्यस्तैर्वा शुद्धिः कार्या। कांस्यलोहानां भस्मो
दकेन ताम्रग्रहणादीति पित्तलजस्तटादयोर्ग्रहणं एकयोनित्वात्। एतच्च ताम्रादीनामम्लोदकादिभिः शुध्यभिधानं
न नियमार्थं मलसंयोगजं तज्जं यस्य येन प्रणश्यते। तत्तस्य तद्बोधनं प्रोक्तं सामान्यं द्रव्यशुद्धिकृदित्यविशेषेण
स्मरणात्। अतो न ताम्रादेरुच्छिष्टोदकादिलेपस्यान्येनापगमसंभवे नियमेनाम्लादिभिः शुद्धिः कार्या। अत एव म
नुना सामान्येनोक्तं। ताम्रायस्कांस्यरौप्याणां त्रपुणः सीसकस्य च। शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिरिति
भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यतीति तत्कांस्यं ताम्रमम्लेन शुध्यतीति तत्ताम्रादेः शौचस्य पराकाष्ठाप्रतिपादयितुं
नान्यनिषेधाय यदा तूपघातातिशयस्तदाम्लोदकादीनामावृत्तिः। गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि तु। शु
ध्यंति दशभिः क्षारैः श्वकाकोपहतानि च इति स्मरणात्। शुद्धिः प्लावो द्रवस्येति द्रवस्य घृतादेः प्रस्थप्रमाणाधिक

स्पृष्टकाकाद्युपहतस्यामेध्यसंसृष्टद्रव्यस्य च प्लावः। प्लावनं। समानजातीयेन द्रवद्रव्येणास्यातिपूरणं।
यावन्निःसरणं शुद्धिरित्यनुवर्तते। ततोऽल्पस्य त्यागः। बहुत्वाल्पत्वं च देशकालाद्यपेक्षयापि वेदितव्यं। यथाह बौधा-
यनः। देशकालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं। उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्। इति कीटाद्युपहतस्य-
त्यजनं। यथाह मनुः। द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतं। इति त्यजनं चात्र वस्त्रान्तरिते पात्रे प्रक्षेपः। अन्यथा
कीटाद्युपगमस्यासंभवात्। शूद्रोच्छिष्टस्य मधुरकादेः पात्रान्तरानयनाच्छुद्धिः। मधूदके पयस्तद्विकाराश्च
पात्रात्पात्रान्तरानयने शुद्धा इति बौधायनस्मरणात्। मधुनादेर्हीनवर्णाद्धस्तात्प्राप्तस्य पात्रान्तरानयनं युक्तं। पु-
नः पचनं च कार्यं यथाह शंखः॥ अन्यत्र हार्याणां हृतेनाभिघारितानां पुनः पचनमेव। भक्ष्याणां स्नेहवत्साना-
न मिति एवं सौवर्णराजतादीनां ऐंद्रियकरणप्रतिपादितानां सर्वेषां तद्विशिष्टस्नेहाद्युपघाते यथा तेषु शुद्धिमुक्त्वा इदानीं तेष- २
मेव मेध्योपहतानां शुद्धिमाह॥ छ॥ अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गन्धापकर्षणात्। अमेध्याः शरीरजाः मलाः व-
साः शुक्रादयः। वसा शुक्रमसृङ्मज्जा मूत्रं विट् कर्णवि— श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः। तथा मा-
नुषास्थि शवं विष्ठा रेतो मूत्रार्तवं वसा स्वेदाश्रु दूषिका श्लेष्म अमेध्यमुच्यते। इति मनुदेवलादिप्रतिपादिताः। तैर्व-
सादिभिरक्तं लिप्तममेध्याक्तं तस्य मृदा तोयेन च शुद्धिः कर्तव्या। गंधापकर्षणेन गंधग्रहणेन लेपस्यापि ग्रहणं ३६
॥ यथाह गौतमः। लेपापकर्षणं कार्यं अशक्ताववन्येन तद्भिः पूर्वं मृदा चेति गौतमस्मरणात्। वसादिग्रहणं च स-
र्वेषाममेध्यत्वप्रतिपादयितुं। न समनोपघातायामद्यैर्मूत्रपुरीषश्लेष्मपूयाम्लशोणितैः संसृष्टे नैव शुध्यत्पुनः

पकेतमन्नमयमिति तत्त्याद्यात्तविशेषाभिधानात्। अमेध्यत्वं चैषां देहाच्चैव मलाश्च्युता इति वचनात्। देहच्युतानां
मेव न स्वस्थानावस्थितानां। पुरुषस्य नाभेरूर्ध्वं करव्यतिरिक्तांगानामन्यामेध्यस्पर्शे स्नानं॥ यथाह देवलः॥ म-
नुषास्थि वसां विष्ठामार्तवं मूत्ररेतसी। मज्जानां शोणितं स्पृष्ट्वा परस्य स्नानमाचरेत्। तान्येव स्वानि संस्पृश्य प्रक्षा-
ल्याचम्य शुध्यतीति॥ तथा॥ ऊर्ध्वं नाभेर्येषु करौ मुक्त्वा यदंगमुपहन्यते तत्र स्नानमधस्तात्तु प्रक्षाल्याचम्य शुध्यती-
ति॥ छ॥ वाक्शस्तमंबुनिर्णिक्तमज्ञातं च सदा शुचि। उक्तेष्विव यथोक्ते शौचे मनसोपरितोषाद्यत्र शुद्धिसंदेहो।
न व चित वाक्यशस्तं शुद्धमेतदस्त्विति ब्राह्मणवचनेन शुद्धं भवतीत्यर्थः। अंबुनिर्णिक्तं यत्र प्रतिपादोक्ता शुद्धि-
र्नास्ति तस्य प्रक्षालनेन शुद्धिः। प्रक्षालनासहस्य प्रोक्षणेन। अज्ञातं च सदा यत्काकाद्युपहतमुपयुक्तं न
कदाचिदपि ज्ञायते तत्सुचितं उपयोगादृष्टदोषो नास्तीत्यर्थः। न त्वेतच्छिरुध्यते। संवत्सरस्यैकमपि चरेत्
कृच्छ्रं द्विजोत्तमः अज्ञातभुक्तशुद्ध्यर्थं — स्येतु विशेषतः। इत्यदृष्टदोषेऽपि प्रायश्चित्तप्रतिपादनात्। नैतत्
प्रायश्चित्तस्याजघ्निविषयत्वात्। दोषाभावस्य चोपयोगविषयत्वात्॥ छ॥ शुचिगोतृप्तिकृत्तोयं प्रकृति-
स्थं महीगतं। तथा मांसं श्वचांडालक्रव्यादादिनिपातितं। महीगतं भूमिस्थमुद्धृतं एकगोविषयतिजननसम-
र्थं चांडालादिभिरसंस्पृष्टं प्रकृतिस्थं रूपरसगंधस्पर्शान्तरमप्राप्तं शुचि। आचमनादियोग्यं भवतीम-
ति गतमिति अशुद्धिर्भूगतस्याशुचित्वनिषेधार्थं तत्संवलरितोदकस्याशुद्धत्वव्यपस्थापनार्थं उद्धृत-
ता स्थापि शुध्यंति शुद्धैः पात्रैः समुद्धृताः। एकरात्रोषिता आपस्त्याज्याः शुद्धा अपि स्वयमिति देवलवचना

त् तथा चांडालादिकृते तडागादौ न दोषः। अंत्यैरपि कृते कूपे सेतौ वाप्यादिके तथा। तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न
विद्यत इति शातातपस्मरणात्। तथा मांसं चांडालक्रव्यादादिर्निपातितं शुचिः। आदिग्रहणात् लुब्धकसादेरग्रहणं
।निपातितग्रहणं च स्वहतस्य निराकरणार्थं॥ ७॥ रश्मिरग्नीरजः छाया गोरश्वो वसुधानिलः। विप्रुषो मक्षिकास्पर्शे
वत्सः प्रस्नवने शुचिः। रश्मयः सूर्यादेः प्रकाशाद्व्यस्य अग्निः प्रसिद्धः। रजः अजादिसंबंधिव्यतिरेकेण तन्मृत्का
कोष्ट्रखरोलूकस्तकरग्राम्यपक्षिणां। अजाविरेणुसंस्पर्शाद्वायुर्लक्ष्मीश्च हीयत इति दोषस्मरणात्। संमार्जनादि
कार्यं छाया। हस्त्यादेः गोरश्वः वसुधा भूमिः। अनिलो वायुः। विप्रुषः अवश्यायबिंदवः। मुखजानां वक्ष्यमाणत्वा
त्। मक्षिकाश्च। एते चंडालादिस्पृष्टा अपि स्पर्शे शुचयः। वत्सः प्रस्नवने। ऊधोधिगलद्दुग्धाकर्षणे शुचिः प्रवत्सस्य ग्र
हणं बालस्योपलक्षणार्थं। बालैरनुपरिक्रांतं नित्यं मेध्यमिति स्थितिवचनात्॥ ८॥ अजाश्वमुखतो मेध्यं न गोर्न रजा
मलाः। पंथानश्च विशुध्यंति सोमसूर्यांशुमारुतैः॥ अजाश्वयोर्मुखं मेध्यं न गोर्न नरजा मलाः। नरशब्दोऽत्र दे
हमभिधत्ते। तज्जा मला वसादयो मेध्या न भवंति। पंथानो मार्गाश्चांडालादिभिः स्पृष्टा अपि रात्रौ सोमांशुभिर्मारुते
न तु सूर्यांशुभिर्मारुतेन॥ ९॥ मुखजा विप्रुषो मेध्यास्तथाचमनबिंदवः। श्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा ततः
शुचिः। मुखजा नो मुखजाः श्लेषम् विप्रुषो मेध्या नोच्छिष्टं कुर्वंति। अपतिताश्चेदंगे न मुखाद्विप्रुषस्तदोच्छिष्टं कुर्वंति। न ३१
चेदंगे निपतंति। नीति गौतमवचनात्। आचमनतोयबिंदवः। पादौ स्पृशंति तेपि मेध्याः। श्मश्रु चास्यप्रविष्टं उ
च्छिष्टं न करोति। दंतसक्तं चान्नादिकं स्वयमेव च्युतं त्यक्त्वा शुचिर्भवति। अक्षुते रित्यके। ~~च्युते धावेवद्धि धानान्तिग~~

तेच्युते रित्यके। च्युते धावेवद्धि धानान्निगरन्नेव तत्॥ शुचीति निगरणं भुनरनेन त्याज्यं वक्ष्योक्तेन त्यागेन विकल्प्यते॥
गिरन्नेवेत्यत्र चकारः। चर्वणे त्वाचमेन्नित्यमुक्त्वा तांबूलचर्वणं। छेदितलोमकौ स्पृष्टा वासो विपरिधाय चेति। विप्रस्त्वाचमन
निषेधार्थं तांबूलग्रहणं फलाद्युपलक्षणार्थं॥ यथाह शातातपः। तांबूले च फले चैव भुक्तस्नेहावशिष्टके। दंतलग्नस्य सं
स्पर्शे नोच्छिष्टो भवति द्विज इति॥ ७॥ स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्याप्रसर्पणे। वासो विपरिधाने च आचांतः पुनराचमेत्
।द्विराचमेदित्यर्थः। चकाराच्छब्देनाध्ययनारंभाचापत्यान्ते लोक्यादिषु तथा वसिष्ठः। सुप्त्वा भुक्त्वा क्षुत्वा स्नात्वा पीत्वा रुदि
त्वा चाचांतः पुनराचमेदिति॥ मनुरपि॥ सुप्त्वा क्षुत्वा च भुक्त्वा च ष्ठीवित्वोक्त्वानृतं वचः। पीत्वा — योध्यमाणश्च आचमेत्प्रय
तोऽपि सन्निति। भोजने त्वादावपि द्विराचमनं। भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचमेदित्यापस्तंबस्मरणात्॥ स्नानपानयो
रादौ सत्त्वरध्ययने त्वारंभे द्विः शेषेषु तु एवं यथोक्तं द्विराचमनं॥ ७॥ रथ्याकर्दमतोयानि स्पृष्टान्यंत्यश्ववायसैः। मारुतेनै
व शुध्यंति पक्वेष्टकचितानि च॥ रथ्यास्थितानि कर्दमतोयानि अंत्यैश्चांडालादिभिः श्वभिर्वायसैश्च स्पृष्टानि मारुतेनैव
शुध्यंति चकारवचनात् गोमयशाकैरादि प्राप्त्यर्थं पक्वेष्टकादिनिर्मितानि धवलगृहादीनि श्वचांडालादिस्पृ
ष्टानि मारुतेनैव शुध्यंति। एतच्च प्रोक्षणसंहतानामित्युक्तप्रोक्षणनिषेधार्थं॥ तृणकाष्ठपर्णादिमयानां प्रोक्षणमेव॥ ७
॥ इति द्रव्यशुद्धिप्रकरणं॥ ॥ इदानीं दानधर्मप्रतिपादयिष्यन् तदंगभूतपात्रप्रतिपादनार्थं तत्प्रशंसामाह॥ त
पस्तप्त्वासृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये। तृप्त्यर्थं पितृदेवानां धर्मसंरक्षणाय च॥ ब्रह्मादिरूपगर्भः। कल्पादौ तपस्तप्त्वा
ध्यानं कृत्वा कान् मुख्यान् सृजामीति सर्वं ब्राह्मणान् सृष्टवान् किमर्थं वेदगुप्तये वेदरक्षणार्थं पितॄणां देवतानां च

स्यर्थी अनुष्ठानोपदेशद्वारेण धर्मरक्षणार्थं च। अतस्तेभ्यो दत्तमक्षयफलं भवतीत्यभिप्रायः॥ छ॥ सर्वस्य प्रभवो विप्राः श्रु
ताध्ययनशालिनः। तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः॥ सर्वस्य क्षत्रियादेर्विप्राः प्रभवः श्रेष्ठाः जात्या कर्मणा
च। ब्राह्मणेष्वपि श्रुताध्ययनशालिनः श्रुताध्ययनसंपन्नास्ततः श्रेष्ठाः। तेभ्योऽपि क्रियापराः विहितानुष्ठानशीलाः। तेभ्योऽपि
अध्यात्मवित्तमाः ब्रह्ममार्गेण शमदमादियोगेन तत्त्वज्ञाननिरताः श्रेष्ठा इत्यनुषज्यते॥ छ॥ एवं जातिविद्यानुष्ठानत
पसां प्रशंसामुखेनैकैकयोगे पात्रताम्। अभिधायैतेषां समुच्चये संपूर्णपात्रतामाह॥ न विद्यया केवलया तपसा वापि पा
त्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितं। केवलया विद्यया अध्ययनसंपत्त्या नैव संपूर्णपात्रत्वं। नापि केवलेन तप
सा शमदमादिना। अपिशब्दात्केवलेनानुष्ठानेन केवलजात्या वा नैव संपूर्णपात्रता। कथं तर्हि यत्र पुरुषे वृत्तमनुष्ठा
नं इमे चोभे विद्यातपसी स्तः। शब्दाद्ब्राह्मणजातिश्च। तदेव मन्वादिभिः संपूर्णपात्रं प्रकीर्तितं हि यस्मादतः। परमुत्कृ
ष्टं पात्रं नास्ति। अत्र जातिविद्यानुष्ठानतपःसमुच्चयानामुत्तरोत्तरं श्रेष्ठत्वं शास्त्रे फलतारतम्यं द्रष्टव्यं॥ छ॥ गोभूतिलहिर
ण्यादि पात्रे दातव्यमर्चितं। नापात्रे विदुषा किंचिदात्मनः श्रेय इच्छता॥ पूर्वोक्ते पात्रे गवादिकं मर्चितं शास्त्रोक्तोदकदाना
दीतिकर्तव्यतासहितं देयं। अपात्रे क्षत्रियवैश्यादौ ब्राह्मणे च पतितादौ विदुषा पात्रविशेषेण फलविशेषं जानता श्रे
यः॥ संपूर्णफलमिच्छता किंचिदल्पमपि न दातव्यं। श्रेयोग्रहणात्तु पात्रदाने किमपि तावत्सफलमस्तीति सूचितं यथ
द्वैपायनः। अदेशकाले यद्दानमपात्रेभ्यश्च दीयते। असत्कृतमवज्ञातं तत्तामसमुदाहृतं। अपात्रे न दात २०
व्यमिति वदता विशिष्टदेशकालसंनिधौ पात्रस्यासंनिधानेऽवश्यं वा द्रव्ये तत्त्यागं तस्मै प्रतिश्रवणं वा कृत्वा सम

र्पयेत्। न त्वपात्रे दातव्यमिति सूचितं। तथा प्रतिश्रुतमपि चेत्पात। कादिसंयोगे जाते न देयं। प्रतिश्रुत्याप्यधर्मसंयुक्ताय
न दद्यादिति निषेधात्॥ छ॥ अपात्रे दातुर्निषेधमुक्त्वेदानीं प्रतिग्रहीतारं प्रत्याह॥ विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्र
तिग्रहः। गृह्णन्प्रदातारमधो नयत्यात्मानमेव च। विद्यातपोभ्यां हीनेन प्रतिग्रहो हिरण्यादिर्न ग्राह्यः। यस्माद्विद्याहीनः प्रतिगृ
ह्णन्दातारमात्मानं चाधो नरकं प्रापयति॥ छ॥ गवादि पात्रे दातव्यमुक्तं तत्र विशेषमाह॥ दातव्यं प्रत्यहं पात्रे निमि
त्तेषु विशेषतः। याचितेनापि दातव्यं श्रद्धापूतं तु शक्तितः। प्रतिदिवसं शक्त्यनुसारेण यथोक्तविधिना पात्रे गवादिकं स्वकु
टुम्बाविरोधेन दातव्यं निमित्तेषु चन्द्रसूर्योपरागादिषु विशेषतोऽधिकं यत्नेन दातव्यं याचितेनापि श्रद्धापूतं तत्र श्रद्ध
या पवित्रीकृतं शक्त्या दातव्यं। याचितेनापि दातव्यमिति वदता यथोक्तं पात्रं स्वयमेव गत्वा आहूय वा यद्दानं तन्महा
फलमुक्तं॥ तथा स्मरणं॥ गत्वा यद्दीयते दानं तदनन्तफलं स्मृतं। सहस्रगुणमाहूय याचिते तु तदर्धकं। गवादिकं दे
यमित्युक्तं तत्र गोदानविशेषमाह॥ छ॥ हेमशृङ्गी शफै रौप्यैः सुशीला वस्त्रसंयुता॥ सकांस्यपात्रा दातव्या क्षीरिणी गौः स
दक्षिणा। हेममये शृङ्गे यस्याः सा हेमशृङ्गी। शफै रौप्यै राजतैः खुरैः संयुता। वस्त्रेण च संयुता कांस्यपात्रसहिता। बहुक्षी
रा गौर्यथाशक्ति दक्षिणासहिता दातव्या॥ छ॥ गोदाने फलमाह॥ दातास्याः स्वर्गमाप्नोति वत्सरान्रोमसंमितान्। कपि
ला चेत्तारयति त्वन्यश्चासप्तमं कुलं॥ अस्या गो रोमसंमितान् रोमसंख्याकान्वत्सरान् स्वर्गमाप्नोति दाता। सा यदि
कपिला तदा केवलं दातारं न तारयति किंतु कुलमप्यासप्तमात्सप्तमपर्यन्तं पित्रादीन्षट् पुत्रादीन्षट् आत्मानं
च सप्तमं कुलं। अथार्थत्रयः शब्दः॥ छ॥ सवत्सारोमतुल्यानि युगान्युभयतोमुखी। दातास्याः स्वर्गमाप्नोति पूर्वेण विधि

स

धिनाददत् । सवत्सारोमतुल्यानि वत्से नैव वर्तन्त इति सवत्सालस्यारोमा । तुल्यानि वत्सस्य गोश्च यावन्ति रोमाणि तावत्सं
ख्याकानि युगानि कृतत्रेतादीनि तत्रयसुखी ददत्स्वर्गमाप्नोत्यनुत्तमं पूर्वोक्तेन विधिना तां दद्यात् ।। छ ।। का पुनरुभ
यतोमुखी कथं वा तद्दानं महाफलमित्यत आह । यावद्वत्सस्य पादौ द्वौ मुखं चैवान्य च दृश्यते । तावद्गौः पृथिवी ज्ञेया याव
द्गर्भं न मुंचति । गर्भान्निर्गच्छतो वत्सस्य द्वौ पादौ मुखं च यावत्कालं योन्यां दृश्यते तावत्कालमुभयतोमुखी तस्यास्तीति त
न्नयतोमुखी । यावत्कालं गर्भं न मुंचति तावत्सा गौः पृथिवीसमा ज्ञेया । अतः फलातिशयो युक्तः ।। छ ।। यथा कथंचिद्दा
त्वा गां धेनुं वाधेनुमेव वा । अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते । यथा कथंचित् दक्षिणागाद्यसंभवेपि । यथासंभ
वं पूर्वोक्त विधिना । धांडदोग्ध्री अधेनुर्वा अवंध्या अरोगा । रोगरहितां अपरिक्लिष्टां अतप्तां । तादृशीं गां दत्वा दाता स्व
र्गे महीयते ।। छ ।। गोदानसमान्याह । श्रांतसंवाहनं रोगिपरिचर्या सुरार्चनं । पादशौचं द्विजोच्छिष्टमार्जनं गोदानव
त् समं । श्रांतस्यासनशयनादिदानेन श्रमापनयनं श्रांतसंवाहनं रोगिणां परिचर्या यथाशक्त्यौषधादिदानेन ।
सुरार्चनं हरिहर हिरण्यगर्भादीनां गंधमाल्यादिभिराराधनं । पादशौचं द्विजातीनां समानामधिकानां च तेषामेवो
च्छिष्टमार्जनं उच्छिष्टस्यापनयनं एतान्यनंतरोक्तेन गोदानेन समानि ।। छ ।। भूदीपाश्वान्नवस्त्रांभस्तिलसर्पिः प्रति
श्रयान् । नैवेशिकस्वर्णधुर्यान् दत्वा स्वर्गे महीयते । भूः फलप्रदा । दीपो देवायतनादिषु प्रतिश्रयः प्रवासिनां आ
श्रयः । निवेशनार्थं गार्हस्थ्यार्थं यत्कन्यादीदीयते तन्नैवेशिकं स्वर्णं सुवर्णं धुर्यो भारवहो बलीवर्दः शेषं प्रसिद्धं ए २ए
तान्भूदीपादीन् दत्वा स्वर्गलोके महीयते पूज्यते । स्वर्गफलत्वं चेदं मिदानादीनां नफलांतरस्य दासार्थं । या

त्किंचित्कुरुते पापं ज्ञानतोऽज्ञानतोपि वा । अपि गोचर्ममात्रेण भूमिदानेन शुध्यति । तथा । कारिदत्वमिमाज्ञोनि
सुखमक्षय्यमन्नदः । तिलप्रदः प्रजामिष्टां दीपदः चक्षुरुत्तमं । वासोदश्चंद्रसायोज्यमश्विसायोज्यमश्वदः । इत्यादिफ
लांतरस्मरणात् । गोचर्मलक्षणं च बृहस्पतिनादर्शितं दशहस्तेन दंडेन त्रिंशद्दंडान्निवर्तनं । दशतान्येव गोचर्मदत्वा
स्वर्गे महीयते ।। छ ।। गृहधान्याभयोपानच्छत्रमाल्यानुलेपनं । यानं वृक्षं प्रियं शय्यां दत्वात्यंतं सुखी भवेत् । गृहं प्रसिद्धं
धान्यानि च शालिगोधूमादीनि । अभयं जीवत्राणं । उपानहौ । छत्रमाल्यं मल्लिकादेः । अनुलेपनं कुंकुमचंदनादि । यानं
रथादि वृक्षं उपजीव्य आम्रादि । प्रियं यद्यस्य प्रियं अभीष्टं धर्मादिकं । शय्यां च दत्वा अत्यंतमतिशयेन सुखी भवति
न्यच्च हिरण्यादिवत् हस्ते दातुमशक्यत्वात् । धर्मस्य दानासंभवः भूमिदानादावपि समानत्वात् ।। सर्वेभ्योपि धर्मदान
श्रवणात् ।। देवतानां गुरूणां च मातापित्रोस्तथैव च । पुण्यं देयं प्रयत्नेन नापुण्यं चोदितं क्वचित् । अपुण्यदानं दत्वर्ज्यते
प्रतिग्रहीतुरपि लोभादिना प्रवृत्तस्य यः पापमदलं ज्ञात्वा प्रतिगर्हितं आचरणात् कृतिष्ठति स्वपापं तामाश्रये सूनः । स
महिगुणसाहस्रमानं तं च प्रदाता क्षिपति स्मरणात् । इदं च । सर्वत्र देशकालपात्रविशेषात् देयविशेषाच्चदातृविशेषा
च्च फलतारतम्यं द्रष्टव्यं ।। छ ।। सर्वधर्ममयं ब्रह्मप्रदानेभ्योधिकं यतः । तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतं । यस्मात्स
र्वधर्ममयं ब्रह्म अवबोधकत्वेन तस्माद्दानं सर्वदानेभ्योधिकं । अतस्तद् ददध्यापनादिद्वारेण ब्रह्मलोकमवाप्नोति ।।
अविच्युतं च्युतिर्यथा न भवति । आभूतसंप्लवं ब्रह्मलोके अवतिष्ठत इत्यर्थः । अत्र ब्रह्मदाने परस्वत्वापादनमात्रं दानं
स्वत्वनिवृत्तेः कर्तुमशक्यत्वात् ।। छ ।। दानात्फलमुक्तमिदानीं तद्दानव्यतिरेकेणापि दानफलावाप्तिर्भवेदित्याह । प्रतिग्र

हसमार्थोपिनाददीत । येलोकादानशीलानांसतानाप्नोतिपुष्कलान् । यःपात्रन्नलोपि । आसंप्रतिग्रहंसुवर्णा
दिकंनाददीत नस्वीकरोति । असौयद्यस्त्रासंनोपादत्ते सततंतुदानशीलानांयेलोकास्तान्समग्रानवाप्नोति ॥ ७ ॥
इदानींसर्वप्रतिग्रहनिवृत्तिप्रसंगेपवादमाह । कुशाःशाकंपयोमत्स्यागंधाःपुष्पंदधिक्षितिः । मांसंशय्यासनंधाना
प्रत्याख्येयंनवारिचधानाः । भृष्टाःतंयवाःकुशाः । क्षितिःमृत्तिका । शेषंप्रसिद्धं । एतत्कुशादिकंस्वयमुपनीतंनप्रत्याख्ये
यंचकारात्गृहादि । शय्यांगृहान्कुशान्गंधानपःपुष्पंमणीन्दधि । मत्स्यान्धानाःपयोमांसंशाकंचैवननिर्णुदेत् ।
तथाएधोदकंमूलफलमन्नमभ्युद्यतंचयत् । सर्वतःप्रतिगृह्णीयान्मध्वथाभयदक्षिणामितिमनुस्मरणात् ॥ ८ ॥ कि
मितिनप्रत्याख्येयमित्याह ॥ आयाचिताहृतंग्राह्यमपिदुःकृतकर्मणः । अन्यत्रकुलटाषंढपतितेभ्यस्तथाद्विषः । यस्मा
द्याचितमेतत्कुशादिकमाहृतंदुःकृतकारिणोपिसंबंधिनआह्यंकिमुतयथोक्तकारिणः । तस्मान्नप्रत्याख्येयं ॥
अन्यत्रकुलटाषंढपतितेभ्यशत्रोश्चकुलटास्वैरिण्यादिका । षंढस्तृतीयाप्रकृतिः ॥ ९ ॥ प्रतिग्रहनिवृ
त्तेरपवादांतरमाह । देवातिथ्यर्चनकृतेगुरुभृत्यादिवृत्तये । सर्वतःप्रतिगृह्णीयादात्मवृत्त्यर्थमेवच । देवातिथ्यर्चनादेरा
वश्यकत्वात्तदर्थमनापत्स्वकरणात्पतितान्त्यजक्षिप्तवर्ज्जंसर्वतःप्रतिगृह्णीयात् । गुरवोमातापित्रादयः । भृत्याभर
णीयाभार्यापुत्रादयः ॥ ॥इतिदानप्रकरणं॥ ७ ॥ इदानींश्राद्धप्रकरणमारभ्यते श्राद्धंनामयादनीयस्यतत्स्था
नीयस्यवाद्रव्यस्यप्रेतोद्देशेनश्रद्धयात्यागः ॥तच्चत्रिविधं॥ पार्वणमेकोद्दिष्टमिति । तत्रत्रिपुरुषोद्देशेनयत्क्रियतेतत्पा ४०
र्वणं एकपुरुषोद्देशेनक्रियामाणमेकोद्दिष्टं । पुनश्चत्रिविधंनित्यंनैमित्तिकंकाम्यमिति । तत्रनित्यंनियतनिमित्तोपाधौ

—

चोदितंअहरहरमावास्याष्टकादिषु । अनियतनिमित्तोपाधौचोदितंनैमित्तिकं । यथापुत्रजन्मादिषु । फलकामनोपा
धौविहितंकाम्यंयथास्वर्गादिकामनायां । कृत्तिकादिषु ॥पुनश्चपंचविधं॥ अहरहःश्राद्धंपार्वणंवृद्धिश्राद्धंएकोद्दि
ष्टंसपिंडीकरणंचेति । तत्राहरहःश्राद्धंपार्वणंवृद्धिश्राद्धंएकोद्दिष्टंसपिंडीकरणंचेति । तत्राहरहःश्राद्धंअन्नंपितृमनुष्येभ्य
इत्यादिनोक्तं । अधुनापार्वणवृद्धिश्राद्धेचदर्शयिष्यंस्तयोःकालानाह ॥ ८ ॥ अमावास्याष्टकावृद्धिःकृष्णपक्षोयनद्वयं ॥
द्रव्यंब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः । व्यतीपातोगजच्छायाग्रहणंचंद्रसूर्ययोः । श्राद्धंप्रतिरुचिश्चैवश्राद्धकालाःप्र
कीर्तिताः । यत्रदिनेचंद्रमानदृश्यतेसाअमावास्यातस्यामहरहर्व्यापिन्यामपराह्णव्यापिनीयासाग्राह्या अपराह्णः
पितृणामितिवचनात् । अपराह्णस्तुपंचधाविभक्तेदिनेचतुर्थोभागस्त्रिमुहूर्तः । अष्टकाश्चतस्रहेमंतशिशिरयो
श्चतुर्णामपरपक्षाणांअष्टमीष्वष्टकाइत्याश्वलायनोक्ताः । वृद्धिःपुत्रजन्मादिः । कृष्णपक्षोपरपक्षः । अयनद्वयंद
क्षिणोत्तरसंज्ञकं । द्रव्यंकस्तूरामांसादि । ब्राह्मणसंपत्तिर्वक्ष्यमाणा । विषुवत्मेषतुलयोः । सूर्यगमनंसूर्यसंक्रमः
आदित्यस्यराशेराश्यंतरगमनं । अयनविषुवतोःसंक्रांतित्वेसिद्धेपिपृथगुपादानंफलातिशयप्रतिपादनार्थं । व्य
तीपातयोगविशेषः । गजच्छायायदेंदुःपित्र्यदैवत्येहंसश्चैवकरेस्थितः । याम्यातिथिर्भवेद्याहिगजच्छायाप्रकीर्तिता ॥
इतिपरिभाषितं ॥ हस्तिच्छायेतिकेचित् । सेहनगृह्यतेकालप्रकरणात् । ग्रहणंचंद्रसूर्ययोःउपरागः । यदाकर्तुःश्राद्धं
प्रतिरुचिर्भवतितदापिचशब्दाद्युगादिसंक्रांतयः । एतेश्राद्धकालाः । यद्यपिचंद्रसूर्यग्रहेनाद्यादितिग्रहणेभोजननिषे
धस्तथापिनोक्तदोषोदातुःस्युरयः ॥ अहरहःश्राद्धव्यतिरिक्तवक्ष्यमाणेषुचतुर्विधश्राद्धेषुब्राह्मणसंपत्तिमाह ॥

॥ छ ॥ अग्र्याः सर्वेषु वेदेषु श्रोत्रियो ब्रह्मविद्युवा। वेदार्थवित् ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णकः। सर्वेषु वेदेषु ऋग्वेदादिष्व-
नन्यमनस्कतयाप्यवताध्ययनक्षमाः अग्र्याः। श्रोत्रियः क्रमाध्ययनसंपन्नः। वक्ष्यमाणं ब्रह्म यो वेत्त्यसौ ब्रह्मवित्। युवा
मध्यवयस्कः। सर्वेपि विशेषणं। मंत्रब्राह्मणयोरर्थं वेत्तीति वेदार्थवित्। ज्येष्ठसामेति सामविशेषस्तदध्ययनांगव्रतं च। त-
द्व्रताचरणेन यस्तदधीते स ज्येष्ठसामा। त्रिमधु ऋग्वेदैकदेशस्तद्व्रतं च। तद्व्रताचरणेन तदध्यायी त्रिमधुः। त्रिसुपर्णमृग्य-
जुषोरेकदेशस्तद्व्रतं च तद्व्रताचरेण यस्तदधीते स त्रिसुपर्णकः। एते ब्राह्मणाः श्राद्धसंपद इति वक्ष्यमाणक्रियया संबं-
धः। ॥ छ ॥ स्वस्रीय ऋत्विग्जामातृ याज्य श्वशुर मातुलाः। त्रिणाचिकेत दौहित्र शिष्य संबंधि बांधवाः। स्वस्रीयो भागिनेयः। ऋ-
त्विगुक्तलक्षणः। जामाता दुहितुर्भर्ता। त्रिणाचिकेतः यजुर्वेदैकदेशस्तद्व्रतं चरन् तद्व्रताचरणेन तदध्यायी त्रिणा-
चिकेतः। अन्यत्प्रसिद्धं। एते सर्वे अग्र्यश्रोत्रियाद्यभावे वेदितव्याः। अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरगर्हितः इत्य-
भिधाय मनुना स्वस्रीयादीनामभिहितत्वात्। ॥ छ ॥ कर्मनिष्ठास्तपोनिष्ठाः पंचाग्निर्ब्रह्मचारिणः। पितृमातृपराश्चैव
ब्राह्मणाः श्राद्धसंपदः। कर्मनिष्ठा विहितानुष्ठानपराः। तपोनिष्ठाः तपःशीलाः। सभ्यावसथ्यौ त्रेताग्नयश्च यस्य संति
स पंचाग्निः। पंचाग्निविद्याध्यायी च। ब्रह्मचारी उपकुर्वाणको नैष्ठिकश्च। पितृमातृपराः तत्परायणाः। चकाराज्ज्ञाननिष्ठा-
दयः। ब्राह्मणान्न क्षत्रियादयः श्राद्धसंपदः श्राद्धे ब्राह्मण्यफलसंपत्तिहेतवः। ॥ छ ॥ वर्ज्यानाह। रोगी हीनातिरिक्तांगः का-
णः पौनर्भवस्तथा। अवकीर्णी कुंडगोलौ कुनखी श्यावदंतकः। रोगी महारोगोपसृष्टः। हीनं अतिरिक्तं च अंगं यस्या- ४१
सौ हीनातिरिक्तांगः। एकेनाक्ष्णा यो न पश्यति स काणः। एतस्मादेवांधबधिरविधजननखलतिदुश्चर्मसंततयो

निरस्ताः। पुनर्भूरुक्तलक्षणा तस्यां जातः पौनर्भवः। अवकीर्णी ब्रह्मचर्ये विस्खलितब्रह्मचर्यः। कुंडगोलौ परदार-
जायेते ह्यमुतौ कुंडगोलकौ पत्यौ जीवति कुंडः स्यात् मृते भर्तरि गोलकः इत्येवमुक्तलक्षणकौ कुंडगोलकौ पत्यौ जीवति कुं-
डः स्यात् मृते भर्तरि गोलक इत्येवमुक्तलक्षणकौ कुनखी संकुचितनखः। श्यावदंतकः स्वभावात् कृष्णदंतः। एतेषा-
मनिंदिता इति वक्ष्यमाणे संबंधः। ॥ छ ॥ भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः। मित्रध्रुक् पिशुनः सोमविक्रयी
परिविंदकः। वेतनग्रहणेन योध्यापयति स भृतकाध्यापकः। वेतनदानेन योधीते सोपि। क्लीबो नपुंसकः। असद्भिः स-
द्भिर्वा दोषैर्यः कन्यां दूषयति स कन्यादूषी। सता असता वा ब्रह्महत्यादिभिर्दुष्कैरभिशस्तः। मित्रद्रुक् मित्रद्रोही। पिशुनः
परदोषसंकीर्तनशीलः। सोमविक्रयी यः सोमस्य विक्रेता। परिवेत्ता ज्येष्ठे अकृतदारे कृताग्निपरिग्रहे वा यः कनीयान्दा-
रपरिग्रहमग्निपरिग्रहं वा कुर्यात् स परिवेत्ता। ज्येष्ठस्तु परिवित्तिः। यथाह मनुः। दाराग्निहोत्रसंयोगं कुरुते योग्रजे स्थि-
ते परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः। इति। एवं दारयाजकाद्यपि। परिवित्तिः परिवेत्ता च यया च परिविद्यते। स-
र्वे ते नरकं यांति दारयाजकपंचमा इति। ॥ छ ॥ मातृपितृगुरुत्यागी कुंडाशी वृषलात्मजः। परपूर्वापतिः स्तेनः कर्मदुष्टाश्च
निंदिताः। विना कारणेन मातापितृगुरून् यस्त्यजति स मातापितृगुरुत्यागी। एवं भार्यासुतत्यागोपि। दोषे च मातापितरौ
साध्वी भार्या सुतः शिशुः। अकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्। इति समाननिर्देशात्। कुंडस्यान्नमश्नातीति असौ
कुंडाशी एवं गोलकस्यापि। यस्तयोरन्नमश्नाति स कुंडाशी प्रकीर्तित इति वचनात्। वृषलो निर्धर्मः। तत्सुतो वृषलात्मजः। पर-
पूर्वा पुनर्भूः तस्याः पतिः परपूर्वापतिः। अदत्तादायी स्तेनः। कर्मदुष्टाः शास्त्रविरुद्धकारिणः। चकारात् किंतवदेवलकप्रभृत-

यः । एते श्राद्धे निंदिताः ॥ प्रतिषिद्धाः ॥ अग्र्याः सर्वेषु वेदेषु इत्यादिना श्राद्धयोग्यप्रतिपादितेनैव लब्धं । तद्व्यतिरिक्तानामयोग्यत्वे
सिद्धे । पुनः केषांचित्कुण्डादीनां प्रतिषेधकथनमुक्तलक्षणब्राह्मणासंभवे प्रतिषेधरहितानां प्राप्त्यर्थं श्राद्धकालानु
क्त्वाधुना पार्वणप्रयोगमाह ॥ छ ॥ निमंत्रयीत पूर्वेद्युर्ब्राह्मणानात्मवाञ्छुचिः । तैश्चापि संयतैर्भाव्यं मनोवाक्
कायकर्मभिः ॥ पूर्वोक्तान्ब्राह्मणान् श्राद्धे दक्षिणक्रियाभिज्ञान्पूर्वेद्युर्निमंत्रयेत । प्रार्थनया क्षणमभ्युपगमयेत् । अपरे
द्युर्वा पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते निमंत्रयेत । अवराान्सम्यग्विप्रान्यथोदितान् ॥ इति मनुस्मरणात्
॥ ॥ आत्मवांश्च लोकोन्मादादिरहितश्चेत् । यद्वा आत्मवान् नियतेंद्रियो भवेत् । शुचिः श्रयतश्च । तैरपि निमंत्रितैर्ब्राह्म
णैर्मनोवाक्कायव्यापारैः संयतैर्भवितव्यं ॥ छ ॥ अपराह्णे समभ्यर्च्य स्वागतेनागतांस्तु तान् । पवित्रपाणिराचांतानासनेषू
पवेशयेत् । अपराह्णे उक्तलक्षणे तान्निमंत्रितान्ब्राह्मणानागतान् स्वागतवचनेन पूजयित्वा कृतपादधावनानाचांता
नुक्तेष्वासनेषु पवित्रपाणिः पवित्रपाणीनुपवेशयेत् । यद्यपि सामान्येनापराह्ण उक्तः । तथापि कुतपप्रारम्भता
दि पंचमुहूर्तपरिसमापनं श्रेयस्करं । अह्नो मुहूर्ता विख्याता दश पंच च सर्वदा । तत्राष्टमो मुहूर्तो यः स कालः
कुतपः स्मृतः । मध्याह्ने सर्वदा यस्मान्मंदीभवति भास्करः । तस्मादनंतफलदस्तत्रारंभो विशिष्यते । ऊर्ध्वं मुहूर्तात्कु
तपाद्यन्मुहूर्तचतुष्टयं । मुहूर्तपंचकं ह्येतत्स्वधाभवनमिष्यत इति वचनात् । तथान्यदपि श्राद्धोपयोगि कुतपस
प्तकमुक्तं । मध्याह्नः खड्गपात्रं च तथा नेपालकंबलः । रूप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः । पापं कुत्सितमित्या ४२
हुस्तस्य संतापकारिणः । अष्टावेते यतस्तस्मात्कुतपा इति विश्रुता इति ॥ छ ॥ युग्मान्दैवे यथाशक्ति पित्र्येऽयुग्मांस्त

स्तथैव च । परिश्रिते शुचौ देशे दक्षिणाप्रवणे तथा । दैवेऽप्यर्थदपिके श्राद्धे युग्मान्समान्ब्राह्मणानुपवेशयेत् । कथं यथा
शक्ति । शक्तिमनतिक्रम्य । तत्र वैश्वदेवे द्वौ । मात्रादीनां त्रिदेवानां एकैकस्मा द्वौ द्वौ । त्रिभ्यः षड्वा । एवं पित्रादीनां एकैकस्य द्वौ
द्वौ । एवं मातामहानां च । वर्गत्रये पि वैश्वदेवं तंत्रं वा । कर्मणां युगपद्भावस्तंत्रं । पित्र्ये पार्वणश्राद्धे अयुग्मान्विप्रानुपवेशये
त् । इति च संबध्यते । एतच्च परिश्रिते सर्वतः प्रच्छादिते शुचौ गोमयादिनोपलिप्ते दक्षिणाप्रवणे । दक्षिणतो नते देशे कर्तव्यं
॥ छ ॥ द्वौ दैवे प्राक्त्रयः पित्र्ये उदगेकैकमेव च । मातामहानामप्येवं तंत्रं वा वैश्वदेविकं । अयुग्मान्पित्र्य इति पार्वणश्राद्धप्र
गत्वेन वैश्वदेवे पित्र्ये अयुग्मश्च संगादिदमारभ्यते । द्वौ दैव इति । दैवे वैश्वदेवे ब्राह्मणौ प्राङ्मुखावुपवेश्यौ । पित्र्ये अयुग्मानिति
अविशेषप्रसंगे विशेष उच्यते । त्रयः पित्र्य इति पित्रादिस्थाने त्रयः उदङ्मुखा उपवेश्याः । पक्षांतरमाह । एकैकमेव वा । वैश्व
देवे ब्राह्मणौ प्राङ्मुखावुपवेश्यौ । पित्र्ये अयुग्मानिति अविशेषप्रसंगे विशेष उच्यते । त्रयः पित्र्य इति पित्रादिस्थाने त्रय उ
दङ्मुखा उपवेश्याः । पक्षांतरमाह । एकैकमेव वा । वैश्वदेवपित्र्ये च एकमेव मुपवशयेत् । संनतो विकल्पः । मातामहानाम
पि श्राद्धे निमंत्रणादिना द्वौ दैवे प्राक्त्रयः पित्र्य उदगेकैकमेव वा एवं पितृश्राद्धवत् कर्तव्यं पितृश्राद्धे मातामहश्राद्धे च वै
श्वदेविकं वैश्वदेवं तंत्रेण वा कर्तव्यं । यदा तु द्वावेव ब्राह्मणौ लब्धौ तदा वैश्वदेवपात्रं प्रकल्प्यान्यत्र एकैकं ब्राह्मणं नियुंज्या
त् ॥ यथाह वसिष्ठः ॥ यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् । अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च । देवतायतने कृ
त्वा ततः श्राद्धं प्रवर्तयेत् । प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे इति ॥ छ ॥ पाणिप्रक्षालनं दत्त्वा विष्टरार्थं कुशानपि । आ
वाहयेदनुज्ञातो विश्वेदेवास इत्यृचा । तदनंतरं वैश्वदेवार्थं ब्राह्मणहस्ते जलं विष्टरार्थं कुशांश्च युग्मान् अद्विगुणितान्

न्आसने दक्षिणतो दत्वा विश्वान्देवानावाहयिष्ये इति ब्राह्मणान् पृष्ट्वा तैरावाहयेत्युक्तो विश्वेदेवास आगत इत्यन
यर्चा। आगच्छंतु महाभागा विश्वेदेवा महाबलाः॥ ये यत्र विहिताः श्राद्धे सावधाना भवंतु ते इत्यनेन च स्मार्तेन मंत्रेणावाहा
हयेत्। एतच्च यज्ञोपवीतिना प्रदक्षिणं च कार्यं अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणमिति। पित्र्ये विशेषश्रवणात्
॥छ॥ यवैरन्ववकीर्याथ भाजने सपवित्रके। शन्नोदेव्याः। पयः क्षिप्त्वा यवोसीति यवांस्तथा। यादिव्या इति मंत्रेण हस्ते
र्घं विनिक्षिपेत्। ततो वैश्वदेवार्घं ब्राह्मणसमीपन्नमिप्रादक्षिण्येन नयेद्वैरासीयानंतरं तैजसादिभाजने सपवित्रके कुश
युग्मांतर्हिते शंनोदेवीरभिष्टय इति अनयर्चापः क्षिप्त्वा यवोसि इत्यनेन मंत्रेण यवान् ततो गंधपुष्पाणि च क्षिप्त्वानंतरं
अर्घपात्रं पवित्रांतर्हितेषु ब्राह्मणहस्तेषु या दिव्या आपः पयसेत्यादिना मंत्रेण वैश्वदेवा इदं वो अर्घमित्यर्घोदकं विनि
क्षिपेत्॥छ॥ दत्वोदकं गंधमाल्यं धूपदानं सदीपकं। अथ करशौचार्थमुदकं दत्वा यथाक्रमं गंधपुष्पधूपदीपदानं कु
र्यात्। तथा वादानदानं च गंधादीनां च स्मृत्यंतरोक्तो विशेषो द्रष्टव्यः। चंदनागुरुकर्पूरकुंकुमापद्मकानुलेपनार्थं इ
ति विष्णुनोक्तं पुष्पाणि च श्राद्धे जातु प्रशस्ताः सुमल्लिकाश्वेतयूथिकाः जलोद्भवानि सर्वाणि कुसुमानि च चंपकं इत्य र
क्तकानि वर्ज्यानि च उग्रगंधीन्यगंधीनि चैत्यवृक्षोद्भवानि च। पुष्पाणि वर्जनीयानि रक्तवर्णानि च॥ न चकंकिजं॥ कंटकिजम
पि शुक्लं सुगंधि यद्दद्यात्। न रक्तं दद्यात् रक्तमपि कुंकुमं च जलजं च दद्यात् इत्यादीनि द्रष्टव्यानि। धूपे च विशेषो विष्णुनोक्तः
प्राण्यंगं सर्वं धूपार्थे न दद्यात्। घृतमधुसंयुक्तं गुग्गुलु श्रीखंडागुरुदेवदारुसरलादि दद्यादिति। दीपे च विशेषः शंखेन
दर्शितः। घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः। वसामेदोद्भवं दीपं प्रयत्नेन विवर्जयेत्। आच्छादनं च सूत्रं च नवमनुपहतं स ४३

दशं दद्यादिति। एतत्सर्वं वैश्वदेवानुष्ठानकांडमुदङ्मुखः कुर्यात्। पित्र्यकांडं दक्षिणामुखः। यथाह शातातपः। उद
ङ्मुखस्तु देवानां पितॄणां दक्षिणामुखः॥ प्रदद्यात्पार्वणे सर्वं दैवपूर्वं विधानतः इति। अपसव्यं ततः कृत्वा पितॄणामप्रदक्षि
णं। द्विगुणांस्तु कुशान् दत्वा ह्युशंतस्त्वेत्यृचा पितॄन्॥ आवाह्य तदनुज्ञातो जपेदायंतु नस्ततः। ततो वैश्वदेवकांडानंतरमप
सव्यं यज्ञोपवीतं प्राचीनावीती कृत्वा अनंतरं इति वदतां कांडद्वयसमयो दर्शितः। पित्रादीनां त्रयाणामयुग्मान् कुशान् द्विगु
णान्। भुग्नान् प्रदक्षिणावामतो विष्टरार्थमासनेषूदकपूर्वं दत्वा दद्यात्॥ पुनरुदकं दद्यात्। अपः प्रदाय द्विगुणान् भुग्ना
न्कुशान् दत्वापः। प्रदायेत्याश्वलायनस्मरणात्। एतच्चाद्यंतयोरुदकदानं वैश्वदेवे पित्र्ये च प्रतिपदार्थं द्रष्टव्यं। अथ
पितॄन् पितामहान् प्रपितामहानावाहयिष्ये इति ब्राह्मणान् पृष्ट्वावाहयेत्। तैरनुज्ञातः उशंतस्त्वा निधीमहीत्यनयर्चा।
पित्रादीनावाह्यायंतु नः पितर इत्यादिना मंत्रेणोपतिष्ठेत्॥छ॥ यवार्थास्तु तिलैः कार्याः कुर्यादर्घादि पूर्ववत्। दत्वार्घं संस्र
वांस्तेषां पात्रे कृत्वा विधानतः। पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः॥ यवार्थावसाध्यानि कार्याणि अवकिरणादी
नि तिलैः कर्तव्यानि। ततो अर्घपात्रसाधनाद्याच्छादनांतं सर्वं पूर्ववत्कुर्यात्। तत्रायं विशेषः। तिलानपहता असुरा रक्षांसि इत्यादि
ना मंत्रेण ब्राह्मणान् परितो प्रादक्षिण्यमन्ववकीर्य राजतादिपात्रेषु अयुग्मकुशानिर्मितपवित्रांतर्हितेषु शंनोदेवीरिति मंत्रेण
पः क्षिप्त्वा स्वधार्घ्या इति ब्राह्मणानां पुरतो अर्घपात्राणि स्थापयित्वा या दिव्या इति मंत्रांते पितरिदं तेऽर्घ्यं॥ पितामहेदं तेऽर्घ्यं प्रपि
तामह इदं तेऽर्घ्यमिति। ब्राह्मणानां हस्तेष्वर्घं दत्वा दैवेकमुन्नयत्र वा इत्यस्मिन्नपि पक्षे पात्रत्रयं कार्यं। एवमर्घं दत्वा ते
षामर्घ्याणां संस्रवान् ब्राह्मणहस्तगलितानर्घोदकानि पित्र्ये पात्रे गृहीत्वा दक्षिणाग्रकुशास्तंबे न्युब्जमो निधाय तस्योपरि पित्र्

न्यः स्वानमसीत्यनेन मंत्रेण तत्पात्रं न्युब्जमधोमुखं कुर्यात्। तस्योपरि अर्घपात्रपवित्राणि निदध्यात्। अनंतरं गंधपुष्पधूपदी
पाच्छादनानि पितरयं ते गंधः पितरिदं ते पुष्पमित्यादिना प्रयोगेण दद्यात्॥ छ॥ अग्नौकरिष्यन्नादाय पृच्छत्यन्नं घृतप्लुतं॥
कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवत्। हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः। यथालाभोपपन्नेषु रौप्येषु तु विशेष
तः। अनंतरं अग्नौकरिष्यन्नुद्धृत्य तु तं घृताक्तं अन्नमादाय ब्राह्मणान्पृच्छेत् अग्नौकरिष्य इति पृष्टस्तद्ग्रहणं स्वपक्षाकादिनि
हृत्यर्थं ततस्तैः कुरुष्वेत्यभ्यनुज्ञातः। प्राचीनावीती निक्षिप्तमुपसमाधाय मेक्षणेनावदायावदानसंपदानसंपदा जुहुयात्
सोमाय पितृमते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नमः। इति पिंडपितृयज्ञकल्पेनाग्नौ हुत्वा मेक्षणमनुप्रहृत्य हुत
शेषमन्नमयं वर्ज्यं। यथालाभोपपन्नेषु विशेषतो रौप्येषु पित्रादिभाजनेषु दद्यात्। वैश्वदेवभाजनेषु समाहितो नान्यमनाः
स्कः। अत्र पद्यप्रयाविवत्यविशेषेणोक्तं। तथाप्याहिताग्नेः सर्वाधानपक्षे औपसनाभावात् पिंडपितृयज्ञानंतरं त्रेताग्निनिपार्व
णश्राद्धे विहितदक्षिणाग्नेः सन्निधानाद्दक्षिणाग्नौ समाहितः। कर्म स्मार्तं विवाहाग्नाविति तस्यापवाददर्शनात्। यथाह
मार्कंडेयः। आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः। अनाहिताग्निस्त्वौपसदे ह्यग्न्यभावे द्विजेष्विति। अर्धाधानपक्षेत्वौ
पासनाग्निसद्भावादाहिताग्नेः रनाग्नेरप्यौपासनाग्नावेवाग्नौकरणहोमः। एवमन्वष्टकादिषु त्रिविधपिंडपितृयज्ञकल्पादेशा
त्। काम्यादिषु चतुर्षु ब्राह्मणपाणावेव होमः॥ यथाह गृह्यकाराः। अन्वष्टक्यं च पूर्वेद्युः मासि मास्यथ पार्वणं। काम्यमभ्युदये
ष्टम्यामेकोद्दिष्टमथाष्टमं। चतुर्ष्वाद्येषु साग्नीनां वह्नौ होमो विधीयते। पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपीति। अस्यार्थः। हे ४४
मंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका इत्यष्टका विहितास्तत्र नवम्यां क्रियते तदन्वष्टक्यं। सप्तम्यां तु क्रियमाणं

पूर्वेद्युः। मासि मास्यथ पार्वणं। कृष्णपक्षे पंचदश्यां तिथिषु यस्यां कस्यांचित्तिथावन्वष्टक्यादि तिदेशेन यद्विहितं। अमावास्यायां
पितृपिंडयज्ञानंतरं यद्विहितं तत्पार्वणं। स्वर्गादिकामानां कृत्तिकादिषु नक्षत्रेषु यद्विहितं तत्काम्यं। अभ्युदयेषु पुत्रोत्प
त्यादिषु तडागारामदेवताप्रतिष्ठादिषु च यद्विहितं। अष्टम्यामष्टकाविहिता एकोद्दिष्टं। अत्रैकोद्दिष्टशब्देन सपिंडीक
रणं लक्षयति। तत्रैकोद्दिष्टस्यापि सद्भावात् साक्षादेकोद्दिष्टेन तदभावात्। अथवा गृह्यकारमतेन साक्षादेकोद्दिष्टे
पि पाणिहोमस्य सद्भावात् साक्षादेकोद्दिष्टमेवा एतेषामष्टानामाद्येषु चतुर्षु साग्निकस्याग्नौ होमः। उत्तरेषु चतुर्ष्वपि पित्र्य
ब्राह्मणहस्ते। निरग्निकस्यापि प्रमीतपितृकस्य द्विजस्य पार्वणं नित्यमिति। तस्यापि पाणावेव होमः। न निर्वपति यः श्रा
द्धं प्रमीतपितृको द्विजः। इंदुक्षये मासि मासि प्रायश्चित्तीयते स इति वचनात्। एवं काम्याभ्युदयैकोद्दिष्टेषु पाणावेव
अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेदिति मनुस्मरणात्। पाणिदत्तस्य पृथग्ग्रासप्रतिषेधश्च स्मर्यते। यथाह गृ
ह्यकाराः। अन्नं पाणितले दत्तं पूर्वमश्नंत्यबुद्धयः। पितरस्तेन तृप्यंति शेषान्नं न लभंति ते। यच्च पाणितले दत्तं यच्चा
न्यदुपकल्पितं। एकीभावेन भोक्तव्यं पृथग्भावो न विद्यते इति॥ छ॥ दत्वान्नं पृथिवी पात्रमिति पात्राभिमंत्रणं पा।
कृत्वेदं विष्णुरित्यन्ने द्विजांगुष्ठं निवेशयेत्। अन्नदानस्य पर्यायसिद्धये। द्विकं भोजनेषु दत्वा पृथ्वी ते पात्रमित्यादिनामं
त्रेण पात्राभिमंत्रणं कृत्वा। इदं विष्णुर्विचक्रम इत्यनेनर्चान्ने द्विजांगुष्ठं निवेशयेत्। तत्र वैश्वदेवे यज्ञोपवीती विष्णो ह
व्यं रक्षेति पित्र्ये प्राचीनावीती विष्णो कव्यं रक्षेति विष्णो हव्यं च कव्यं च ब्रूयाद्रक्षेति वै क्रमात् इति स्मरणात्॥ छ॥ सव्या
हृतिकां गायत्रीं मधुवाता इति त्र्यृचं। जप्त्वा यथासुखं वाच्यं ते भुंजीरंस्तेपि वाग्यताः। अनंतरं विश्वेभ्यो देवेभ्य इदमन्नं

परिविष्टं परिवेष्यमाणं चाहमेरिति यवोदकेन निवेद्य तथा पित्रे अमुकगोत्राय अमुकशर्मणे इदमन्नं परिविष्टं परिवे
ष्यमाणं चाहमेरिति तिलोदकप्रदानेन पैत्र्ये निवेद्य एवं पितामहाय प्रपितामहाय च निवेद्यानन्तरमापोशानं दत्वा पूर्वोक्ता
भिर्व्याहृतिभिः सहितां गायत्रीं मधुवाता इत्यृचं मधु मधु मधु इति त्रिवारं जप्त्वा यथासुखं जुषध्वमिति ब्रूयात् सकृत्प्र
पितृभ्यः सावित्रीं मधुमज्जपः। अन्नं निवेद्यापोशानं जपशेषोपभोजनं। तथा गायत्रीं सकृद्व्यापि जपे व्याहृतिपूर्विकां
ति मधुवाता इति त्र्यृचं। मधु त्रिवेत त्रिकं तथोपारस्करवचनात्। भुंजीरंस्तेपि वाग्यताः। ते विप्रा ब्राह्मणा वाग्यताः मौनिनो भुं
जीरन्॥ २३॥ अन्नमिष्टं हविष्यं च दद्यादक्रोधनोऽत्वरः। आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वजपं तथा। अन्नेनेत्यनेनोपलेख्य
भोज्यपेयात्मकं पंचविधं। इष्टं यद्ब्राह्मणाय प्रेताय कर्त्रे वा रोचते तद्हविष्यं श्राद्धे हविर्यागयं व्रीहिशालियवगोधूममुद्गमा
षमुन्यन्नकालशाकमहाशल्ककौलसुंठीमरीचहिंगुगुडशर्कराकर्पूरसैन्धवसंभारपनसनालिकेरकदलीबदरगव्यप
योदधिघृतपायसमधुमांसादि अनन्ततृप्तिकरत्वप्रसिद्धं वेदितव्यं। हविष्यमित्यनेनैवायोग्यस्याप्यनुक्तस्य तत्र प्रसिद्धस्य को
द्रवमसूरचणककुलत्थपुलकनिष्पावकराजमाषकूष्माण्डवार्ताकबृहतीरुण्यालाबुकीवशाकरपिप्पलीवचाशत
पुष्पाबिडलवणमाहिषक्षीरदधिघृतपायसादीनां निवृत्तिः। अक्रोधनः क्रोधहेतुसंभवेपि। अत्वरोऽव्ययः॥
आतृप्तेर्दद्यादिति संबन्धः। तृप्तश्चाद्यथा किंचिदुच्छिष्यते। तथा दद्यात्। उच्छेषणं स्याद्दासवर्गस्य भागधेयं त्वात्। उच्छेषणं भू
मिगतमजिह्मस्याशठस्य च। दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते इति मनुस्मरणात्। तथा आतृप्तेः पवित्राणि पुरुष ४५
सूक्तपाठनस्मृतिः। निजप्त्वा तृप्तान् ज्ञात्वा पूर्वोक्तं च जपं च सव्याहृतिकामित्याद्यकं जपेत्॥ २४॥ अन्नमादाय तृप्ताः स्थ

शेषं चैवानुमान्य च तदन्नं विकिरेद्भुवि दद्यादापः सकृत्सकृत्। अनन्तरं सर्ववर्णमन्नमादाय तृप्ताः स्थेति तान्पृष्ट्वा तृ
प्ताः स्मेति तैः प्रत्युक्तः शेषमन्नमप्यस्ति किं क्रियतामिति पृष्ट्वा इष्टैः सहोपभुज्यतामित्यभ्युपगम्य मयात्तदन्नं पितृस्थान
ब्राह्मणस्य पुरस्तादुच्छिष्टसन्निधौ दक्षिणाग्रदर्भान्तरितायां भूमौ तिलोदकप्रक्षेपपूर्वकं येऽग्निदग्धा इत्यनया विनि
क्षिप्य पुनः तिलोदकं प्रक्षिपेत्। तदनन्तरं ब्राह्मणहस्तेषु गण्डूषार्थं सकृत्सकृदपो दद्यात्॥ २५॥ सर्वमन्नमुपादाय।
सतिलं दक्षिणामुखः। उच्छिष्टसंनिधौ पिंडान्दद्याद्वै पितृयज्ञवत्। पिंडपितृयज्ञकल्पातिदेशेन च चरुश्रपणसद्भावे
अग्नौकरणशिष्टचरुशेषेण सह सर्वमन्नमुपादायाग्निसन्निसन्निधौ पिंडान्दद्यात्। तदभावे ब्राह्मणार्थसार्ववर्णि
कमन्नमुपादाय सतिलं तिलमिश्रं दक्षिणामुखः उच्छिष्टसंनिधौ पिंडपितृयज्ञकल्पेन पिंडान्दद्यात्॥ २६॥ मातामहा
नामप्येवं दद्यादाचमनं ततः। स्वस्ति वाच्यं ततः कुर्यादक्षय्योदकमेव च। मातामहानामपि विश्वेदेवावाहनादि पिंड
दानपर्यन्तकर्मैवमेव कर्तव्यं। अनन्तरं ब्राह्मणानामाचमनं दद्यात्। स्वस्ति वाच्यं ततः कुर्यात् स्वस्तीति ब्रूमेति
ब्राह्मणान्स्वस्ति वाचयेत्। तैश्च स्वस्तीत्युक्तेऽक्षय्यमस्त्विति ब्रूतेति। ब्राह्मणहस्तेषूदकदानं कुर्यात्। तैश्चाक्षय्य
मस्त्विति वक्तव्यं॥ २७॥ दत्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत्। वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः स्वधोच्यतां।
अनन्तरं यथाशक्ति हिरण्यरजतादिदक्षिणां दत्वा स्वधां वाचयिष्य इत्युक्त्वा तैर्ब्राह्मणैर्वाच्यतामित्यनुज्ञातः प्रकृते
भ्यः पित्रादिभ्यो मातामहादिभ्यश्च स्वधोच्यतामिति स्वधाकारमुदाहरेत्॥ २८॥ ब्रूयुरस्तु स्वधेत्युक्ते भूमौ सिंचेत्ततो जलं

। विश्वेदेवा इत्येक इदमनंतरोक्तं जपेत् ॥ सू ॥ दातारोभिब्रूयात् । ब्राह्मणैश्च प्रीयंतां । विश्वेदेवा इत्येक इदमनंतरोक्तं ज
पंचनोस्त्विति । दातारो हिरण्यादेर्नोऽस्माकं कुले वर्द्धंतां । वद्वेनवउवेदश्च वर्द्धतामध्ययनाध्यापनतदर्थज्ञानानु
ष्ठानद्वारेण । संततिश्च पुत्रपौत्रादिपरंपरा । श्रद्धा च पित्र्ये कर्मण्यास्था नोऽस्माकं माव्यगव्यगमत् मा श्र पगच्छ
देयं च हिरण्यादि बहु पर्यंतमस्माकं न वत्विति जपेदित्वयः ॥ सू ॥ इत्युक्त्वा ते प्रियावाचः प्रणिपत्य विसर्जयेत्
वाजे वाजे इति प्रीतः । पितृपूर्वं विसर्जनं । एवं पूर्वोक्तप्रार्थनामंत्रं जप्त्वा उक्त्वा च प्रियावाचः धन्या वयं न वचरण
कमलयुगलरजः पवित्रीकृतमस्मिन्मंदिरं शाकाद्यशनक्लेशमवगणय्य नवद्भिरनुगृहीता वयमित्येवंरूपाः
प्रियावाचः प्रणिपत्य प्रदक्षिणपूर्वकं नमस्कृत्य विसर्जयेत् । कथं विसर्जयेदित्याह । वाजे वाजे वत बाजिनो
न इत्यनयर्चा पितृपूर्वं विश्वेदेवान्तं दर्भान्वारंभणेनो निश्चितपितर इति प्रीतः सुप्रीतमनाः विसर्जनं कुर्यात् ॥ सू ॥
यस्मिंस्ते संस्रवाः पूर्वमर्घपात्रे निवेशिताः । पितृपात्रं तदुत्तानं कृत्वा विप्रान्विसर्जयेत् । यस्मिन्नर्घपात्रे च पूर्वं पूर्व
दानानंतरं ते संस्रवा ब्राह्मणहस्तगलितार्घोदकानि निवेशिताः स्थापितास्तत्पितृपात्रं न्युब्जं सदुत्तानमूर्ध्वमुखं कृ
त्वा विप्रान्विसर्जयेत् । तच्चाशीर्मंत्रजपाद्यूर्ध्वं वाजे वाज इत्यतः प्राक् द्रष्टव्यं । एवं कृत्वा विसर्जयेदिति त्येकोप्रत्यय
श्रवणात् ॥ सू ॥ प्रदक्षिणमनुव्रज्य भुंजीत पितृसेवितं । ब्रह्मचारी भवेत्तां तु रजनीं ब्राह्मणैः सह ॥ अनंतरं श्रासी ।
मांतं ब्राह्मणाननुव्रज्य तैरास्यतामित्यनुज्ञातस्तान्प्रदक्षिणीकृत्य पितृनिषेव्य पितृसेवितं श्राद्धावशिष्टमिष्टैः स ४६

ह भुंजीत नियम एवायं । न परिसंख्या मांसेऽपि यथारुचीति द्विजकाम्ययेत्यपरोक्तं यस्मिं दिने श्राद्धं तत्संबं
धिनी रात्रिं नोक्तः द्विः ब्राह्मणैः सह कर्त्ता ब्रह्मचारी भवेत् । उशाट्यासुनर्नजिनादिरहितो भवेत् । पुनर्भोजनम
ध्ययनं भारमध्वानमैथुनं । दानं प्रतिग्रहो होमः श्राद्धकृत्त्वष्ट वर्जयेत् ॥ इति वचनात् ॥ एवं पार्वणश्राद्धमुक्त्वा इ
दानीं वृद्धिश्राद्धमाह ॥ एवं प्रदक्षिणावृत्को वृद्धौ नांदीमुखान्पितृन् । यजेत दधिकर्कंधुमिश्रान्पिंडान्यवैः ।
क्रियाः । वृद्धौ पुत्रजन्मादिनिमित्ते वृद्धिश्राद्धे एवमुक्तेन प्रकारेण पितृन्यजेत्पूजयेत् । तत्र विशेषमाह । प्रद
क्षिणावृत्क इति प्रदक्षिणा आवृत् अनुष्ठानपद्धतिर्यस्यासौ प्रदक्षिणावृत्कः । प्रदक्षिणप्रचार इति यावत् । नां
दीमुखानिति पितॄणां विशेषणं । अतश्चावाहनादौ नांदीमुखान्पितॄनावाहयिष्ये नांदीमुखान्मातामहानावा
हयिष्ये इत्यादिप्रयोगो द्रष्टव्यः । कथं यजेत्याह । दधिकर्कंधुमिश्रान् कर्कंधु बदरीफलं दध्ना बदरीफलैश्च
मिश्रान्पिंडान्दत्त्वा यजेतेति संबध्यते तिलसाध्याः सर्वाः क्रियाः यवैः कर्तव्याः । अत्र ब्राह्मणसंख्या दर्शितैव युग्मै ।
दैवे यथाशक्ति इत्यत्र । प्रदक्षिणावृत्कादिपरिगणनमन्येषामप्यनुक्तानां विशेषधर्माणां प्रदर्शनार्थं ॥ यथा
श्वलायनः ॥ आस्य दधिकयुग्मा ब्राह्मणा अमूलादर्भाः प्राङ्मुखो यज्ञोपवीती स्यात् प्रदक्षिणमुपचारोप
वेतिलार्थाः गंधादिदानं द्विर्द्विरुद्देर्भान्नासने दद्यात् । यवोसि सोमदेवत्यो गोसवो देवनिर्मितः । प्रत्नमद्भिः
पृक्तः पुष्ट्या नांदीमुखान्पितॄंल्लोकान्प्रीणाहि नः स्वाहा इति यवावपनं विश्वेदेवाः इदं वो अर्घ्यं नांदीमुखाः पित

रुद्रं वो ध्यं इति यथालिंगमर्घदानं पाणौ होमो ऽग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेति मधुवाता ऋतायत इ
ति त्र्यृचस्थाने उपास्मै गायता नर इति पंचमधुमतीः श्रावयेत् ब्रह्मन् मीमदंतेत्यत्र विषष्ठी माचांतेषु स्वकाशयात् गोमयेनोपलि
प्तेषुः प्राचीनाग्रान् दर्भान् संस्तीर्य तेषु उष्षदाज्यमिश्रेण स्वन्नशेषेण एकैकस्य द्वौ द्वौ पिंडौ दद्यादित्यादि यथापि
हृन्यजेतेति सामान्येनोक्तं । तथापि श्राद्धत्रयकमश्वस्यत्यंतरादवगंतव्यं ॥ यथाह शातातपः ॥ मातृश्राद्धं तु पूर्वं
स्यात्पितृणां तदनंतरं । ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतमिति ॥ अथ एकोद्दिष्टम् ॥ एकोद्दिष्टं दैवहीनमे
कार्घैकपवित्रकं । आवाहनाग्नौकरणरहितं ह्यपसव्यवत् । एकोद्दिष्टं एक एवोद्दिष्टो यस्मिन् श्राद्धे तदेकोद्दि
ष्टं इति कर्मनामधेयं । शेषं पूर्ववदाचरेत् । इत्युपसंहारान्पार्वणस्य कस्य धर्मप्राप्तौ विशेषो निधीयते । दैवही
नं वैश्वदेवरहितं । एकपात्रमेकदर्भं पवित्रकं च । आवाहनेनाग्नौकरणहोमेन च रहितं । अपसव्यवत् प्राची
नावीतिवद्ब्रह्मसूत्रवत् । अनेनांतरोक्तम्भ्रोकाम्य दयिके यज्ञोपवीतित्वं सूचयति ॥ अ ॥ किंचात्र उपतिष्ठतामक्ष
य्यस्थाने विप्रविसर्जने अभिरम्यतामिति वदेत् ऊचुस्ते अभिरताः स्म इत्युक्ते स्वस्ति वाच्यं ततः कुर्यात् हस्तयो
द्कमेवचेति । तत्राक्षय्यस्थाने उपतिष्ठतामिति वदेत् । विप्रविसर्जने कर्त्तव्ये वाजे वाज इति स्थाने अनंतरं स्त्र
रंते नाभिरम्यतामिति ब्रूयात् । ते चाभिरताः स्म इति वदेयुः । इत्युपसिद्धौ । शेषं प्रसिद्धं पूर्ववदिति यावत् । एतच्च मध्याह्ने क
र्त्तव्यं ॥ यथाह देवलः ॥ पूर्वाह्ने दैविकं श्राद्धं अपराह्ने तु पैतृके एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति ॥ ४१

जीत पितृसेविकमित्यस्यैकोद्दिष्टविशेषनिषेधो द्रष्टव्यः नवश्राद्धो ऽप्यविशिष्टं गृहे पर्युषितं च यत् । दंपत्योर्भुक्त
शिष्टं न भुंजीत कदाचनेति नवश्राद्धं दर्शितं । प्रथमेन्हि तृतीये पंचमे सप्तमे तथा नवमैकादशे चैव तन्नवश्रा
द्धमुच्यत इति ॥ अथ सपिंडीकरणम् ॥ गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयं । अर्घार्थं पितृपात्रेषु प्रेतपात्रं प्र
सेचयेत् । ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत् । एतत्सपिंडीकरणं एकोद्दिष्टं स्त्रिया अपि । गंधोदकतिलैर्युक्तं
यम पात्रचतुष्टयं पूर्वोक्तविधिना कुर्यात् । तिलैर्युक्तं पात्रचतुष्टयं वदता पितृवर्गे चत्वारो ब्राह्मणा दर्शिताः । वैश्वदेवे
द्वौ स्थितावेवात्र प्रेतपात्रोदकं किंचिद् द्वयशेषं त्रिधा विभज्य पितृपात्रेषु सेचयेत् ॥ ये समाना इति द्वाभ्यां मंत्राभ्यां से
षं वैश्वदेवावाहनादि विसर्जनांतं पूर्ववत्पार्वणवदाचरेत् । प्रेतार्घपात्रावशिष्टोदकेन प्रेतस्थान ब्राह्मणहस्ते अर्घं
दत्वा शेषमेकोद्दिष्टवत् समापयेत् । पित्रेषु पार्वणवत् । एतच्च सपिंडीकरणमनंतरोक्तं एकोद्दिष्टं च ततः प्र
युक्तं स्त्रिया अपि मातुरपि कर्त्तव्यं । एवं चाद्यता पार्वणे मातृश्राद्धं पृथक् न कर्त्तव्यमिति स्युक्तं ॥ नवति ॥ अत्र के
चनाह पितृप्रपितामहविषयं केचिद्वर्णयंति । तस्यात्रिधं तत्त्वाचेन सपिंडीकरणोत्तरकाले पिंडदानादि निवृत्त्यु
पपत्तेः । समनंतरमनस्य उत्तरत्र पिंडोदकदानादि विहितत्वान्नियुक्तः ॥ अत एवाह यमः ॥ यः सपिंडीकृतं प्रेतं पृ
थक्पिंडे नियोजयेत् । विधिघ्नस्तेन भवति पितृहा चोपजायते इति । प्रकर्षेण इतः प्रेत इति चतुर्थे प्रेतशब्दो
पपत्तेः प्रेतेत्यप एव निष्टणीयादिति च प्रयोगदर्शनात् । अपि च सपिंडीकरणं श्राद्धं दैवपूर्वं नियोजयेत् । पितृने

वाशयेत्तत्र तु नः प्रेतं न निर्दिशेत्। इति सपिंडीकरणोत्तरकालं प्रेतस्य श्राद्धादि प्रतिषेधो दृश्यते। सचानंतर्मृतस्य न
संभवत्यमावास्यादौ श्राद्धविधानात्। सपिंडं तु पुरुषे सप्तमे विनि। वर्त्तत इत्येतदपि वचनं चतुर्थस्य त्रिषु तर्नाव एव घ
टते। चतुर्थस्य पिंडत्रयव्यापित्वं पंचमस्य पिंडद्वय। व्यापित्वं षष्ठस्यैकपिंडव्यापित्वं सप्तमे विनिवृत्तिरिति पितृपात्रेषि
त्येतदपि पितृमुख्यत्वादस्मिन्नेव पक्षे घटते। नान्यथा पितामहप्रमुखत्वात्। तस्मात्पितृपात्रेषु तत्प्रेतयात्रं प्रसेचये
दिति पितुः प्रपितामहपात्रं पित्रादिपात्रेषु सेचयेदिति। तदयुक्तं। नह्यत्र पिंडसंयोजनमुत्तरत्र पिंडदानादि निवृत्ति
प्रयोजनं अपितु प्रेतनिवृत्त्या पितृत्वप्राप्त्यर्थं प्रेतत्वं च दुःखोपजनितात्यंतदुःखानुभवावस्था॥ यथा मार्कंडेय
॥:॥ प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्तिता। क्षुत्तृष्णे प्रत्यहं तत्र भवेतां भृगुनंदनेति। पितृत्वप्राप्तिश्च स्वधा श्राद्ध
देवतासंबंधः प्रोक्तो नैकोद्दिष्टसहिते न सपिंडीकरणेन प्रेतत्वनिवृत्त्या पितृत्वं प्राप्नोतीत्यवगम्यते। यस्यैतानि
न दत्तानि प्रेतश्राद्धानि षोडश। प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि। तथा। चतुरो निर्वपेत्पिंडान् पूर्वं तेषु समा
वपेत्। ततः प्रभृति वै प्रेतः। पितृसामान्यमश्नुते इत्यादिवचनात्। यः सपिंडीकृतं प्रेतमित्यादिना पृथगेकोद्दि
ष्टविधानेन पिंडदाननिषेधात्। पार्वणविधानेन सह पिंडदानमेवमम्यते तच्चेसाव स्सरिकपाक्षिकैकोद्दिष्टवि
धानेन पिंडदाननिषेधात्। पार्वणविधानेन सह पिंडदानमवगम्यते तच्चसांव। स्सरिकपाक्षिकैकोद्दिष्टविधा
नेनापोह्यते। यदपि तु नः प्रेतं न निर्दिशेत्। इति तदपि प्रेतशब्दं नोच्चारयेत् अपितु पितृशब्दमेवेत्यर्थः। नच प्र ४९

कर्षगमनात्तत्रैव तत्प्रेतशब्दः यतो विशिष्टदुःखानुभावावस्था प्रेतशब्देन रूढ्याभिधीयत इत्युक्तं। तथापि प्रमीत
मात्रे प्रेतशब्दप्रयोगः सोपि पूर्वं गत्या सपिंडास्तु पुरुषे सप्तमे विनिवर्तन्त इति च प्रथमस्य पिंडस्य चतुर्थव्यापित्वात्
द्वितीयस्य पंचमव्यापित्वात् अपित्वेकशरीरावयवान्वयेनेत्युक्तं। पितृशब्दश्च प्रेतत्वनिवृत्त्या श्राद्धदेवतान्वयं
गतेषु वर्तत इति पितृपात्रेषि त्यविरुद्धं। तस्मादनंतरमृतपात्रोदकस्य तत्पिंडस्य च पितृपात्रेषु तत्पिंडेषु च सं
सर्जनमितिस्थितं। आचार्यस्तु परमतमेवोपन्यस्तवान्। एतच्च पितुः सपिंडीकरणं पितामहादिषु त्रिषु प्र
मीतेषु वेदितव्यं। यत्तु पितरि प्रेते पितामहे प्रपितामहे वा जीवति सपिंडीकरणं नास्त्येवास्तु क्रमाच्च प्रमीतानां
नैव कार्या सपिंडता॥ इति वचनात्॥ पद्ममतवचनं॥ पिता यस्य तु वृत्तः स्यात् जीवेच्चापि पितामहः। पितुः
स नाम संकीर्त्य कीर्तयेत्प्रपितामहमिति यत्तदपि शब्दप्रयोगनियमन पिंडद्वयदानार्थं। कथं ध्रियमाणे तु पि
तरि पूर्वेषामेव निर्वपेत्। पिता यस्य तु वृत्तः स्यात् जीवेच्चापि पितामहः। सोपि पूर्वेषामेव निर्वपेदित्यादिवचनैः। य
द्यप्येपि कथं निर्वपेत्यादा। पितुः स नाम संकीर्त्य कीर्तयेत्प्रपितामहमित्याद्यत्र ग्रहणेन सर्वत्र पितृभ्यः पिता
महेभ्यः प्रपितामहेभ्य इत्येवं प्रयोगे न पुनः कदाचिदपि पितामहस्य प्रपितामहस्य चादित्वं छ्टद प्रपितामहस्य
तत्पितृवत्त्रितत्वमस्यश्च पित्रादिशब्दानां संबंधिवचनात्वात्। ध्रियमाणे तु पितरि पितुः पितृभ्यः पितामहेभ्यः प्र
पितामहेभ्यः इति पितामहे ध्रियमाणे पितामहस्य पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य इत्यत्र पिंडपितृय

शेषं दत्तां पितर इत्यादिमंत्राणां मूहेन भविष्यति॥ यदपि विष्णुस्मरणं॥ यस्य पिता प्रेतः स्यात् स पिंडं निधाय पितामह
हात् पराभ्यां द्वाभ्यां दद्यादिति। तस्याप्ययमर्थः पितामहे ध्रियमाणे प्रेते च पितरि पितुरेकं पिंडं एकोद्दिष्टविधानेन।
निधाय पितुर्यः पितामहस्ततः पराभ्यां द्वाभ्यां दद्यात् पितामह आसनेन प्रपितामहः संप्रदानत्वेन तस्मिन्न एवेति प्रपि
तामहाय तत्पराभ्यां द्वाभ्यां च दद्यात्॥ इति॥ शद्वप्रयोगानियमस्तु पूर्वैकः एवाएवं गोब्राह्मणादिहतस्यापि सपिंडी
करणाभावो वेदितव्यः॥ यथाह कात्यायनः ब्राह्मणादिहते ताते पतिते संगवर्जिते। व्युत्क्रमाच्च मृते देयं येभ्य एव ददा
त्यसाविति। गोब्राह्मणादिहतस्य पितुः सपिंडीकरणासंभवेन मुख्यपितामहादिभ्यः पार्वणविधानमुपपन्नमिति
सपिंडीकरणाभावो गम्यते। मातुः पिंडदानादौ गोत्रविप्रतिपत्तिर्भर्तृगोत्रेण पितृगोत्रेण वा दातव्यमिति। अन्यत्र
वचनात्। स्वगोत्राद्भ्रस्यते नारी विवाहात्सप्तमे पदे। स्वामिगोत्रेण कर्तव्या तस्याः पिंडोदकक्रिया। वचनं। पितृ
गोत्रं समुत्सृज्य न कुर्याद्भर्तृगोत्रतः। जन्मन्येव विपत्तौ च नारीणां पैतृकं कुलमित्यादि पितृगोत्रविषयं। इत्यादि
भर्तृगोत्रविषया एवं विप्रतिपन्ना वासुरादिविवाहेषु। पुत्रिकाकरणे च पितृगोत्रमेव॥ तत्र॥ तत्र विशेषवचना
त्। दानस्यानिर्वृत्तेश्च ब्राह्म्यादिविवाहेषु व्रीहियववत्॥ बृहद्रथंतरवत् विकल्प एव॥ तत्र च येनास्य पितरो
याता येन याताः पितामहाः। तेन यायात्सतां मार्गं तेन गच्छन्न दुष्यतीति वचनात् वंशपरंपरायातसमाचारे
ण व्यवस्था। एवं विधविषयव्यतिरेकेणास्य वचनस्य विषयांतरस्याभावात्॥ यत्र पुनः शास्त्रतो न व्यवस्था ना ४९

प्याचरस्तत्रात्मनस्तुष्टिरेव चेति वचनात् आत्मतुष्टिरेव चेद्व्यवस्थापिका। यथा गर्भाष्टमेष्टमे वाब्द इति। मातुः स
पिंडीकरणं स्मृतं। तथा भर्तृपितृभार्यायाः श्वश्र्वादिभिः सह सपिंडीकरणं कर्तव्यमिति पैठीनसिराह। अपुत्रायां मृता
यां तु पतिः कुर्यात्सपिंडतां श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेदिति। पत्या सह सपिंडीकरणं यमश्चाह।
पत्या चैकेन कर्तव्यं सपिंडीकरणं स्त्रियाः। सा मृतापि तापितैर्हि तेनैक्यं गता मंत्राहुतिर्यथेति। उशनसा तु मातामहेन
सपिंडीकरणमुक्तं। पितृपितामहेन सपिंडीकरणमुक्तं। पितृपितामहे यद्वत्पूर्णे संवत्सरे सुतैः। मातुर्मातामहे तद्व
देषा कार्या सपिंडता। तथा पिता पितामहे योज्यः पूर्णे संवत्सरे सुतैः। माता मातामहे तद्वदित्याह भगवान्बिचः। इत्येवं
विशेषवचनेषु सत्सु अपुत्रायां भार्यायां प्रमीतायां भर्ता स्वमात्रैव सापिंड्यं कुर्यात्। अन्वारोहणे तु पुत्रः स्वपित्रैव
मातुः सापिंड्यं कुर्यात्। आसुरादिविवाहोत्पन्नः पुत्रिकादिसुतश्च मातामहेनैव। ब्राह्मादिविवाहोत्पन्नः पुत्रो माता
महेन पितामह्या वा विकल्पेन कुर्यात्। अत्रापि यदि नियतो वंशसमाचारः। तदानीं तथैव कुर्यात्। वंशसमाचारेऽप्यनि
यतश्चेदात्मनस्तुष्टिरेव चेति। यथारुचि कुर्यात्। तत्र येन केनापि मातुः सापिंड्ये यत्राष्टकादिषु मातृश्राद्धं पृथक् कु
र्यादन्यत्र पतिना सह। तत्रापि पितामह्यादिभिरेव पार्वणश्राद्धं कर्तव्यं। अन्यत्र पतिना सहेति पत्नीसापिंड्ये तदंशभागित्वा
त् मातामहेन श्राद्धे सापिंड्ये तदंशभागित्वात्तेनैव सह॥ यथाह शातातपः॥ एकमूर्तित्वमायाति सपिंडीकरणे
कृते पत्नी पतिपितॄणां तु तस्मात्तदंशभागिनीति। एवं च सति। मातामहेन मातुः सापिंड्ये मातामहश्राद्धं पितृश्राद्धव

तन्नित्यमेव। पत्न्या पितामह्या वा मातुः सापिंड्ये मातामहश्राद्धं पिंडश्राद्धवत्तं नित्यमेंन नित्यं कृतेष्ठ द्वयोः कृतेनत्रस्य
वायः ॥ इति निर्णयः ॥ ब्र ॥ अर्वाक्सपिंडीकरणं यस्य संवत्सराद्भवेत्। तस्याप्यन्नं सोदकुंभं दद्यात् संवत्सरं द्विजे संव
त्सराद् अर्वाक्यस्य सपिंडीकरणं कृतं तस्याकृते प्रतिमासं वा यावत्संवत्सरं शक्त्यनुसारेण अन्नमुदकुंभसहितं ब्रा
ह्मणाय दद्यात्। अर्वाक्संवत्सरे पूर्णे प्राप्ते इति दर्शिनि ॥ यथाहाश्वलायनः ॥ अथ सपिंडीकरणं संवत्सरांते द्वादशा
हे वेति। कात्यायनोप्याह। ततः संवत्सरे पूर्णे सपिंडीकरणं त्रि। पक्षे वा यदहर्वा वृद्धिरापद्येत इति द्वादशे त्रिपक्षे वृद्धि
प्राप्तौ संवत्सरे चेति। चत्वारः पक्षा दर्शिताः। तत्र द्वादशे पित्रः सपिंडीकरणं साग्निकेन कार्यं सपिंडीकरणं। विना पिंड
पितृयज्ञासिद्धेः साग्निकस्तु यदा कर्ता प्रेतो वाप्यग्निमान् भवेत्। द्वादशाहे तदा कार्यं सपिंडीकरणं पितुरिति
वचनात्। निरग्निकस्तु त्रिपक्षे वृद्धिप्राप्तौ संवत्सरे वा कुर्यात्। यदा प्राक् संवत्सरात्सपिंडीकरणं तदा षोडशा
श्राद्धानि कृत्वा सपिंडीकरणं कार्यं तत्र सपिंडीकृत्वा स्वकाले तानि श्राद्धानि कर्तव्यानीति संशयः। तत्र यथावचन
दर्शनात्। श्राद्धानि षोडशादत्वा न तु कुर्यात्सपिंडनं। श्राद्धानि षोडशापाद्य विदधीत सपिंडनं। इति षोडश श्रा
द्धानि च द्वादशाहे त्रिपक्षे च षण्मासे मासिके द्वे के ॥ श्राद्धानि षोडशैतानि संस्मृतानि मनीषिभिरिति दर्शितानि
तथापि यस्यापि वत्सराद् अर्वाक्सपिंडीकरणं भवेत्। मासिकं चोदकुंभं च देयं तस्यापि वत्सरमिति। तत्र सपिंडीक
रणं कृत्वा स्वकाले एतानि कर्तव्यानीति प्रथमविकल्पः। अप्राप्तकालेन प्रागनधिकारात्। यदपि वचनं। षोडशश्रा ५०

द्धानि कृत्वैव सपिंडीकरणं संवत्सरात्प्रागपि कर्तव्यमिति। सायमापत्कल्पः। यदा त्वायत्कालेन प्राक्सपिंडीक
रणात्प्रेतश्राद्धानि करोति तदैकोद्दिष्टविधानेन कुर्यात्। यदा मुख्यकल्पेन स्वकाल एव तानि करोति तदा
द्धिकं श्राद्धं योयथा करोति पार्वणमेकोद्दिष्टं वा तथा मासिकानि कुर्यात्। सपिंडीकरणाद् अर्वाक् कुर्वन् श्राद्धानि
षोडश एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु सपिंडीकरणाद् ऊर्ध्वं यदा कुर्यात्तदा पुनः। प्रत्यब्दं यो यथा कुर्या
त्तथा कुर्यात्स तान्यपीति स्मरणात्। एतच्च प्रेतश्राद्धसहितं सपिंडीकरणं विभक्तधनेषु भ्रातृषु सत्सु एकेनैव
कृतेनालं न सर्वैः कर्तव्यं। नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश। एकेनैव तु कार्याणि संविभक्तधनेष्वपीति
स्मरणात्। इदं च प्रेतश्राद्धसहितं सहितसपिंडीकरणमसंन्यासिनां पुत्रादिभिर्नियमेन कार्यं। प्रेतत्वविमो
क्षार्थत्वात्। संन्यासिनां तु न कर्तव्यं ॥ यथाहोशनाः ॥ एकोद्दिष्टं न कुर्वीत यतीनामेव सर्वदा। अहन्येकादशे
प्राप्ते पार्वणं तु विधीयते। सपिंडीकरणं तेषां न कर्तव्यं सुतादिभिः ॥ त्रिदंडग्रहणादेव प्रेतत्वं नैव जायत इति
पुत्रासन्निधाने येन सगोत्रादिना दाहसंस्कारः कृतस्तेनैव दशाहात्प्रेतकर्म कर्तव्यं। असगोत्रो सगोत्रो वा
स्त्री दद्याद्यदि वा पुमान्। प्रथमेहनि यो दद्यात्स दशाहं समापयेदिति स्मरणात्। षोडशानामपेतत्कर्तव्य
ममंत्रकं शूद्रस्यापि। एवं सपिंडीकरणं मंत्रवर्जं शूद्राणां द्वादशेहनीति विष्णुस्मरणात्। सपिंडीकरणाद् ऊर्ध्वं सांव
त्सरिकपार्वणादीनि पुत्रस्य नियमेनैव अन्येषामनियतानि ॥ ब्र ॥ एकोद्दिष्टकालमाहामरतेदनित्तकर्तव्यंप्रति

मासंसंवत्सरंयावत्एकोद्दिष्टंकार्यं। सपिंडीकरणादूर्ध्वंप्रतिसंवत्सरमेकोद्दिष्टमेवकर्त्तव्यं। आद्यंसर्वैकोद्दिष्टप्रकृतिन्त
तमेकोद्दिष्टमेकादशेऽहनि। मृतदिवसापरिज्ञानेतच्छ्रवणदिवसेऽमावास्यायांवाकर्त्तव्यं। अपरिज्ञानेऽह्निअमावा
स्यायांश्रवणदिवसेवेतिस्मरणात्। अमावास्यायामितिगमनमाससंबंधिन्याअमावास्यायां। प्रवासवासरेऽज्ञेयं तन्मा
सेऽउक्तयेपिवेतिस्मरणात्। मृतेऽहनीत्यत्राहिताग्नेर्विशेषोजातकर्णिनोक्तः। कर्ध्वंत्रिपक्षात्त्यत्तुश्राद्धंमृतेऽहन्येव।
तद्भवेत्। अधस्तात्कारयेद्दाहादाहिताग्नेर्द्विजन्मनइति। त्रिपक्षादर्वाक्यत्प्रेतकर्मतद्दाहदिवसा।
दारभ्याहिताग्नेर्द्विजन्मनइति। क्रियार्थंत्रिपक्षादूर्ध्वंयत्श्राद्धंतन्मरणदिसेएवेत्यर्थः। अनाहिताग्नेस्तुसर्वंमृता
हएव। आद्यमेकादशेऽहनीतित्वाशौचापगमइतिकेचित्शुचिनाकर्मकर्त्तव्यमितिश्रुतेरंगत्वात्। अथाशौचा
पगमइतिसामान्येनोपक्रम्यएकोद्दिष्टस्यविष्णुनाविहितत्वाच्च। तदप्युक्तं। एकादशेऽह्नियच्छ्राद्धंतत्सामान्यमुदाहृ
तं। चतुर्णांनासूतकंचपृथक्पृथकइतिपैठीनसिस्मरणविरोधात्। अद्यश्राद्धमशुचोपिकुर्यादेकादशेऽहनिक
र्तुस्तात्कालिकीशुद्धिरशुद्धः पुनरेवसइतिशंखवचनविरोधाच्च। सामान्योपक्रमंविष्णुवचनंदशाहाशौचविष
यमपिघटइतिप्रतिसंवत्सरंमृतेऽहन्येकोद्दिष्टमुपदिष्टंयोगीश्वरेण। तथाचस्मृत्यंतरं। वर्षेवर्षेचकर्त्तव्यामातापि
त्रोस्तुस — —: अदैवंभोजयेच्छ्राद्धंपिंडमेकंनिर्वपेदिति। यमोप्याह। सपिंडीकरणादूर्ध्वंप्रतिसंवत्सरंसुतैः। मा
तापित्रोः पृथक्कार्यमेकोद्दिष्टंमृतेऽहनिइति। व्यासस्तु। पार्वणंप्रतिषेधइति। एकोद्दिष्टंपरित्यज्यपार्वणंकुरुते ५१

नरः। अकृतंतद्विजानीयाद्भवेच्चापिरघातकइति। जम। दग्निस्तुपार्वणमाह। आपाद्यसहपिंडत्वंतुरसोविधिवत्सुतः। कुर्वीतदर्शवच्छ्राद्धंमातापित्रोःक्षयेऽहनीति। शातातपोप्याह। सपिंडीकरणंकृत्वाकुर्यात्पार्वणवत्सदा। प्रतिसंवत्सरंविद्वानछागलेयोदितोविधिरित्येवंवचनविप्रतिपत्तौदाक्षिणात्याव्यवस्थामाहुः। अरसक्षेत्रजाभ्यांमाता
पित्रोःक्षयाहेपार्वणमेवकर्त्तव्यं। दत्तकादिभिरेकोद्दिष्टमितिजातूकर्ण्यवचनात्। प्रत्यब्दंपार्वणेनैवविधिनाक्षेत्रजौ
रसं। कुर्यातामितरेकुर्युरेकोद्दिष्टंसुतादशेतिं। तदसत्। नह्यत्रकुर्यादवचनमस्त्यपितुप्रत्यब्दमितिसंतिचाक्षय
हव्यतिरिक्तानित्यश्राद्धानिअक्षयतृतीयामाघीवैशाखीप्रभृतिषु। अतोनक्षयाहविषयपार्वणैकोद्दिष्टव्य
वस्थापनायालं। यत्तुपराशरवचनंपितृगतस्यदेवत्वमौरसस्यत्रिपौरुषं। सर्वत्रानेकगोत्राणामेकोद्दिष्टंमृतेऽह
नीति। तदपिनव्यवस्थापकं। यस्मादस्यायमर्थः। देवत्वंगतस्यसपिंडीकृतस्यपितुःसर्वत्रऔरसस्यऔरसे
नत्रिपौरुषंपार्वणंकार्यंअनेकगोत्राणांभिन्नगोत्राणांमातुलादीनांक्षयेऽहनियच्छ्राद्धंतदेकस्यैवएकोद्दिष्ट।
मेवेति। किंचसपिंडीकरणादूर्ध्वंमातापित्रोर्नपार्वणमिति। उदीच्याःपुनरेवंव्यवस्थापयंति। याहिअमावा।
स्यायांनाडबदकृष्णपक्षेवामृताहेपार्वणमन्यत्रमृताहन्येकोद्दिष्टमेवेति। अमावास्याक्षयोयस्यप्रेतपक्षे
थवापुनः। पार्वणंतत्रकर्त्तव्यंनैकोद्दिष्टंकदाचनेतिस्मरणात्। एतदपिनाद्रियंतेऽस्यात्रनिश्चितमूलेनानेन
वचनेनविहितमूलानांबहूनांक्षयाहमात्रपार्वणविषयाणांवचनानांअमावास्याप्रेतपक्षमृताहविषय

त्वेनातिसंकोचस्यायुक्तत्वात्। सामान्यवचनानर्थक्याच्च तत्र हि सामान्यवचस्य विशेषवचनेनोपसंहारो यत्र सामान्ये
विशेषसंबंधज्ञानेन वचनद्वयमर्थवत् यथा सप्तदश सामिधेनीरनुब्रूयादित्यनारभ्याधीयीतस्य विकृतिमात्रयस्य
साप्तदशवाक्यस्य सामिधेनीरनुब्रूयादित्यनारभ्याधीयीतस्य विकृतिमात्रयस्य साप्तदशवाक्यस्य सामिधेनीरुद्धण।
धारसंबंधे नार्थवत्तो मित्रविंदाप्रकदिप्रकरणपठितेन सप्तदशवाक्येन विंदध्यधिकारादूर्ध्वसंबंधबोधनेनार्थवता
मित्रविंदादिप्रकरणपठितेन सप्तदशवाक्येनोपसंहारः। इह तूभयोर्मृताहमात्रविषयत्वान्नार्थवत्तेति अतो
न पाक्षिक एकोद्दिष्टनिवृत्तिफलतया पार्वणनियमविधानमयुक्तं। न चैकोद्दिष्टवचनानां मातापित्रक्षयाहादिविष
यत्वेन। पार्वणवचनानां च तदन्यक्षयाहविषयत्वेन व्यवस्थायुक्ता तेन यत्रापि मातापितृयक्षणस्य विद्यमानत्वा
त्। सपिंडीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः। मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृतेहनीति। तथा आपाद्य सहपिंड
त्वमौरसो विधिवत्सुतः। कुर्वीत दर्शवच्छ्राद्धं मातापित्रोः क्षयेहनीति यदपि केश्चिदुच्यते मातापित्रोः क्षयाहे साग्निः
पार्वणं कुर्यान्निरग्निरेकोद्दिष्टमिति। वर्षे वर्षे तु सुतः कुर्यात् पार्वणं साग्निमान् द्विजः। पित्रोरनग्निमान् धीर एको
द्दिष्टं मृतेहनीति सुमन्तुस्मरणात्। तदपि सत्प्रतिपक्षत्वादुपेक्षणीयं वक्ष्यमाणयज्ञस्य येपि प्राये चैकाग्नय एव वा। ते
षां सपिंडीकरणादूर्ध्वमेकोद्दिष्टं न पार्वणमिति स्मरणात्। सपिंडीकरणाभावात् पार्वणं तस्य सर्वदेति प्रचेतःस्मरणात् ५२
अमावास्याक्षयाहे प्रेतक्षयाहे च पार्वणमेव। अमावास्याक्षयो यस्य प्रेतपक्षेथ दानरित्यादिवचनस्योक्तनित्यं

नियमपरत्वात्॥ अन्यत्र क्षयाहे पार्वणैकोद्दिष्टयोर्व्रीहियववद्विकल्प एव। तत्रापि वंशसमाचारतो व्यवस्थायांसांसं
नैत्विक इत्यलमतिप्रसंगेन॥ मू॥: नित्यश्राद्धव्यतिरिक्तसर्वश्राद्धशेषमिदमभिधीयते। पिंडांस्तु गोजविप्रेभ्यो
दद्यादग्नौ जलेपि वा। प्रक्षिपेत्सत्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेत्। सर्वदत्तानां पिंडानां पिंडस्य वा प्राशनियच्छिरिवंग
वेऽजाय ब्राह्मणाय वा तदर्थिने पिंडान् दद्यात्। अग्नावप्सु जले वा प्रक्षिपेत्। किं च सत्सु विप्रेषु भोजनदेशावस्थिते
षु द्विजोच्छिष्टं न मार्जयेन्नो वासयेत्॥ मू॥: नेन्यविशेषेण फलविशेषमाह हविष्यान्नेन चैमासं पायसेन तु व
त्सरं। मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः। ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमं। मासवृद्ध्याभितृप्यंति दत्तैरि
हपितामहाः। हविष्यहविर्योग्यं तिलव्रीह्यादि॥ यथाह मनुः॥ तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा। दत्तेन मा
सं प्रीयंते विधिवत् पितरो नृणामिति। तदन्नं हविष्यान्नं तेन मासं पितरस्तृप्यंति अनन्तरेनान्वयः॥ पायसेन गव्यप
यः सिद्धेन। संवत्सरं तृप्यंति पायसेन चेति स्मरणात्। मत्स्यो मत्स्यः पाठीनादी तस्य मांसं मात्स्यं हरिणस्ता
म्रमृगः। ऐणः कृष्णस्तयोर्द्वयः ताम्रो हरिण उच्यते। इत्यायुर्वेदस्मरणात्। तस्येदं हारिणं। कौरभ्रमाविक उरभ्रस्तस्य मांसं
औरभ्रं शाकुनं तित्तिरपक्षिसंबंधि। छागोऽजः तस्य छागं चित्रमृगः। तन्मांसं पार्षतं। ऐणः कृष्णमृगस्तस्य पिशितमै
णं रुरुर्गौरस्तस्यायं रौरवं। वाराहमारण्यसूकरजं वाराहं॥ शशस्येदं शाशं। एभिर्मांसैः पितृभ्यो दत्तैर्विषेप्रा
न्वेन मासमित्युक्तात्तत ऊर्ध्वं यथाक्रमं एकैकमासवृद्ध्या पितरस्तृप्यंति॥ मू॥ किं च खड्गामिषं महाशल्कं मधु

मुन्यन्नमेव वा लोहामिषं महाशाकं। मांसं वाध्रीणसस्य च। यद्ददाति गयास्थश्च सर्वमानन्त्यमश्नुते। तथा वर्ष
त्रयोदश्यां मघासु च विशेषतः। खड्गो गंडकः तस्य मांसं महाशल्को मत्स्यभेदः। मधु माक्षिकं। मुन्यन्नं सर्वमा
रण्यनीवारादि। लोहो रक्तश्छागस्तदामिषं लोहामिषं। महाशाकं कालशाकं। वाध्रीणसो वृद्धश्वेतच्छागः। त्रिपि
बं त्विंद्रियक्षीणं श्वेतं वृद्धमजायतिं। वाध्रीणसं तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि। इति याज्ञिकप्रसिद्धः॥
त्रिभिः पिबतीति त्रिपिबः। पिबतः कर्णजिह्वं यस्य जलं स्पृशति स त्रिभिः पिबतीति त्रिपिबः। तस्य वाध्रीणस
स्य मांसं यद्ददाति गयास्थश्च यत्किंचिच्छागादिकं अपि गयास्थो ददाति चराशान्नं गयाधारा विष्णुचं गंगाद्वारे प्रया
गे च नैमिषे पुष्करेऽर्बुदे। संनिहत्यां गयायां च श्राद्धमक्षय्यतां व्रजेत्॥ आनन्त्यमश्नुते अनंतफलहेतुत्वं प्रा
प्नोति। आनंत्यं फलमश्नुत इति प्रत्येकमभिसंबध्यते। तथा वर्षत्रयोदश्यां भाद्रपदकृष्णपक्षत्रयोदश्यां विशे
षतो मघायुक्तायां यत्किंचि। दीयते तत्सर्वमानन्त्यमश्नुत इति गतेन संबंधः। अत्र यद्यपि मुन्यन्नमांसमध्वा
दीनि सर्ववर्णानां सामान्येन श्राद्धयोग्यानि दर्शितानि तथापि कुलस्य कालस्वाम्यादरीणीया। मुन्यन्नं ब्राह्म
णस्योक्तं मांसं क्षत्रियवैश्ययोः। मधुप्रधानं शूद्रस्य सर्वेषां चाविरोधि यदिति। अस्यार्थः। मुन्यन्नं नीवारादि या
श्राद्धयोग्यमुक्तं तद्ब्राह्मणस्य प्रधानं समग्रफलदं। यच्च मांसं तत्क्षत्रियवैश्ययोः प्रधानं। यच्च मधु तच्छू ५२
द्रस्य। एतत्त्रयव्यतिरिक्तं यद्व्रीहितिलवास्तुकादि यच्च विहितं तद्विशाककालशाकादि तत्सर्वेषां समग्रफल

दमिति॥२॥ तिथिविशेषफलविशेषमाह कन्यां कन्यावेदिनश्च पशून्वै सत्सुतानपि। द्यूतं कृषिं वाणिज्यं द्विशफैक
शफांस्तथा। ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरूप्ये सकुप्यके। ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति सर्वदः सदा॥ प्रतिपत्प्र
भृति ह्येकां वर्जयित्वा चतुर्दशीं। शस्त्रेण वै हता ये वै तेभ्यस्तत्र प्रदीयते। कन्या रूपलक्षणशीलवती। कन्यावेदिनो
जामातरो रूपलक्षणसंपन्नाः॥ पशवः क्षुद्राः अजादयः। सत्सुतान् सन्मार्गगाः॥ द्यूतं द्यूतविजयः॥ कृषिः कृषिफलं।
वाणिज्यलाभः। द्विशफा गवादयः॥ एकशफाः। अश्वादयः। ब्रह्मवर्चस्विनः पुत्राः वेदाध्ययनतदर्थानुष्ठानप्रतिसं
तब्रह्मवर्चतेजः तेजः तद्वंतः। स्वर्णरूप्ये हेमरजते तद्व्यतिरिक्तं त्रपुसीसादिकुप्यं च। ज्ञातिश्रैष्ठ्यं ज्ञातिषूत्कृष्टत्वं स
ए र्वकामाः काम्यंत इति कामाः स्वर्गपुत्रपश्वादयः। तानि कन्यादीनि चतुर्दशफलानि कृष्णपक्षप्रतिपत्प्रभृत्यमा
वास्यापर्यंतासु चतुर्दशीवर्जितासु चतुर्दशसु तिथिषु श्राद्धदो। यथाक्रममाप्नोति। ये केचन शस्त्रेण हतास्तेभ्यः कृ
ष्णपक्षचतुर्दश्यां एकोद्दिष्टविधानेन श्राद्धं दद्यात् समत्वमागतस्यापि पितुः। शस्त्रहतस्य वै एकोद्दिष्टं सुतैः कार्यं चतु
र्दश्यां महालय इति स्मरणात्। यदि ब्राह्मणादिहतानां भवति समत्वमागतस्य सपिंडीकृतस्य महालये भाद्र
पदकृष्णपक्षे चतुर्दश्यां शस्त्रहतस्यैव नान्यस्येति नियमात्। न पुनः शस्त्रहतस्य चतुर्दश्यामेवेति। अतश्च द्वयाद
दौ शस्त्रहतस्यापि यथाप्राप्तमेव श्राद्धं न च भाद्रपदकृष्णपक्षे एकार्यं विधिरिति मंतव्यं। प्रोष्ठपदापरपक्षे मासि चै

वमिति शौनकस्मरणात् ॥ ३ ॥ नक्षत्रविशेषात्फलविशेषमाह। स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा। पुत्रान् श्रै-
ष्ठ्यं ससौभाग्यं समृद्धिं मुख्यतां शुभं। प्रवृत्तचक्रतां चैव वाणिज्यप्रभृतीनपि। अरोगित्वं यशो वीतशोकतां परमां गतिं
धनं वेदान् भिषक्सिद्धिं कुप्यं गा अप्यजाविकं। अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति। कृत्तिकादिभरण्यंत
स कामानाप्नुयादिमान्। आस्तिकः श्रद्दधानश्च व्यपेतमदमत्सरः। कृत्तिकादिभरण्यंतं प्रतिनक्षत्रं यः श्राद्धं द-
दाति स यथाक्रमं स्वर्गादीनायुःपर्यंतान् कामानाप्नोति। यद्यास्तिकः श्रद्दधानश्च व्यपेतमदमत्सरश्च भ-
वति। आस्तिको विश्वासवान् श्रद्दधान आदरातिशययुक्तः। व्यपेतमदमत्सरः। मदो गर्वः मत्सर ईर्ष्या ताभ्यां रहि-
तः। स्वर्गो निरतिशयसुखं। अपत्यमविशेषेण। ओजः आत्मशक्त्यतिशयः। शौर्यं निर्भयत्वं। क्षेत्रं फलवत्। बलं शारीरं
पुत्रो गुणवान्। श्रैष्ठ्यं ज्ञातिषु। सौभाग्यं जनप्रियता। समृद्धिः धनादेः। मुख्यता अग्रनायकत्वं। सामान्येन प्रवृत्तचक्रता आज्ञा-
तस्खलिताज्ञाता। वाणिज्यप्रभृतयः वाणिज्यकृषिकुसीदगोरक्षा। अरोगित्वं अनामयत्वं। यशः प्रख्यातिः। वीतशोकता
इष्टवियोगादिजनितदुःखाभावः। परमा गतिः ब्रह्मलोकप्राप्तिः। धनं सुवर्णादि। वेदाः ऋग्वेदादयः। भिषक्सिद्धिः औष-
धफलं। कुप्यं सुवर्णरजतव्यतिरिक्तं ताम्रादि। गावः प्रसिद्धाः। अजाः अवयश्च। अश्वाश्च आयुर्दीर्घजीवितं। मास-
श्राद्धानि रूपैर्दत्तैरिह पितामहा इति। अनेन पितॄणां श्राद्धेन तृप्तिर्भवतीत्युक्तं तदनुपपन्नं। प्रातिस्विकशुभाशुभकर्मव ५८

शेन स्वर्गनरकादिगतानां मनुष्याणां पुत्रादिभिर्दत्तैरन्नपानादिभिस्तृप्त्यसंभवात्। संभवे वा पि स्वयमात्मनामप्यनीशानाः
कथं स्वर्गादिफलं प्रयच्छंतीत्यत आह ॥ ३ ॥ वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः। प्रीणयंति मनुष्याणां पि-
तॄन् श्राद्धेन तर्पिताः। आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च। प्रयच्छंति तथा राज्यं प्रीता नृणां पितामहान्। वसुरुद्रे-
दित्याप एव श्राद्धकर्मणि संप्रदानभूताः पित्रादिशब्दैरुच्यंते। किं त्वधिष्ठातृवस्वादिदेवता एव। यथा देवदत्तादिशब्दे-
न शरीरमात्रं नाप्यात्मा किंतु शरीरविशिष्ट आत्मा न उच्यंते। एवं अधिष्ठातृदेवतासहिता एव देवदत्तादयः पित्रा-
दिशब्दैरुच्यंते। अतश्चाधिष्ठातृदेवता वस्वादयः पुत्रादिभिर्दत्तैरन्नादिभिर्नाटशाः संतस्तानपि देवदत्तादींस्तर्प-
यंति कर्तॄंश्च पुत्रादीन् फलेन संयोजयंति। यथा माता गर्भपोषणाय अन्यदत्तेन दौहृदान्नपानादिना स्वयं तृप्ता च नर
मासनीस्वजठरगतमपत्यं तर्पयति। दौहृदान्नदाभि तस्य प्रत्युपकारेण फलेन संयोजयति ॥ तद्वद्वसुरुद्रश्चादितिसु- स
ता आदित्या एते रः। पितृपितामहप्रपितामहशब्दवाच्याः न केवलं देवदत्तादय एव श्राद्धदेवताः श्राद्धकर्मणि संप्रदा-
नभूताः किंतु मनुष्याणां पितॄन् देवदत्तादीन् स्वयं श्राद्धेन तर्पिताः तर्पयंति। ज्ञानशक्त्यतिशययोगेन। किं च न के-
वलं पितॄन् तर्पयंति अपि तु श्राद्धकारिणः आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि राज्यं च कारात्तु च तत्र आत्मनो-
मन्यादि पिफलं स्वयं प्रीताः। पितामहा वस्वादयः प्रयच्छंतीति॥ ॥ इति श्राद्धप्रकरणम्॥ १० ॥ इष्टादृष्टफलसा-
धनानि कर्माण्यभिहितानि अभिधास्यंते च तेषां स्वरूपनिष्पत्तिः फलसाधनत्वं चाविघ्नेन भवतीत्यविघ्नार्थं कर्म विघ्ना

स्यन्विघ्नस्यकारकज्ञापकहेतूनाह॥ विनायकः कर्मविघ्नसिध्यर्थमित्यादिना॥ अन्वयव्यतिरेकहेतुपरिज्ञानात्। विघ्न
स्यप्रागभवपरिपालयोनापस्थितस्यप्रध्वंसायवाप्रेक्षापूर्वकारिणः प्रवर्त्तंते। रोगस्येवान्वयव्यतिरेकहेतुपरिज्ञाना
त्॥ २॥ विनायकः कर्मविघ्नसिध्यर्थंविनियोजितः। गणानामाधिपत्येच रुद्रेणब्रह्मणातथा। विनायकोविघ्ने
श्वरः। पुरुषार्थसाधनानांकर्मणांविघ्नसिध्यर्थंस्वरूपफलसाधनत्वविघातसिद्धयेविनियोजितोनियुक्तः रुद्रेण
ब्रह्मणाचकारात्विष्णुनाचगणानांपुष्पदंतप्रभृतीनांआधिपत्येस्वाम्येच॥ ३॥ एवंविघ्नस्यकारकहेतुमुक्त्वा
ज्ञापकहेतुदर्शनार्थमाह। तेनोपसृष्टोयस्तस्यलक्षणानिनिबोधमेत॥ स्वप्नेवगाहतेत्यर्थंजलंमुंडांश्चपश्यति
काषायवाससश्चैवक्रव्यादांश्चाधिरोहति। चांत्यजैर्गर्द्दभैरुष्ट्रैःसहैकत्रावतिष्ठते व्रजन्नपितथात्मानंमन्यते
नुगतंपरैः। तेनविनायकेनोपसृष्टोगृहीतोयस्तस्यलक्षणानिज्ञापकानिजानीध्वंहेमुनयः। पुनर्मुनीनांप्रत्यव
मर्शः शांतिप्रकरणप्रारंभार्थः स्वप्नेस्वप्नावस्थायांजलमत्यर्थमवगाहते। श्रोतसाह्यतेनिमज्जतिवामुंडितशिरः
सः पुरुषान्पश्यति। कषायवाससोरक्तनीलप्रावरणांश्च। क्रव्यादानामममांसाशिनः पक्षिणोगृध्रादीन्मृगांश्चव्या
घ्रादीनधिरोहति। तथांत्यजैश्चांडालादिभिःगर्द्दभैःखरैरुष्ट्रैःक्रमेलकैश्चसहपरिवृतः एकत्रतिष्ठति। व्रजन्गच्छ २
न्नात्मानंपरैः शत्रुभिःदृष्टतोधावद्भिरनुगतमभिद्रूयमाणंमन्यते॥ ४॥ एवंदुःस्वप्नदर्शनान्युक्त्वाप्रत्यक्षलिंगान्या
ह। विमनाविफलारंभः संसीदत्यनिमित्ततः। तेनोपसृष्टोलभतेनराज्यंराजनंदनः। कुमारीनचभर्त्तारमपत्यंग ५५

र्भमंगना। आचार्यत्वंश्रोत्रियश्चनशिष्योध्ययनंतथा। वणिक्लाभंनचाप्नोतिकृषिंचापिकृषीवलः। विमनावि
क्षिप्तचित्तः॥ विफलारंभः॥ विफलआरंभोयस्यासाविफलारंभः। नक्वचित्फलमाप्नोति। संसीदत्यनिमित्ततः
विनाकारणेनदीनमनस्कोभवति। राजनंदनोराजकुलजातः श्रुतशौर्यादिगुणयुक्तोराज्यंनलभते॥ कुमारीरू
पलक्षणाभिजनादिसंपन्नापीप्सितंभर्त्तारं। अंगनागर्भिणीअपत्यसुतमतीगर्भी अध्ययनतदर्थज्ञानेसत्यपि
आचार्यत्वंश्रोत्रियः। विनयाचारादियुक्तोपिशिष्योध्ययनंश्रवणंवा। नलभतइतिसर्वत्रसंबध्यते। वणिग्वा
णिज्योपायवीजीतत्रक्रयशालोपिक्षान्नादिक्रयविक्रयादिषुलाभं। कृषीवलः कर्षकस्तत्राभियुक्तोपिकृषिफलंना
प्नोति। एवंयोयथावृत्त्याजीवतितत्रनिष्फलारंभश्चेत्तर्हितेनोपसृष्टोवेदितव्यः॥ एवंकारकज्ञापकहेतूनभिधाय
विघ्नोपशांतयेकर्मविधातुमाह। स्नपनंतस्यकर्त्तव्यंपुण्येह्निविधिपूर्वकं। गौरसर्षपकल्केनसाज्येनोत्सादितस्य
सर्वौषधीः सर्वगंधैर्विलिप्तशिरसस्तथा। भद्रासनोपविष्टस्यस्वस्तिवाच्याद्विजाःशुभाः। तस्यविनायकोपसृष्ट
स्यानागतविनायकोपसर्गपरिहारार्थिनोवास्नपनमभिषेचनंकर्त्तव्यंपुण्येस्वानुकूलेनादियुक्तेह्निदिवसेन
रात्रौविधिपूर्वकंशास्त्रोक्तेतिकर्त्तव्यतासहितंस्नपनविधिमाह। गौरसर्षपकल्केनसिद्धार्थपिष्टेनसाज्येनघृत
लोडीकृतेनउत्सादितस्योद्वर्त्तितांगस्यतथासर्वौषधैःप्रियंगुगोरोचनकेसरादिभिः सर्वगंधैश्चंदनागुरुकर्पूरक
स्तूरिकादिभिर्विलिप्तशिरसोवक्ष्यमाणभद्रासनोपविष्टस्यद्विजाब्राह्मणाः शुभाः श्रुताध्ययनवृत्तसंपन्नाः

शोभनक्तयश्च। चत्वारोस्यस्वस्तिमंतोक्तं वेंडइतिवाच्याः। अस्मिन्समयेगृह्योक्तमार्गेणपुण्याहवाचनंकुर्यादि
त्यर्थः॥ ७॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्॥ मृत्तिकारोचनंगंधान्गुग्गुलंचाप्सुनिक्षिपेत्
यत्राहृताह्येकवर्णैश्चतुर्भिःकलशैर्ह्रदात्॥ चर्मण्यानडुहेरक्ते स्थाप्यंभद्रासनंततः॥ अश्वस्थानगजस्थानव
ल्मीकसरित्संगमाशोषण्ह्रदेभ्यआहृतंपंचविधांमृदंगोरोचनांधान्यचंदनकुंकुमागुरुप्रभृतीन्गुग्गुलंचतास्व
प्सुनिक्षिपेत्। यत्राप्यत्राहृताएकवर्णैःसमानवर्णैश्चतुर्भिःकुंभैरव्रणास्फुटिकातालकैः। ह्रदात्अशोष्यात्
संगमाद्वा। ततश्चानडुहेचर्मणिरक्ते लोहितवर्णेउत्तरलोम्निप्राचीनग्रीवेनंद्यमनोरमभासनंश्रीपर्णीनिर्मितंस्था
प्यं। ततउक्तोदकमृत्तिकागंधादिसहितांश्चूतादिपल्लवोपशोभितान्स्रगादिवेष्टितकंठान्चंदनचर्चितान्नवा
हतवस्त्रेच्छादितान्चतसृषुपूर्वादिदिक्षुस्थापयित्वाश्चैवोपलिप्तेस्थंडिलेरचितपंचवर्णस्वस्तिकेलोहितमानडु
हचर्मोत्तरलोमप्राचीवमास्तीर्यतस्योपरिभद्रवस्त्रप्रबाहितंआसनंस्थापयेत्॥ इत्येतद्भद्रासनं। एतस्मिन्नुपवि
ष्टस्यस्वस्तिवाच्याद्विजाः॥ ८॥ सहस्राक्षंशतधारमृषिभिःपावनंकृतं। तेनत्वामभिषिंचामिपावमान्यःपुनंतुते।
स्वस्तिवाचनानंतरंजीवत्पतिपुत्राभिरूपशालिनीभिःसुवेषाभिःकृतमंगलप्रवादिग्देशावस्थितंकलशमादायाने
नमंत्रेणाभिषेचयेद्गुरुः। सहस्रमनेकशक्तिकंशतधारंबहुप्रवाहंऋषिभिःमन्वादिभिर्यदुदकंपावनंपवित्रंकृ
तमुत्पादितं तेनोदकेनविनायकोपसृष्टविनायकोपसर्गशांतयेअभिषिंचामि। पावमान्यश्चैतास्त्रापस्त्वांपुनंतु। ९ ४६

तदनंतरंदक्षिणदेशावस्थितंद्वितीयंकलशमादायानेनमंत्रेणाभिषिंचेत्। भगंतेवरुणोराजाभगंसूर्योबृहद
स्पतिः। भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुरिति॥ १०॥ ततस्तृतीयकलशमादायानेनमंत्रेणाभिषिंचेत्॥
यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्द्धनि। ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुतेसदा। तेतवकेशेषुयत्दौर्भाग्यं
अकल्याणंसीमंतेमूर्द्धिललाटेकर्णयोरक्ष्णोश्चतत्सर्वमापोदेव्योघ्नंतुउपशमयंतुसदासर्वदेति। ततश्चतुर्थक
लशमादायसव्येकौशास्त्रिभिर्मंत्रैरभिषिंचेत्सर्वैर्मंत्रैश्चचतुर्थमिति॥ ततश्चचतुर्थंकलशमादायसव्येकौशास्त्रिभिर्मं
त्रैरभिषिंचेत्सर्वैर्मंत्रैश्चचतुर्थमिति। स्मृतिलिंगात्॥ ११॥ स्नातस्यसार्षपंतैलंस्रुवेणौडुंबरेणचाजुहुयान्मूर्द्ध
निकुशान्सव्येनपरिगृह्यच। उक्तेनप्रकारेणकृताभिषेकस्यमूर्द्धनिसव्यपाणिगृहीतकुशांतर्हितेसार्षपं
तैलंऔदुंबरेणस्रुवेणवक्ष्यमाणमंत्रेणमंत्रैर्जुहुयादाचार्यः॥ १२॥ मितश्च॥ संमितश्चैवतथाशाल
कटंकटौ। कूष्मांडोराजपुत्रश्चेत्यंतेस्वाहासमन्वितैः। नामभिर्बलिमंत्रैश्चनमस्कारसमन्वितैः। मितसंमि
ताद्भिर्विनायकनामभिःस्वाहाकारांतैःप्रणवाद्यैर्जुहुयादितिगतेनसंबंधः। स्वाहाकारयोगाच्चचतुर्थीवि
भक्तिरतश्च। ॐमितायस्वाहा१ ॐसंमितायस्वाहा२ ॐशालायस्वाहा। ३। ॐकटंकटायस्वाहा। ४ कूष्मांडायस्वाहा
५ ॐराजपुत्रायस्वाहा॥ ६ इतिषण्मंत्राभवंति। अनंतरंलौकिकेग्नौस्थालीपाकविधिनाचरुंश्रपयित्वैवएतैरेव

षड्भिर्मंत्रैस्तस्मिंस्तेवाग्नौकृत्वा तच्छेषंबलिमंत्रैरिंद्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानंतानाम्नामन्ति
श्चतुर्थ्यंतैर्नमोन्वितैस्तेभ्योबलिंदद्यात्॥ २ ॥ अनंतरंकिंकुर्यादित्याह॥ दद्याच्चतुष्पथेशूर्पेकुशानास्तीर्य
सर्वतः। कृताकृतांस्तंडुलांश्चपललौदनमेवच। मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेवतु॥ पुष्पंचित्रंसुगं
धंचसुरांचत्रिविधामपि। मूलकंपूरिकांपूपांस्तथैवेंडेरकस्रजः॥ दध्यन्नंपायसंचैवगुडमिश्रंसमोदकं॥ ए
तान्सर्वानुपाहृत्यभूमौकृत्वाततःशिरः॥ विनायकस्यजननीमुपतिष्ठेत्ततोंबिकां॥ कृताकृतान्पदार
विनायकस्योपहृत्यसन्निधानेकृत्वाभूम्यांशिरसाभिगत्वा तत्पुरुषायविघ्नेशायवक्रतुंडायधीमहि। तन्नोदंती
प्रचोदयादित्यनेनमंत्रेणविनायकं। सुभगायैविघ्नेशकामममालिन्यैधीमहि। तन्नोगौरीप्रचोदयात्। इत्यनेनां
बिकांचनमस्कुर्यात्। ततः उपहारशेषमास्तीर्णकुशाग्र्येनिधायचतुष्पथेनिदध्यात्। बलिंगृह्णंत्विमेदेवाः आ
दित्यावसवस्तथा। मरुतोथाश्विनौरुद्राः सुपर्णाःपन्नगाग्रहाः। असुरायातुधानाश्चपिशाचामातरोनगाः। आ
किन्योयक्षवेतालायोगिन्यःपूतनाःशिवाः। जृंभकाःसिद्धगंधर्वाःमालाविद्याधरानराः। दिक्पालालोकपालाश्च
येचविघ्नविनायकाः। जगतांशांतिकर्तारोब्रह्माद्याश्चमहर्षयः। माविघ्नोमाचमेपापंमासंतुपरिपंथिनः। सौम्याभवं
तुतृप्ताश्चभूतप्रेताःसुखावहाः। इत्येतैर्मंत्रैः कृताकृताःसक्तुदवदतास्तंडुलाः। पललंतिलपिष्टं। सुखावेष्टाः इत्ये ५७

तैर्मृष्टंतन्मिश्रमोदनः। मत्स्याःपक्वाअपक्वाश्च मांसमेतावदेवपक्वमपक्वंच पुष्पंचित्रंरक्तपीतादिनानावर्णंचंदनादिसु
गंधिद्रव्यंसुरांत्रिविधांगौडीमाध्वीपैष्टीच मूलकंकंदविशेषः॥ पूरिकाप्रसिद्धा॥ अपूपोऽस्नेहपक्वोगोधूमवि
कारः। वडेरिकास्रजः। वडेरिकामाषपिष्टादिमय्यः॥ तन्मयाःस्रजः॥ दध्यन्नंदधिमिश्रमन्नं पायसंक्षैरेयी॥ गुडमिश्रंशा
ल्यादिपिष्टं। मोदकालड्डुकाः। अनंतरंविनायकंतज्जननींचांबिकांवक्ष्यमाणमंत्रेणोपतिष्ठेत॥ ३॥ किंकृत्वेत्याह
॥दूर्वासर्षपपुष्पाणांदत्वार्घंपूर्णमंजलिं। रक्तपुष्पोदकेनार्घंदत्वादूर्वासर्षपपुष्पाणांपूर्णमंजलिंदत्वाउपतिष्ठेतेति
गतेनसंबंधः॥ ४॥ उपस्थानमाह। रूपंदेहियशोदेहिभगंभगवतिदेहिमे॥ पुत्रान्देहिधनंदेहिसर्वकामांश्चदेहिमे
विनायकोपस्थानेनगवन्निह॥ ५॥ ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः। ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मं
गुरोरपि। ततोभिषेकानंतरंयजमानःशुक्लांबरधरःशुक्लमाल्यानुलेपनोब्राह्मणान्भोजयेत्तयथाशक्ति। गुरवेश्रु
ताध्ययनसंपन्नायदृष्टवत्तेविनायकस्नपनविधिज्ञायवस्त्रयुग्मंदद्यात्॥ अपिशब्दात्तयथाशक्तिदक्षिणांचविना
यकोद्देशेनब्राह्मणेभ्यश्च॥ ६॥ तत्रायंप्रयोगक्रमः। चतुर्भिर्ब्राह्मणैःसार्धंउक्तलक्षणोगुरुर्नवशासनस्नानानंतरं
तत्सन्निधौविनायकंतज्जननींचोक्तमंत्राभ्यांगंधपुष्पादिभिःसमभ्यर्च्यचरुंश्रपयित्वाभद्रासनोपविष्टस्ययजमान
स्यपुण्याहवाचनंकृत्वाचतुर्भिःकलशैरभिषिच्यशिरसिकृत्वाचरुहोमंविधायाभिषेकशालायादिक्ष्विंद्रादिदिक्पा
लेभ्योबलिंदद्यात्। यजमानस्तुस्नानानंतरंशुक्लमाल्यांबरधरोगुरुणासहितोविनायकांबिकाभ्यामुपहारंदत्वाशि

रसान्नं भृंगराजरक्तकुसुमोदकेनार्घं दत्त्वा दूर्वासर्षपपुष्पाणां अंजलिं दत्त्वा विनायकमंबिकां चोपतिष्ठेत् गुरुरु
पहारशेषं सूर्यैकं दत्त्वा चत्वरे विदध्यात् ॥ अनंतरं ॥ वस्त्रयुग्मं दक्षिणां ब्राह्मणभोजनं च दद्यादिति ॥ ॥इति विना
यकस्नपनविधिः ॥ ॥अस्यैव विनायकस्नपनस्योक्तोपसंहारेण संयोगांतरं दर्शयितुमाह ॥ एवं विनायकं पूज्य ग्र
हांश्चैव विधानतः । कर्मणां फलमाप्नोति श्रियं चाप्नोत्यनुत्तमां ॥ एवं उक्तेन प्रकारेण विनायकं संपूज्य कर्मणां फलम
विघ्नेनाप्नोति इत्युक्तोपसंहारः । संयोगांतरमाह । श्रियं चोक्तलक्षणमाप्नोति ॥ इति श्रीकामश्चानेनैव विधानेन विना
यकं पूजयेदित्यर्थः । आदित्यादिग्रहपीडोपशांतिकामस्य लक्ष्म्यादिकामस्य च ग्रहपूजाकर्म विधास्यन् ग्रहपू
जाकर्म विधास्यन् ग्रहपूजामुपक्षिपति । ग्रहांश्चैव विधानत इति ग्रहानादित्यादीन् वक्ष्यमाणेन विधिना संपूज्य
कर्मणां सिद्धिमाप्नोति श्रियं चाप्नोति ॥ ३ ॥ नित्यकाम्यसंयोगानाह ॥ आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा
महागणपतेश्चैव कुर्वन् सिद्धिमवाप्नुयात् ॥ आदित्यस्य भगवतः सदा प्रतिदिवसं रक्तचंदनकुसुमादिभिः पूजां
कुर्वन् स्कंदस्य महागणपतेश्च नित्यं पूजां कुर्वन् सिद्धिं मोक्षं आत्मज्ञानद्वारेण प्राप्नोतीति नित्यसंयोगः । आ
दित्यस्कंदमहागणपतीनां अन्यतमस्य सर्वेषां वा तिलकं स्वर्णनिर्मितं रूप्यादिनिर्मितं वा कुर्वन् सिद्धिमभिल
षितामाप्नोति तथा च सुधी चेति कामसंयोगः ॥ ॥इति गणपतिकल्पः ॥ ॥ग्रहांश्चैव विधानतः कर्मणां फ ५९
लं सिद्धिः श्रीश्च फलमित्युक्तं ॥ इदानीं कर्मांतराण्याह ॥ श्रीकामः शांतिकामो वा ग्रहयज्ञं समाचरेत् ॥ वृष्ट्यायुःपु
माप्नोति श्रियं चाप्नोत्यनुत्तमां इत्यनेन ग्रहपूजायाः कर्मणामविघ्नेन फल । ५ १

ष्टिकामो वा तथैवाभिचरन्नपि ॥ श्रीकाम इति पूर्वोक्तस्यानुवादः । शांतिकाम आपदुपशांतिकामः । सस्यादिवृध्यर्थं
वर्षणं वृष्टिः । आयुरपमृत्युजयेन दीर्घकालजीवनं पुष्टिरनवद्यशरीरत्वमेतान् कामयत इति वृष्ट्यायुःपुष्टिकाम एते श्री
कामादयो ग्रहयज्ञं ग्रहपूजां समाचरेयुः । तथाभिचरन्नपि अदृष्टोपायेन परपीडाभिचारस्तत्कामश्च ग्रहयज्ञं
समाचरेत् ॥ २ ॥ ग्रहानाह ॥ सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः । शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृ
ताः । एते सूर्यादयो नव ग्रहाः ॥ ३ ॥ ग्रहाः पूज्याः कस्मात् किं कृत्वेत्याह ॥ ताम्रकात् स्फटिकाद् रक्तचंदनात् स्वर्णका
दुभौ ॥ रजतादायसः सीसात् कांस्यात् कार्या ग्रहाः क्रमात् । स्ववर्णैर्वा पटे लेख्या गंधैर्मंडलकेषु वा ॥ सूर्यादीनां मू
र्तयस्ताम्रादिभिर्यथाक्रमं कार्याः । तदलाभे वा स्वस्ववर्णैर्वर्णकैः ॥ पटे लेख्याः । मंडलेषु गंधचंदनादिभिर्यथाव
र्णं लिख्या इत्यन्वयः ॥ द्विभुजत्वादि विशेषो मत्स्यपुराणोक्तो द्रष्टव्यः ॥ यथाह ॥ पद्मासनः ॥ पद्मकरः ॥ पद्मगर्भसम
द्युतिः । सप्ताश्वः सप्तरज्जुश्च द्विभुजः स्यात् सदा रविः ॥ १ ॥ श्वेतः श्वेतांबरधरो दशाश्वः श्वेतभूषणः । गदापाणिर्द्वि
भुजः कर्तव्यो वरदः शशी ॥ २ ॥ रक्तमाल्यांबरधरः शक्तिशूलगदाधरः । चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः ॥
३ ॥ पीतमाल्यांबरधरः कर्णिकारसमद्युतिः । खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥ ४ ॥ देवदैत्यगुरू तद्व
त् पीतश्वेतौ चतुर्भुजौ । दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू ॥ ५ ॥ इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः । बाणबा
णासनधरः कर्तव्योऽर्कसुतः सदा ॥ ६ ॥ करालवदनः खड्गचर्मशूली वरप्रदः । नीलसिंहासनस्थश्च राहुरत्र प्र
शस्यते ॥ ७ ॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः । गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः ॥ ८ ॥ सर्वे किरी

टिनः कार्या ग्रहा लोके हितावहाः । स्वांगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा ॥ ९ ॥ एतेषां स्थापनदेशश्च तन्त्रे वोक्तः
मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु । उत्तरेण गुरुं विद्यात् बुधं पूर्वोत्तरेण तु ॥ १० ॥ पूर्वेण भार्गवं विद्यात् सोमं
दक्षिणपूर्वके । पश्चिमेन शनिं विद्यात् राहुं दक्षिणपश्चिमे ॥ ११ ॥ पश्चिमोत्तरतः केतुं स्थापयेत् शुक्लतण्डुलैरि
ति ॥ छ ॥ पूजाविधिमाह ॥ यथावर्णं प्रदेयानि वासांसि कुसुमानि च । गंधाश्च बलयश्चैव धूपो देयश्च गुग्गुलः ॥
कर्त्तव्यो मन्त्रवंतश्च चरवः प्रतिदैवतं ॥ यथावर्णं यस्य ग्रहस्य यो वर्णस्तद्वर्णानि वस्त्रगंधपुष्पाणि देयानि
बलयश्च धूपश्च सर्वेभ्यो गुग्गुलो देयः । चरवश्च प्रतिदैवतमग्निप्रतिष्ठापनान्वाधानादिपूर्वकं चतुरश्चतुरो
मुष्टीन् निर्वपति । अमुष्मै त्वा जुष्टं निर्वपामीत्यादिना कार्याः । अनन्तरं सुसमिद्धे ग्नाविध्माधानाद्याघारांतं
कर्म कृत्वा आदित्याद्युद्देशेन यथाक्रमं वक्ष्यमाणमंत्रैर्वक्ष्यमाणाः समिधो वक्ष्यमाणप्रकारेण हुत्वा च
रवो होतव्याः ॥ छ ॥ मंत्रानाह ॥ आकृष्णेन इमं देवा अग्निर्मूर्द्धा दिवः ॥ ककुत् ॥ उद्बुध्यस्वेति च ऋचो यथासं
ख्यं प्रकीर्त्तिताः । बृहस्पते अति यदर्यस्तथैवान्नात्परिस्रुतः ॥ शंनो देवीस्तथा कांडात्केतुं कृण्वन्निमास्तथा
आकृष्णेन रजसा वर्त्तमान इत्यादयो नव मंत्रा यथाक्रमं आदित्यादीनां वेदितव्याः ॥ इदानीं समिध आह ॥ अ
र्कः पलाशखदिरस्त्वपामार्गोथ पिप्पलः । उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥ अर्कः पलाशादयो य
थाक्रमं सूर्यादीनां समिधो भवंति । ताश्च सार्द्राः अग्राः सत्वचः प्रादेशमात्राः कर्त्तव्याः ॥ छ ॥ किंच ॥ एकैक
स्याष्टशतमष्टाविंशतिरेव वा । होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युताः ॥ आदित्यादीनां एकैकस्यापि अ ५९

अष्टशतसंख्या अष्टाविंशतिसंख्या वा यथासंभवं मधुना सर्पिषा दध्ना क्षीरेण वा युताः अर्का अर्कादिस
मिधो होतव्याः । इदानीं भोजनान्याह । गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकं । दध्योदनं हविश्चूर्णं मांसं चि
त्रान्नमेव च । दद्यात् ग्रहक्रमादेतद् द्विजेभ्यो भोजनं बुधः । गुडमिश्र ओदनः गुडोदनं । पायसं क्षैरेयी । हविष्यं मु
न्यादि । क्षीरषाष्टिकं । क्षीरमिश्रः षाष्टिकोदनः । दध्योदनः दधिमिश्रौदनः । हविर्घृतोदनः । चूर्णं तिलचूर्ण ३
३ मिश्रौदनः । मांसं भक्ष्यमांसमिश्रौदनः ॥ चित्रौदनो नानावर्णौदनः । एतानि गुडौदनादीनि यथाक्रममादि
त्याद्युद्देशेन भोजनार्थं द्विजेभ्यो ब्राह्मणेभ्यो दद्यात् । ब्राह्मणसंख्या यथावित्तं द्रष्टव्या । गुडौदनाद्यजावे
तु यथालाभमोदनादि । पादप्रक्षालनादिविधिपूर्वकं सत्कृत्य सन्मानपुरस्सरं दद्यात् ॥ छ ॥ दक्षिणामा
ह । धेनुः शंखस्तथानड्वान्हेमवासो हयस्तथा । कृष्णा गौरायसं छाग एता वै दक्षिणाः स्मृताः । धेनुर्दोग्ध्री शं २
खस्तथानड्वान् भारसहो बलीवर्दः हेमसुवर्णं वासः पीतं हयः पांडुरः कृष्णा गौ आयसं अन्यादि छागः
प्रसिद्धः । एते धेन्वाद्या यथाक्रमं आदित्याद्युद्देशेन ब्राह्मणानां दक्षिणाः स्मृताः । उक्ता मन्वादिभिः एतच्च
संभवे सति असंभवे तु यथालाभं शक्तितो न्यदपि किंचिद्देयं ॥ छ ॥ शांतिकामेनाविशेषेण सर्वे ग्रहाः पू
जयितव्याः इत्युक्तं तत्र विशेषमाह । यस्य यश्च यदा दुःस्थः स तं यत्नेन पूजयेत् ॥ ब्राह्मणैषां वरो दत्तः पूजि
यिष्यथ । यस्य पुरुषस्य यो ग्रहो यदा दुःस्थोऽष्टमस्थानस्थितः स तं ग्रहं तदा यत्नेन पूजयेत् । यस्मादेषां ग्रह

णां ब्राह्मणानां पूर्वं वरो दत्तः पूजिताः सन्तोऽस्य मिष्टप्रापणेनानिष्टनिरसनेन च पूजयितारं पूजयिष्यथेति ॥ ३ ॥ अवि-
शेषेण द्विजानधिकृत्य शान्तिकपौष्टिकादीनि कर्माण्युक्तानि । अनन्तरमभिषेकगुणयुक्तस्य राज्ञो विशेषेणाधिकार इ-
ति दर्शयति । ग्रहाधीना नरेन्द्राणामुच्छ्रयाः पतनानि च । भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहाः । नरेन्द्राणामभिषिक्त-
क्षत्रियाणां ग्रहाः पूज्यतमाः । अनेनान्येषामपि पूज्या इति गम्यते । अन्यत्र कारणमाह प्राणिनामभ्युदयविनिपाता
ग्रहाधीना यस्मात्तस्मादधिकारिभिः पूज्याः । किं च जगतश्च स्थावरजंगमात्मकस्य भावाभावावुत्पत्तिनिरोधौ ग्रहा-
धीनौ तत्र यद्येते पूजिताः । तदा स्वकाले उत्पत्तिनिरोधौ भवतोऽन्यथोत्पत्तिसमये नोत्पादो काले निरोधश्च जगदी-
श्वरत्वान्नरेन्द्राणां तद्योगक्षेमकारिणां पूज्यतमा ग्रहा इति तेषां विशेषेण शान्तिकाद्यधिकारेऽधिकारः । तथा च गौत-
मः । न तु राजा सर्वस्येष्टे ब्राह्मणवर्जमिति । राजानमधिकृत्य वर्णानाश्रमांश्च न्यायतोऽभिरक्षेत्तांश्चलतश्चैतान्स्वधर्मे
स्थापयेदित्यादीनुक्त्वा स्निग्धमन्त्रिलक्षणान्यानि च दैवोत्पातचिन्तकाः । प्रब्रूयुस्तान्याद्रियेत तदधीनमपि ह्येके योग-
क्षेमं प्रतिजानत इति शान्तिकपौष्टिकाद्यधिकारं दृष्टानन्तरमभिधाय शान्तिपुण्याहस्वस्त्ययनायुष्यमङ्गलसंयु-
क्तान्याभ्युदयिकानि विद्वेषणसंवननाभिचारद्विषद्व्यृद्धियुक्तानि च शालाग्नौ कुर्यादिति शान्तिकादीनि दर्शितानि ॥ ॥
इति ग्रहशान्तिप्रकरणम् ॥ ॥ साधारणान्गृहस्थधर्मानुक्त्वेदानीं राज्याभिषेकादिगुणयुक्तस्य गृहस्थविशेष-
स्य धर्मानाह । महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः । विनीतः सत्त्वसंपन्नः कुलीनः सत्यवाक्शुचिः । अदीर्घसू- ६०

त्रः स्मृतिमानक्षुद्रोऽपरुषस्तथा । धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित् । स्वरन्ध्रगोप्तान्वीक्षिक्यां दण्डनीत्यां तथैव च
विनीतस्त्वथ वार्त्तायां त्रय्यां चैव नराधिपः । पुरुषार्थसाधनकर्मणोऽध्यवसाय उत्साहः । महानुत्साहो यस्य स महोत्सा-
हः । स्थूललक्षः बहुदीर्घार्थदर्शी ॥ परकृतोपकारापकारौ न विस्मरतीति कृतज्ञः । वृद्धसेवकः । तपोज्ञानादिवृ-
द्धानां सेवकः । विनयेन युक्तो विनीतः । विनयशब्देनाविरुद्धः पूर्वोक्तस्नातकधर्मकलाप उच्यते । न संशयं प्रपद्येत
नाकस्मादप्रियं वदेदित्यादिनोक्तः । सत्त्वसंपन्नः संपदापदोर्हर्षविकाररहितः । मातृतः पितृतश्चाभिजनवान्कु-
लीनः सत्यवदनशीलः । शुचिर्बाह्याभ्यन्तरशौचयुक्तः । अदीर्घसूत्रः । अनल्पकार्याणां कर्मणामारम्भे प्रारब्धा-
नां समाप्तौ यो न विलम्बते असावदीर्घसूत्रः । अवगतार्थादिस्मरणशीलः स्मृतिमान् । अक्षुद्रः असद्गुणद्वेषी ।
अपरुषः परदोषकीर्तनः । धार्मिको वर्णाश्रमधर्मान्वितः । न विद्यन्ते व्यसनान्यस्यासावव्यसनः । व्यसनान्य-
ष्टादश । यथाह मनुः । मृगयाक्षा दिवास्वप्नः परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाट्या च कामजो दशको गणः । पै-
शुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् । वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः इति । तत्र सप्तकष्टतमानि
यथाह । पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे । दण्डस्य पातनं
चैव वाक्पारुष्यार्थदूषणे । क्रोधजेऽपि गणे विद्याच्चतुष्कं कामजे गणे कष्टमेतत्त्रयं सदेति । प्राज्ञो गम्भीरार्थाव-
धारणक्षमः । शूरो निर्भयः । रहस्यवित् गोपनीयार्थगोपनचतुरः । स्वरन्ध्रगोप्ता स्वस्य सप्तसु राज्याङ्गेषु यत्परप्र-

वेशहारशैथिल्यं तत्स्वरं तस्य गोसाप्रच्छादयिता। आन्वीक्षिक्यामात्मविद्यायां दंडनीत्यामर्थयोगक्षेमोपयो
गिन्यां वार्त्तायां कृषिवाणिज्यपशुपालनरूपायां धनोपचयहेतुभूतायां। त्रय्यां ऋग्यजुःसामाख्यायां विनीतः
सन्नद्धः शिक्षितः प्राविण्यं नीतः यथाह मनुः। त्रैविद्येभ्यस्त्रयीं विद्यां दंडनीतिं च शाश्वतीं। आन्वीक्षिकीं चात्मविद्यां
वार्त्तारंभांश्च लोकत इति। नराधिपो राज्याभिषिक्तः स्यादिति संबंधः॥ ३॥ एवमभिषेकगुणयुक्तस्यांतरंगान्
धर्माननिधायेदानीं बहिरंगानाह॥ स मंत्रिणः प्रकुर्वीत प्राज्ञान्मौलान्स्थिरान्शुचीन्। तैः सार्द्धं चिंतयेद्रा
ज्यं विप्रेणाथ ततः स्वयं। महोत्साहादिगुणयुक्तो राजा मंत्रिणः। कुर्वीत कथंभूतान्प्राज्ञान्हिताहितविवे
ककुशलान्मौलान्स्ववंशपरंपरायातान्स्थितान्महत्यपि हर्षविषादस्थाने विकाररहितान्शुचीन्ध
र्मार्थकामभयोपधाशुद्धान्। ते च सप्ताष्टौ वा कार्याः। यथाह मनुः। मौलान्शास्त्रविदः शूरान्लब्धलक्षान्कु
लोद्गतान्। सचिवान्सप्त चाष्टौ वा कुर्वीत सुपरीक्षितान्। इति एवं मंत्रिणः पूर्वोक्तैस्तैः सार्द्धं राज्यं संधिविग्र
हादिकार्यं चिंतयेत्। समस्तैर्व्यस्तैश्च अनंतरं तेषामभिप्रायं ज्ञात्वा सकलशास्त्रार्थविचारकुशलेन पुरोहि
तेन सह कार्यं विचित्य ततः स्वयं बुद्ध्या कार्यं विचिंतयेत्॥ ४॥ कीदृशं पुरोहितं कुर्यादित्याह। पुरोहितं च
कुर्वीत दैवज्ञमुदितोदितं। दंडनीत्यां कुशलं अथर्वांगिरसे तथा पुरोहितं च सर्वेषु दृष्टादृष्टार्थेषु कर्मसु पु
रोहितं दानमानसत्कारैरात्मसंबंधं कुर्यात्। कथंभूतं दैवज्ञं ग्रहोत्पातं तत्त्वमनादेर्वेदितारं। उदितोदितं विद्या ६२

भिजनानुष्ठानादिभिर्निरूदितैः शास्त्रोक्तैः उदितं समृद्धं दंडनीत्यां अर्थशास्त्रे कुशलं। अथर्वांगिरसे च शांत्यादिकर्म
णि॥ ५॥ श्रौतस्मार्त्तक्रियाहेतोर्वृणुयादेव ऋत्विजः। यज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणान्। श्रौतान्यग्निहोत्रादिस्मा
र्त्तौपासनादिक्रियानुष्ठानसिध्यर्थं ऋत्विजो वृणुयात् यज्ञांश्च राजसूयादीन्विधिवत् यथाविधानं भूरिदक्षिणान्
कुर्यादेव॥ ६॥ किं च भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च। अक्षयोयं निधी राज्ञां यद्विप्रेषु पपादितं। ब्राह्म
णेभ्यो भोगान्सुखानि तत्साधनद्वारेण दद्यात्। वसूनि च सुवर्णरूप्यप्रभृतीनि विविधानि नानाप्रकाराणि यस्मा
देष राज्ञामक्षयो निधिः शेवधिः यद्ब्राह्मणेभ्यो दीयते। साधारणधर्मत्वेन दानप्रसक्तौ सत्यां राज्ञां दानप्राधान्यप्रति
पादनार्थमिदं वचनं॥ ७॥ अस्कन्नमव्ययं चैव प्रायश्चित्तैरदूषितं। अग्नेः सकाशाद्विप्राग्नौ हुतं श्रेष्ठमिहोच्य
ते। अग्नेः सकाशात् अग्निसान्निध्यात्भूरिदक्षिणात्राजसूयादेरहितं॥ प्रायश्चित्तैरदूषितं प्रायश्चित्तायासरहि
तं॥ ८॥ वसूनि विप्रेभ्यो दद्यादित्युक्तं कया परिपाट्या दद्यादित्याह। अलब्धमीहेद्धर्मेण लब्धं यत्नेन पालयेत्। पा
लितं वर्द्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत्। धर्माद्यलब्धलाभाय धर्मशास्त्रानुसारेण यतेत लब्धं च स्वयमवेक्षया रक्षे
त् रक्षितं नीत्या वणिक्पथादिकया वर्द्धयेत्। वृद्धिं च पात्रेषु विशेषेषु धर्मार्थिकामपात्रेषु निक्षिपेत् दद्यात्॥ ९॥
पात्रे निक्षिप्य किं कुर्यादित्याह। दत्त्वा भूमिं निबंधं च कृत्वा लेख्यं तु कारयेत्। आगामिभद्रनृपतिपरिज्ञानाय पार्थि
वः। यथोक्तविधिना भूमिं दत्त्वा सत्वनिवृत्तिं कृत्वा निबंधं वा एकस्य भांडभरकस्य इयंतो रूपका एकस्य पर्वणि भर

कस्येयंतिपर्वणानिइतिवानिबंधंकृत्वालेख्यंकारयेत्।किमर्थम्आगामिनएष्यतोयेभद्राःसाधवोनृपतयोनृपत
यस्तेषामनेनदत्तंअनेनप्रतिगृहीतमितिपरिज्ञानाय।पार्थिवोनृपतिरनेनृपतेरेवभूमिदानेनिबंधदानेवाधि
कारोनभोगपतेरितिदर्शितं॥ २ ॥ लेख्यंकारयेदित्युक्तंकथंकारयेदित्याहः।पटेताम्रपट्टेवापिस्वमुद्रोपरि
चिह्नितं।अभिलेख्यात्मनोवंश्यान्आत्मानंचमहीपतिः।प्रतिग्रहपरीमाणंदानच्छेदोपवर्णनं।स्वहस्तकालसं
पन्नंशासनंकारयेत्स्थिरं।कार्पासिकेपटेताम्रपट्टेताम्रफलकेवा।आत्मनोवंश्यान्प्रपितामहपितामहपितॄ
न्बहुवचनस्यार्थवत्त्वात्।वीर्यवंश्यान्प्रपितामहपितामहपितॄन्बहुवचनस्यार्थवत्त्वात्।वीर्यवंश्रुता
दिगुणैःपवर्णनपूर्वकमभिलेख्यात्मानंचशब्दात्प्रतिगृहीतारंप्रतिग्रहपरिमाणंदानच्छेदोपवर्णनंचाभिलेख्यप्रति
गृह्यतइतिप्रतिग्रहोनिबंधनतस्यरूपकादिपरिमाणंदीयतइतिदानंक्षेत्रादितस्यछेदः।छिद्यतेअवच्छिद्यतेनेति
वेनादानघाघाटोनिवर्त्तनपरिमाणंचतस्योपवर्णनं।अमुकनद्यादक्षिणतोयंग्रामःक्षेत्रंवापूर्वतोमुकग्रामस्यएता
वन्तिवर्त्तनमित्यादिपरिमाणंचलेख्यमेव।आघाटकस्यनदीनगरवर्त्मादिसंचारित्वेनत्वमेतन्नाधिकन्नावसन्नवा
ततलिहृत्यार्थंस्वहस्तेनस्वहस्तलिखितेनमतंमेमुकपुत्रस्ययदत्रोपरिलिखितमित्यनेनसंपन्नंसयुक्तंकालेनच
द्विविधेनशाकनृपातीतसंवत्सररूपेणचदानकालेनचंद्रसूर्योपरागादिनासपन्नंस्वमुद्रयागुरुवराहादिरूपयोपरिचि
ह्नितंस्थिरंदृढंशासनं।शिष्यतेनेनविषतोनृपतयोनेनदानात्तश्रेयोभावपाल्य।तमितिशासनंकारयेन्म ६२

द्विपतिर्नभोगपतिः।संधिविग्रहादिकारणाननचित्।यनकेनसंधिविग्रहकारीतत्रनवेद्यस्तस्यलेखकः।स्वयंरा
ज्ञासमादिष्टःसलिखेद्राजशासनमितिस्मरणात्।दानमात्रेणैवदानफलेसिद्धेशासनकरणंतत्रैवभोगागामिरेच्छा
फलातिशयार्थं॥ ३ ॥ इदानींराज्ञोनिवासस्थानमाह।रम्यंपशव्यमाजीव्यंजांगलंदेशमावसेत्।तत्रदुर्गाणिकुर्वी
तजनकोशात्मगुप्तये।रम्यंरमणीयंअशोकचंपकादिभिः।पशव्यंपशुभ्योहितंपशुहितकरं।जीआव्यमुप आ
जीव्यकंदमूलफलपुष्पादिभिः।जांगलयद्यप्यल्पोदकतरुपर्वतोदेशोजांगलःतथाप्यत्रसजलतरुपर्वतोदेशो
जांगलशब्देनाभिधीयते।तंदेशमावसेत्।तत्रैवंविधेदेशेजनानांकोशस्यसुवर्णादेरात्मनश्चरक्षणार्थंदुर्गंकुर्वी
त।दुर्गंकीदृशंविविधं।यथाहमनुः।धन्वदुर्गंमहीदुर्गमब्दुर्गंवार्क्षमेवचा।नरंगिरिदुर्गंचसमाश्रित्यावसेत्पुर
मिति॥ ३ ॥ किंचतत्रतत्रचनिष्णातानध्यक्षान्कुशलान्शुचीन्॥ प्रकुर्यादायकर्मांतव्ययकर्मसुचोद्यतान्।त
त्रतत्रधर्मार्थस्थानादिषुअध्यक्षान्योग्यानअधिकारिणःप्रकुर्यात्नियुंजीततांश्चाभीक्ष्णेषुकर्मसुइति।की
दृशान्निष्णातानअनन्यव्यापारान्कुशलान्तत्तद्व्यापारेषुचतुरान्शुचीन्उचविधोपधाशुद्धान्।आयकर्मसु
सुवर्णादिकृत्यत्तिस्थानेषुव्ययकर्मसुसुवर्णादिदानस्थानेषुचोद्यतानअनलसान्चशब्दात्शान्त्यादिगुणयु
क्तान्॥ उक्तंच॥ प्राज्ञत्वमुपधाशुद्धिरप्रमादोनियुक्तता।कार्येषुव्यसनाभावःस्वामिभक्तिश्चयोग्यताइति
॥ ३ ॥ भोगाश्चदद्याद्विप्रेभ्योवसूनिविविधानिच।इतिसामान्येनस्वस्यदानफलमुक्तंइदानींनृपाणांविक्रमा
र्जितस्यदानेफलातिशयमाह।नातःपरतरोधर्मोनृपाणांयद्रणार्जितं।विप्रेभ्योदीयतेदानंप्रजाभ्यश्चाभय

सदा। तस्मादनूक्त रोषमेन्नपाणं विद्यते यइणार्जितं द्रव्यं विप्रेभ्यो दीयते य च प्रजाभ्यो ऽभयप्रदानं ॥७॥
रणार्जितं देयमित्यत्र कं इव्यार्जनाय रणे प्रवृत्तस्य विपत्तिरपि सन्नवतीति तन्न धर्मोनापार्थ इति ततो निवृत्तिरे
व श्रेयसीत्यशेयसी त्यत आह ॥ यत्राहवेष्ववध्यतेन्नस्यार्थमपराङ्मुखाः। आकूटेरायुधैर्यांति ते स्वर्गयो
गिनो यथा। ये न्नस्यार्थमाहवेषु प्रवृत्ता अपराङ्मुखा अभिमुखा वध्यंते मार्यंते ते स्वर्गं यांति। योगाभ्यासरता य
था। यथा कूटैरविषदिग्धादिभिरायुधैर्योद्धारो न्नवंति ॥ ७ ॥ किंच। पदानि क्रतुतुल्यानि तन्न ग्रेषु विनिवर्त्ति
नां। राजा सुकृतमादत्ते हतानां विपलायिनां। स्ववलेतु करितुरगरथपदातिषु तन्न ग्रेषु विनिवर्त्तिनां। पर
वलाभिमुखपातिनां पदानि क्रतुतुल्यानि अश्वमेधतुल्यानि। विपर्यये दोषमाह। विपलायिनां पराङ्मुखा
नां राजा सुकृतमादत्ते ॥ ७ ॥ अपि च। तवाहं वादिनं क्लीवं निर्हेतिं परसंगतं। न हन्याद्विनिवृत्तं च युद्धप्रे
क्षणकादिकं। तवाहमिति यो वदतीति तं क्लीवं नपुंसकं। निर्हेतिं निरायुधं। परसंगतं अन्येन सह युध्य
मानं। विनिवृत्तं युद्धाद्विनिवृत्तं युद्धप्रेक्षणको युद्धदर्शी तं न हन्यादिति संबध्यते। आदिग्रहणात् अश्व
सारथ्यादीनां ग्रहणं यथाह गौतमः अनन्तदोषो हिंसायामाह वे न्यत्र व्यश्व सारथ्यनायुधकृतांजलि प्रकीर्ण
केशपराङ्मुखोपविष्टस्थलवृक्षारूढ इतगो ब्राह्मणवादिभ्य इति। तथा शंखोप्याह। न पानीयं पिवंतं न भु
जानं नोपानहौ मुंचंतं नावर्माणं सवर्मा। न स्त्रियं न करेणुं न वाजिनं न सारथिं। न दूतं न ब्राह्मणं न राजानमरा
जानं हन्यादिति ॥ ७ ॥ कृतरक्षः समुत्थाय पश्येदायव्ययौ स्वयं। व्यवहारांस्ततो दृष्ट्वा स्नात्वा भुंजीत कामतः। कृतर ६२

क्षः पुरस्यात्मनश्च रक्षां विधाय प्रतिदिनं प्रातरुत्थाय स्वयमेवायव्ययौ पश्येत् ॥ ततो व्यवहारान् दृष्ट्वा मध्याह्न
काले स्नात्वा कामतो यथारुचि भुंजीत ॥ ७ ॥ हिरण्यं व्याप्तृतानीतं भांडागारेषु निक्षिपेत्। पश्येच्चारान् ततो दू
तान् प्रेषयेन्मंत्रिसंगतः। तदनंतरं हिरण्यादिकं व्याप्तृतैर्हिरण्यादिकानयननियुक्तैरानीतं स्वयमेव निरीक्ष्य
भांडागारेषु निक्षिपेत्। ततः चारान् स्पर्शान् प्रत्यागतान् ये परराजवृत्तांतपरिज्ञानाय परिव्राजकतापसादि
रूपेण राष्ट्रचारिणः प्रेषितास्तान् दृष्ट्वा किंचिन्निवेशयेत्। तदनंतरं दूतांश्च प्रेषयेत्। दूताश्च ये प्रकटमेव राजांत
रं प्रतिगत्वागतमाचरंति। ते च त्रिविधाः। निसृष्टार्थाः संदिष्टार्थाः शासनहस्ताश्चेति। तत्र निसृष्टार्था राज
कार्याणि देशकालोचितानि स्वयमेव कथयितुं क्षमाः। उक्तमात्रं ये परस्मै निवेदयंति ते संदिष्टार्थाः। शास
नहस्तास्तु राजलेखहारिणः। तान् सर्वान् प्रेषितान् आगतान् मंत्रिसंगतः सन् पश्येत् दृष्ट्वा तत्कार्यमाकर्ण
यत्पुनः प्रेषयेदिति ॥ ७ ॥ ततः स्वैरविहारी स्यान्मंत्रिभिर्वा समागतः। वलानां दर्शनं कृत्वा सेनान्या सह चिंत
येत्। तदनंतरमपराह्णे स्वैरं यथेष्टं एकको ऽन्तः पुरविहारी स्यात्। मंत्रिभिर्वा विश्वासिभिः कलाकुशलैः परि
हासवेदिभिः परिवृत स्त्रीभिश्च रूपयौवनवैदग्ध्यशालिनीभिः। भुक्तवान् विहरेद्बौ वस्त्रीभिरंतःपुरे सह
विहृत्य च यथाकामं पुनः कार्याणि चिंतयेत् ॥ इति मनुस्मरणात्। ततो विशिष्टैर्वस्त्रस्रक्कुसुमविलेपनालंकारै
रलंकृतो हस्त्यश्वरथपदातिवलानि दृष्ट्वा सेनान्या सेनापतिना सह तत्क्षणादि देशकालोचितं चिंतयेत् ॥

।ब। संध्यामुपास्य शृणुयात् चाराणां गूढभाषितं । गीतनृत्यैश्च भुंजीत पठेत् स्वाध्यायमेव वा । ततः सायंकाले सं
ध्यामुपास्य सामान्येन प्राप्तस्यापि पुनर्वचनं कर्तव्यत्वादविस्मरणार्थं । अनंतरं ये पूर्वं हस्ताः कथितास्ता
ने निवेशिताः तेषां चाराणां गूढभाषितं श्रोत्रवेश्म निःशस्त्रपाणिः शृणुयात् । उक्तं च । संध्यां चोपास्य शृणुया
त् तत्र वेश्मनि शस्त्रभृत् । रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितमिति । ततो नृत्यगीतादिभिः किंचित्कालं
क्रीडित्वा कक्षांतरं प्रविश्य भुंजीत । गत्वा कक्षांतरं त्वन्यसमनुज्ञाप्य तं जनं । प्रविश्य भोजनार्थं च स्त्रीनिरंतः
पुरं सह इति । ततो विस्मरणार्थं यथाशक्ति स्वाध्यायं पठेत् ॥ब॥ संविशेत्तूर्यघोषेण प्रतिबुध्येत्तथैव च । शास्त्रा
णि चिंतयेद्बुध्वा सर्वकर्तव्यतां तथा । तदनंतरं तूर्यशंखादिघोषेण संविशेत् स्वप्यात् तथैव तूर्यघोषादि
भिः प्रतिबुध्येत् । प्रतिबुध्य च शास्त्रविद्भिः विश्वासिभिः सह एकाकी वा पश्चिमे यामे शास्त्राणि चिंतयेत्
सर्वकर्तव्यतां च सर्वकार्याणि च एतच्च स्वस्थं प्रत्युच्यते अस्वस्थः पुनः सर्वकार्येष्वन्यं नियोजयेत् । यथा
ह । एतत्स्वस्थः समातिष्ठेदरोगः पृथिवीपतिः । अस्वस्थः सर्वमेवं मंत्रिमुख्ये निवेशयेदिति ॥३॥ प्रेषयेच्च त
तश्चारान् स्वेष्वन्येषु च सादरान् । ऋत्विक्पुरोहिताचार्यैराशीर्भिरभिनंदितः । दृष्ट्वा ज्योतिर्विदो वैद्यान् दद्या
द्गां कांचनं महीं । नैवेशिकानि च ततः श्रोत्रियाणां गृहाणि च । अनंतरं तत्र स्वे एव विश्वस्तान् चारान् दान
मानसत्कारैः पूजितान् स्वेषु सामंतारविचेकादिषु अन्येषु च महीपतिषु प्रेषयेत् । तत्र चैषिन परिज्ञा ६४

नाय । ततः प्रातः संध्यामुपास्याग्निहोत्रं कृत्वा पुरोहितर्त्विगाचार्यादिभिराशीर्भिरभिनंदितो ज्योतिर्विदो वैद्यांस्तेभ्य
श्च ग्रहादिस्थितिं विदित्वा शांतिकादीनि च पुरोहितापादिश्य वैद्यांश्च दृष्ट्वा तेभ्यश्च स्वशरीरस्थितिं विनिवेद्य प्रतिविधा
नं चादिश्य गां दोग्ध्रीं कांचनं महीं नैवेशिकानि विवाहोपयोगिनि कन्यालंकारादीनि गृहाणि च सुधाधवलितादीनि
श्रोत्रियेभ्योऽधीतवेदेभ्यो दद्यादिति प्रत्येकं संबध्यते ॥३॥ किंच ॥ ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्रोधनोऽरि
षु । स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता ॥ ब्राह्मणेष्वधिक्षिपत्स्वपि क्षमी क्षमावान् स्निग्धेषु स्नेहवत्सु मित्रा
दिष्वजिह्मः । अवक्रः । अरिषु क्रोधनः । भृत्यवर्गेषु प्रजासु च हिताचरणेनाहितनिवर्तनेन च पितेव दयावान्
स्यादिति प्रत्येकं संबध्यते ॥३॥ पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन् । सर्वदानाधिकं यस्मात्प्रजानां परि
पालनं । यस्मान्न्यायेन धर्मशास्त्रोक्तमार्गेण प्रजाः परिपालयन् प्रजोपचितपुण्यात् षड्भागं षष्ठं भागमादत्ते अतो यस्मा
च्च सर्वेभ्योऽन्नपानादिभ्यः प्रजानां परिपालनं अधिकफलं ॥ तस्मात्प्रजासु यथा पिता तथैव स्यादिति गतेन संबं
धः ॥३॥ चाटतस्करदुर्वृत्तमहासाहसिकादिभिः । पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः । चाटाः प्रतार
काः विश्वस्य ये परधनमपहरंति । प्रच्छन्नापहारिणस्तस्कराः । दुर्वृत्ता ऐन्द्रजालिककितवादयः । सहो बलं स
हसा बलेन कृतं साहसं महच्च तत् साहसं च महासाहसं तेन वर्तंत इति महासा । हसिकाः । प्रसह्यापहारिणः
आदिशब्दान्मौलिककूटकर्तृत्वयः । एतैः पीड्यमाना बाध्यमानाः प्रजा रक्षेत् कायस्थालेखकागणकाश्चैतैः

पीड्यमाना विशेषतो रक्षेत्। तेषां राजवल्लभत्वात् मायाविनया च दुर्निवारत्वात्॥ टी॥ अरक्ष्यमाणाः कुर्वं
न्ति यत्किंचित्किल्बिषं प्रजाः। तस्मात्तु नृपतेस्तर्ह्यस्मात्स्पृशति सौ करान्। अरक्ष्यमाणाः प्रजा यत्किंचित्किल्बि
षं चौर्यपरदारगमनादिकं कुर्वंति तस्मात्पापार्धं नृपतेर्भवति यस्मात् सो राजा रक्षणार्थं प्रजाभ्यः करान् गृ
ह्णाति॥ टी॥ ये राष्ट्रेऽधिकृतास्तेषां चारैर्ज्ञात्वा विचेष्टितं॥ साधून् संमानयेद्राजा विपरीतांस्तु घातयेत्॥ उ
त्कोचजीविनो द्रव्यहीनान् कृत्वा प्रवासयेत्। सततं दानमानसत्कारैः श्रोत्रियान् वासयेत् सदा॥ राष्ट्रे राज्ञा
अधिकारेषु ये नियुक्तास्तेषां विचेष्टितं चारैः कुलक्षणैः सम्यक् ज्ञात्वा साधून् सुचरितान् संमानयेत् दान
मानसत्कारैः पूजयेत् विपरीतान् दुष्टचरितान् सम्यक् विदित्वा घातयेत्। अपराधानुसारेण ये पुनरुत्को
चजीविनस्तान् द्रव्यहीनान् कृत्वा स्वराष्ट्राद् प्रवासयेत्। श्रोत्रियान् दानमानसत्कारैः सहितान् कृत्वा स्व
राष्ट्रे सदैव वासयेत्॥ टी॥ अन्यायेन नृपो राष्ट्रात् स्वकोशं योऽभिवर्धयेत्। सोऽचिराद्विगतश्रीको नाशमेति सबांध
वः। यो सौ राजा स्वराष्ट्रादन्यायेन धनमादाय स्वकोशं वर्धयेत्। सोऽचिरात् शीघ्रमेव विगतश्रीको विनष्टलक्ष्मी
को बंधुभिः सह विनाशं प्राप्नोति॥ टी॥ प्रजापीडनसंतापात् समुद्भूतो हुताशनः। राज्ञः कुलं श्रियं प्राणान्
नादग्ध्वा विनिवर्तते। प्रजानां तस्करादिकृतपीडातो यः। संतापः तस्मादुत्पन्नो हुताशन इव संतापकारि
त्वाद्दुष्परिहार्यत्वाद्धुताशन इत्युच्यते। स राज्ञः श्रियं कुलं प्राणांश्च अदग्ध्वा नाशमनीत्वा न निवर्तते नोपशाम्यति। ६५

॥ टी॥ य एव धर्मो नृपतेः स्वराष्ट्रपरिपालने। स एव कृत्स्नमाप्नोति परराष्ट्रं वशं नयेत्। न्यायतः स्वराष्ट्रपरिपालने
राज्ञो यो धर्मस्तस्य सकलं वक्ष्यमाणन्यायेन परराष्ट्रं वशं नयन् आत्मसात्कुर्वन् आप्नोति धर्मषड्भागं च॥ टी॥ किंतु
यस्मिन्देशे य आचारो व्यवहारः कुलस्थितिः। तथैव परिपाल्योऽसौ यदा वशमुपागतः। यदा परदेशो वशमुपाग
तस्तदा न स्वदेशाचारादिसंकरः कार्यः। यस्मिन्देशे य आचारः कुलस्थितिर्व्यवहारो वा यथैव प्रागासीत्तथैवा
सौ परिपालनीयो यदि शास्त्रविरुद्धो न भवति। यदा वशमुपागत इत्यनेन वशोपगमनात् प्रागनियम इति
दर्शितं यथोक्तं॥ उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत्। क्षपयेच्चास्य सततं यवसान्नोदकेंधनमिति॥
टी॥ मंत्रमूलं यतो राज्यमतो मंत्रं सुरक्षितं। कुर्याद्यथास्य न विदुः कर्मणामाफलोदयात्। यस्मात्तैः सार्द्धं चिं
तये राज्यं इत्याद्युक्तं मंत्रमूलं राज्यं। तस्मान्मंत्रं यत्नेन तथा सुरक्षितं कुर्यात्। यथास्य राज्ञः कर्मणां संधि
विग्रहादीनां आफलोदयात् फलनिष्पत्तेः प्राग् अन्ये मंत्रं न जानंति॥ टी॥ किंच अरिर्मित्रमुदासीनोऽनंतर
स्तत्परः परः। क्रमशो मंडलं चिंत्यं सामादिभिरुपक्रमैः। अरिः शत्रुः मित्रं सुहृत् तत् उभय विलक्षण उदासीन
स्ते च त्रयस्त्रिविधाः सहजाः कृत्रिमाः प्राकृताश्चेति। तत्र सहजोऽरिः सापत्न्यपितृव्यतत्सुतादिः कृत्रिमारिः
यस्यापकृतं येन वापकृतं। प्राकृतस्त्वनंतरदेशाधिपतिः॥ २॥ सहजमित्रं भागिनेयपितृष्वस्रेयादि कृ
त्रिममित्रं यो नोपकृतः यस्य चोपकृतं प्राकृतं मित्रं एकांतरितो देशाधिपतिः॥ ३॥ सहजकृत्रिममित्रशत्रु
लक्षणरहितौ सहजकृत्रिमौ उदासीनौ। प्राकृतो दासीनो द्व्यंतरदेशाधिपतिः। अरिः पुनश्च त्रिविधः। यातव्यः

उच्छेत्तव्यःपीडनीयकर्शनीयकश्चेतित्रिभेदेन। तत्रयातव्योनंतरस्तुनृपतिः। व्यसनीहीनबलोविरक्तप्रकृतिः। विदुर्गो
मित्रहीनोदुर्बलः। सोच्छेत्तव्यः। पीडितोमित्रबलविहीनः। प्रबलमित्रबलयुक्तः। कर्शनीयः। निर्मूलनाशमुच्छे
दपीडनंबलनिग्रहः। कर्शनंतुपुनःशत्रुःकोशदंडापकर्षणमिति। मित्रंचद्विविधंदूषणीकर्शनीयमितिको
शबलहीनंदूषणीयंकोशबलाधिकंकर्शनीयं। अनंतरस्तत्परंपरइति। प्राग्नतारिःतत्परःशत्रुतमित्रं
तस्मात्परःप्रकृतउदासीनः। शेषाःपुनःप्रसिद्धत्वान्नोक्ताः। एतच्छत्रुमंडलंक्रमशःपूर्वादिदिक्क्रमेणचिंत्यं
तेषांचेष्टितंज्ञातव्यं। ज्ञात्वाचसामादिभिरुपायैर्वर्द्धमानोरिभिःसधेयं। एवंपुरतःपृष्ठतःपार्श्वतश्चत्रय
स्त्रयः। आत्माचैकइतित्रयोदशकराजमंडलपद्माकारंपार्ष्णिग्रहाक्रंदासारादयःत्वरिमित्रोदासीनोऽभ्य
वांतर्भवंतीतिसंज्ञाभेदमात्रंयथांतरेदृष्टिंइतियोगीश्वरेणनष्टथगुक्ताः।।३।। सामादिभिरुपक्रमेरि के
त्युक्तमिदानीमुपायानाह।। उपायाःसामदानंचभेदोदंडस्तथैवच। सम्यक्प्रयुक्ताःसिध्येयुर्दंडस्त्वगतिका
गतिः। सामप्रियभाषणं। दानंसुवर्णादिः। भेदोभेदनंतत्सामंतादीनांपरस्परंतोवैरस्योत्पादनेन। दंडउपांशुप्र
काशाभ्यांधनापहारादिवधपर्यंतोपकारः। एतेसामादयःपरिपंथ्यादिसाधनोपायाः। एतेचदेशकालाद्यनु
सारेणसम्यक्प्रयुक्ताःसिध्येयुः। तेषांमध्येदंडस्त्वगतिकागतिकः।। उपायांतरासंभवेनप्रयोक्तव्यः।। एतच्चपी
डनीयकर्शनीयाभिप्रायेण। यातव्योच्छेत्तव्ययोस्तुदंडएवमुख्यः।। एतेचसामादयोनकेवलंराज्ञांव्यवहारविष ६६
याः। यथात्रधीष्टपुत्रकाधीष्टदास्यामिनवमोदकान्।। यथान्यस्मैप्रदास्यामिकर्णमुत्पाटयामिते।।४।। किंच

संधिंचविग्रहंयानमासनंसंश्रयंतथा।। द्वैधीभावंगुणानेतान्यथावत्परिकल्पयेत्। संधिर्व्यवस्थाकरणंविग्रहो
पकारः। यानंपरंप्रतियात्रा।। आसनमुपेक्षा। संश्रयोबलवदाश्रयणं। द्वैधीभावोबलस्पर्द्धिशांकरणंएतान्सं
क्षिप्तान्गुणान्यथावद्देशकालशक्तिमित्रादिवशेनकल्पयेत्।।५।। यानकालमाह।। यदासस्यगुणोपेतं
परराष्ट्रंतदाव्रजेत्। यस्यबलहीनआत्माचहृष्टवाहनपुरुषः। यदापरराष्ट्रंसस्यैश्चाद्यादिभिर्गुणैश्चसमन्वितंधन
रत्नादिभिरुपेतंसंपन्नंशत्रुश्चहीनोबलादिभिरात्माचहृष्टवाहनपुरुषः। वाहनानिहस्त्यश्वादीनिचपुरुषाश्च
वाहनपुरुषाहृष्टावाहनपुरुषाःयस्यसतथोक्तःतदापरराष्ट्रमात्मसात्कर्तुंव्रजेत्।।६।। प्राणिनामभ्युदय
विनिपातानांदैवायत्तत्वात्यदिदैवमस्तितदास्वयमेवपरराष्ट्रादिवशीभविष्यंतीति। अथानास्तिकृतेपिपौरु
षेनभविष्यत्यतोत्यर्थएवायंयात्राप्रयासइत्यतआ। दैवपौरुषकारेचकर्मसिद्धिर्व्यवस्थिता। तत्रदैवमभिव्य
क्तंपौरुषंपूर्वदैहिकंकर्मसिद्धिःफलप्राप्तिरिष्टानिष्टलक्षणासानकेवलंदैवेव्यवस्थिताअपितुपुरुषकारे
पिलोकेतथादर्शनात्।। चिकित्सादिशास्त्रवैयर्थ्याच्च। अपिचपुरुषाकाराभावेदैवमेवस्तीत्याह। तत्रदैवमिति
। यतःपूर्वदेहार्जितपौरुषमेवदैवमुच्यते। अत्यपुरुषाकारानंतरंमहाफलोदयानियमः। तस्मात्पुरुषकारा
भावेनदैवमस्तीतिपुरुषकारेयत्नोविधातव्यः।।७।। इदानींमतांतरण्याह।। केचिद्दैवात्स्वभावाच्चकालात्पुरुष
कारतः। केचिदिष्टानिष्टलक्षणफलंदैवादेवेच्छंतिकेचित्स्वभावाच्चकालात्पुरुषकारतः। केचिदिष्टानिष्टल
क्षणंफलंदैवादेवेच्छंतिकेचित्स्वभावात्स्वयमेवभवतिनकारणांतरमपेक्षतइतिकेचित्। कालात्केचित्पुरुषाका

रणीतस्य पेक्षते इत्यनिके चित् वेति॥मू॥स्वमतमाह। संयोगे केचिदिच्छन्ति फलं कर्मशरावुरुषः। दैवादीनां समुच्च
ये संयोगे फलं भवतीति कर्मशरावुरुदयो मन्वादयो मन्यंते॥मू॥एकेकस्मात्फलं न भवतीत्यत्र दृष्टांतमाह। यथा
ह्येकेन चक्रेण रथस्य न गतिर्भवेत्। एवं पुरुषकारेण विना दैवं न सिध्यति नात्र तिरोहितमस्ति॥मू॥लाभाय परश
शृंगंतव्यमित्युक्तं। लाभश्च त्रिविधः हिरण्यलाभो भूमिलाभो मित्रलाभश्चेति। तेषु मित्रलाभो ज्यायान् अतस्तस्मा
त्सुपायैर्यत्नो विधातव्यः। तस्मात्सुपायश्च सत्यवचनमित्याह। हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः। अतो
यतेत तत्प्राप्तौ रक्षेत्सत्यं समाहितः। यस्मात् हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरोत्कृष्टा तस्मात्तत्प्राप्तौ यत्नेन यत्नं
कुर्यात्। सामादिभिः सत्यं च रक्षेत समाहितः सावधानः। सत्यमूलत्वान्मित्रलाभस्य॥मू॥इदानीं राज्यांगान्या
ह। स्वाम्यमात्यो जनो दुर्गं कोशो दंडस्तथैव च। मित्राण्येताः प्रकृतयो राज्यं सप्तांगमुच्यते। मयोक्तमाह इत्याह क
कलक्षणः स्वामी। अमात्या मंत्रिपुरोहितादयः। जनो ब्राह्मणादिप्रजाः। दुर्गं धन्वदुर्गादि। कोशः सुवर्णादिद
व्यस्य राशिः। दंडो हस्त्यश्वरथपदातिलक्षणं चतुरंगबलं। मित्राणि सहजकृत्रिमप्राकृतानि। एताः स्वाम्याद्याः रा
ज्यस्य प्रकृतयो मूलकारणानि। एवं राज्यं सप्तांगमुच्यते॥ब॥ तदेवाप्यन्नपो दुष्टेषु दंडं निपातयेत्। धर्मो हि दंड
रूपेण ब्राह्मणा निर्मितः पुरा। तदेवंविधं राज्यं प्राप्य दुष्टेषु वंचकशठधूर्तपरदारपरद्रव्यापहारिहिंसका
दिषु नृपो दंडं पातयेत्। हि यस्माद्धर्म एव दंडरूपेण पूर्वं ब्राह्मणा निर्मितः। तस्य च दंड इति यौगिकी संज्ञा। दंडो
दमनादित्याहुस्तेनादांतान् दमयेदित्यादिगौतमवचनात्॥मू॥स नेतुं न्यायतः शक्यो लुब्धेनाकृतबुद्धिनाप् ६१

वीक्तो दंडो लुब्धेन कृपणेनाकृतबुद्धिनान्यायतो न्यायानुसारेण नेतुं प्रयोक्तुं शक्यो न भवतीति॥मू॥ कीदृशेन श
क्यस्तादिकर्तुमित्याह। सत्यसंधेन शुचिना सुसहायेन धीमता। सत्यसंधेन अप्रतारकेण शुचिना जितारिषड्व
र्गेण सुसहायेन पूर्वोक्तसहायसंपन्नेन धीमता ज्ञानपापनयकुशलेन स दंडो न्यायतो धर्मानुसारेण नेतुं शक्यः॥मू॥
यथाशास्त्रं प्रयुक्तः सन् सदेवासुरमानवं। जगदानंदयेत्सर्वं अन्यथा तत्प्रकोपयेत्। स दंडः शास्त्रोक्तमार्गेण प्रयु
ज्यमानः सन् देवासुरमानवैः सहितं सर्वं जगदानंदयेत्। अन्यथा शास्त्रातिक्रमेण प्रयुक्तश्चेत् जगत्प्रकोपयेत्
॥मू॥न केवलमधर्मदंडे नकुन प्रकोपोऽपितु प्रयोक्तुर्दृष्टादृष्टहानिरपीत्याह। अधर्मदंडनं स्वर्गकीर्तिलोकविना
शनं। सम्यक्च दंडनं राज्ञः स्वर्गकीर्तिजयावहं। यः पुनः शास्त्रातिक्रमेण लोभादिना दंडः कृतः स पापहेतुत्वात् स्व
र्ग। कीर्तिलोकांश्च विनाशयति शास्त्रोक्तमार्गेण कृतः स्वर्गकीर्तिजयानां हेतुर्भवति॥मू॥ अपि भ्राता सुतोऽर्घ्यो वा
श्वशुरो मातुलोपि वा। नादंड्यो नाम राज्ञोस्ति धर्माद्विचलितः स्वकात्। अर्घ्यार्हः आचार्यादिः शेषं प्रसिद्धं। एते
भ्रातृसुतप्रभृतयोपि स्वधर्माद्विचलिता दंड्याः किमुतान्ये यतः स्वधर्माद्विचलितो दंड्यो नाम राज्ञः कोपि नास्ति एतच्च मा
तापित्रादिव्यतिरेकेण तथा च स्मृत्यंतरं। अदंड्यौ मातापितरौ स्नातकौ स्नातकपुरोहितपरिव्राजकवानप्रस्थाः श्रु
तशीलशौचाचारवंतः ते हि धर्माधिकारिण इति॥मू॥ किंच। योऽदंड्यान् दंडयेद्राजा सम्यक् वध्यांश्च घातयेत्। इष्ट
स्यात्क्रतुभिस्तेन समाप्तवरदक्षिणैः॥ यस्तु राजा दंड्यान् स्वधर्मचलनादिना दंडयोग्यान् सम्यक् शास्त्रदृष्टमार्गेण धि
क्धनदंडादिना दंडयति। वध्यान्वधार्हान् घातयति। तेन राज्ञा भूरिदक्षिणैः क्रतुभिरिष्टं भवति बहुदक्षिणक्र

त्फलंप्राप्नोतीत्यर्थः॥नचफलश्रवणात्दंडप्रणयनंकाम्यमितिमंतव्यंअकरणेप्रायश्चित्तस्मरणात्।यथाह
वसिष्ठः।दंड्योत्सर्गेराजैकरात्रमुपवसेत्।त्रिरात्रंपुरोहितः।कृच्छ्रमदंड्यदंडनेपुरोहितस्त्रिरात्रंराजेति॥छ॥इ
ष्टेदंडःसम्यक्॥प्रयोक्तव्यइत्युक्तंदुष्टपरिज्ञानंव्यवहारदर्शनमंतरेणनभवतीतितत्परिज्ञानायव्यवहारद
र्शनमहरहःस्वयंकर्तव्यमित्याह।इतिसंचिंत्यनृपतिःक्रतुतुल्यफलंपृथक्।व्यवहारान्स्वयंपश्येत्सभ्यैःप
रिवृतोन्वहं।इत्येवमुक्तेनप्रकारेणक्रतुतुल्यफलंदंड्यदंडनेसम्यक्विचिंत्यपृथक्वर्णादिक्रमेणसभ्यैर्वक्ष्य
माणलक्षणैः।परिवृतःप्रतिदिनंव्यवहारान्वक्ष्यमाणमार्गेणदुष्टादुष्टज्ञानार्थंराजास्वयंपश्येत्॥छ॥कुप
येत्पथि॥कुलानिब्राह्मणादीनि।जातयोमूर्धावसिक्तप्रभृतयः।श्रेणयस्तांबूलिकादीनां।गणाहेडाबुकादीनां
जानपदाःकारुकादयः॥एतान्स्वधर्माच्चलितान्प्रच्युतान्राजाविनीययथापराधंदंडयित्वापथिस्थाप
येत्।दंडश्चरत्नेषुनिपातयेदित्युक्तं।सचदंडोद्विविधःशारीरोर्थदंडश्चेति॥यथाहनारदः॥शारीरश्चार्थदं
डस्तुद्विविधःस्मृतः।शारीरस्ताडनादिस्तुमरणांतःप्रकीर्तितः।काकिण्यादिस्त्वर्थदंडःसर्वस्वांतस्तथैव
चेति।द्विविधपरानुसारेणअनेकत्वाभावात्।सशारीरोदशधाप्रोक्तस्त्वर्थदंडस्त्वनेकधेतिक।तत्रकृष्णल
माषसुवर्णपलादिशब्दैरर्थदंडोवक्तव्यस्तेचप्रतिदेशंभिन्नपरमार्थइत्येकरूपापराधेपिदेशभेदेनन्यूनाधिक
दंडोमाभूदितिकृष्णलादिशब्दानांनियतपरिमाणविषयत्वंदंडव्यवहारेदर्शयितुमाह॥५१॥जालेति॥जाल ६८
कांतरप्रविष्टादित्यरश्मिस्थितंयद्रजस्तत्रसरेणुरित्युक्तंयोगीश्वरादिभिः।तत्त्रसरेणवोलिक्षास्वेदजन्मकांडंता।
॥जालसूर्यमरीचिस्थंत्रसरेणुरजःस्मृतं।तेष्टौलिक्षास्तुतास्तिस्रोगोरसर्षपउच्यते॥५२॥

लिक्षास्तिस्रोराजसर्षपोराजिकातेराजसर्षपास्त्रयोगौरसर्षपःसिद्धार्थस्तेगौरसर्षपाःषड्यवोमध्यःस्थूलोनलघु।
सूक्ष्मः।एतेनगौरसर्षपाअपिमध्यमाइतिगम्यते।तथाराजसर्षपाइतिमध्यमशब्दादेवसर्षपादिशब्दानकेवलसु
मानवचनाःकिंतुतदुन्मितद्रव्यवचनाइतिगम्यते।तथाप्रस्थपरिमितायवाःप्रस्थाउच्यंते।एवंसर्षपाद्युन्मितद्र
व्यसर्षपादिशब्दैःसर्षपादिशब्दानांकेवलोन्मानवचनत्वेत्रसरेणुनामुपसंख्यानात्मानुशक्यात्तत्तद्द्वारेणकृष्णला
दिव्यवहारोनस्यात्।त्रसरेणुःस्थूलतमःसूक्ष्मतरःसूक्ष्मतमःमध्यसर्षपाद्युन्मानभेदेनप्रतिदेशंव्यवहारस्थितिव्यवहा
रेमध्यमइतिनियम्यते।तेमध्यमायवाःसुयवैःकृष्णलस्तेकृष्णलाःपंचैकोमाषस्तेमाषस्तेमाषाःषोडशैकसुव
र्णःसुवर्णाश्चत्वारःपलंपलंपंचवापिपलंकीर्तितंनारदादिभिः॥तत्रस्थूलयवैःकृष्णलपरिकल्पनायांव्याव
हारिककनिष्ठःषोडशांशःकृष्णलोभवति।तैःपंचभिर्माषोमाषैःषोडशभिःसुवर्णः।सचव्यावहारिकेऽपंचभि
र्निष्कैरेकःसुवर्णोभवति।तेचचत्वारःपलमितिनिष्काणांविंशतिःपलं।यदातुसूक्ष्मैर्यवैस्त्रिभिःकृष्णलःपरि
कृष्णलःपरिकल्प्यते।तदाव्यावहारिकनिष्कस्यद्वात्रिंशत्तमोभागःकृष्णलोभवति।तस्मिन्पक्षेसुवर्णःसार्धनि
निष्कद्वयंभवति।पलंचदशनिष्कं।यदातुमध्यमयवैः॥कृष्णलमानादानिष्कस्यविंशतितमोभागःकृष्णलःसुवर्ण
श्चतुष्कनिष्कःषोडशनिष्कपलंपंचसुवर्णपलमितिपक्षेविंशतिनिष्कंपलं।एवमन्यदपिनिष्कस्यचत्वारिंशोभा
गःकृष्णलोद्विनिष्कोसुवर्णोष्टनिष्कंपलमित्यादिलोकव्यवहारानुसारेणास्मादेवतंत्रादूहनीयं॥५२॥छ॥गौ
रस्तुतेत्रयःषड्भिर्यवोमध्यस्तुतेत्रयः।कृष्णलःपंचतेमाषास्तेसुवर्णश्चषोडश॥५३॥पलंसुवर्णाश्चत्वारःपंच

कापिप्रकीर्त्तिता।। द्वेकृष्णलेरूप्यमाषोधरणंषोडशैवते।।शतमानंचदशभिर्धरणैःपलमेवच।।५५।।
न्मानंप्रतिपाद्येदानींरजतस्याह।।द्वे इति निष्कःसुवर्णाश्चत्वारः द्वेकृष्णलेपूर्वोक्तेरूप्यसंबंधीमाषाः षोडशमा
षधरणंपुराणः इत्यस्यैवसंज्ञांतरंषोडशमाषधरणंपुराणश्चैवराजतः इतिमनुस्मरणात्।। दशभिर्धरणैःशतमानंपल
मित्यभिधीयते।।पूर्वोक्तश्चत्वारःसुवर्णाराजतोनिष्कोभवति।।५५।। कार्षिकस्ताम्रिकःपणःपलस्यचतुरंशतः
।।इदानींताम्रिकस्योन्मानमाह।।कर्षिकइति।कर्षइतिलोकप्रसिद्धः।कर्षेणोन्मितःकार्षिकस्ताम्रस्यविकारस्ता
म्रिकःकर्षसंमितस्ताम्रविकारपणसंज्ञोभवति।कार्षापणसंज्ञश्चकार्षापणस्तुविज्ञेयः।ताम्रिकःकार्षापणिकः
इतिमनुवचनात्।पंचसुवर्णपलपक्षेविंशतिमाषःपणोभवति।तथासतिमाषोविंशतिभोभागःपणस्यपरिकी
र्त्तितः इत्यादिव्यवहारोभवति।चतुःसुवर्णपलपक्षेतुषोडशमाषःपणोभवति।अस्मिंश्चपक्षेसुवर्णकार्षापणं
पणशब्दानांसमानार्थत्वेपिकार्षापणशब्दोताम्रविषयएव।एवंतावद्धेमरूप्यताम्राणामुन्मानमुक्तं द्रव्यव
हारोपयोगित्वात्कांस्यरीतिकादीनामपिलोकव्यवहारादवगन्तव्यमुन्मानमिष्टव्यं।।५६।।साशीतिःपणसाह
स्रोदंडउत्तमसाहसः तदर्धंमध्यमःप्रोक्तःतदर्धमधमःस्मृतः।।५७।। स्वशास्त्रपरिभाषिकामाह।। ।।साशी
तिइति।। ।।पणानांसाहस्रास्त्रंपरिणामस्येतिपणसहस्रमशीत्यासहवर्त्ततइतिसाशीत्यधिकपणसहस्रप
रिमितोयोदंडःसउत्तमःसाहससंज्ञोवेदितव्यः।तदर्धमिति।तदर्धमध्यमस्तस्यसाशीतिपणसहस्रस्यार्धंचा
त्वारिंशादधिकपणपंचशतपरिमितोमध्यमसाहससंज्ञितः।।तदर्धमधमस्तस्यचत्वारिंशादधिकपंचशतस्य ६७

तस्यतस्यार्धंसप्तत्यधिकपणशतद्वयपरिमितोदंडोधमसाहससंज्ञयास्मृतः।।उक्तोमन्वादिभिः।यत्तुपणानां
द्वेशतेसार्धेप्रथमःसाहसःस्मृतः।मध्यमःपंचविज्ञेयः।सहस्रंत्वेवचोत्तमः।इतिमनुनोक्तंच।पक्षांतरमप
राधविषयइष्टव्यं।।५७।। ।।धिग्दंडस्त्वथवाग्दंडोधनदंडोवधस्तथा।योज्याव्यस्ताःसमस्तावाह्यपराधवशादिमे
।।५८।। ।।दंडभेदानाह।।धिग्दंडोधिगितिकुत्सनं।वाग्दंडस्तुपरुषशापवचनात्मकः।।धनदंडोधनापहारात्म
कः।।वधदंडःशारीरोवधादिजीवितांतः।।एतेचतुर्विधादंडाव्यस्ताएकैकशःसमस्तावात्रिधाद्वित्रिचतुरोत्रापरा
धानुसारेणप्रयोक्तव्याः।।उक्तक्रमेणपूर्वासाध्येउत्तरःप्रयोक्तव्यः।।यथाहमनुः।।धिग्दंडंप्रथमंकुर्याद्वाग्दंडं
तदनंतरं।तृतीयंधनदंडंचवधदंडमतःपरमिति।।५८।। ज्ञात्वापराधंदेशंचकालंदंडमथापिवा।।वयःकर्म
चवित्तंचदंड्यंदंडेषुपातयेत्।।५९।। दंडव्यवस्थानिमित्तान्याहज्ञात्वेति।यथापराधंज्ञात्वातदनुसारेणदंडप्र
णयनंकार्यमेवदेशकालबलवयःकर्मज्ञात्वाविज्ञानिच्चतदनुसारेणदंड्येषुदंडप्रणयनंकुर्यात्।तथा
चबुद्धिपूर्वाबुद्धिपूर्वसहत्वानुसारेणच।यद्यपिशास्त्रमधिकृत्यायंराजधर्मकिलाप्युक्तः।तथापिवर्णांतर
स्यापिविषयमंडलादिपरिपालनादिकृतस्यायंराजधर्मेविदितव्यः।राजधर्मान्प्रवक्ष्यामियथावृत्तोभवेन्नृ
पइतिनृपग्रहणात्करग्रहणस्यरक्षार्थत्वेसत्स्वदंडप्रणयनायत्तत्वादिति।उत्तमोपपदस्येयंशिष्यस्य
कृतिरात्मनः।धर्मशास्त्रस्यविवृतिर्विज्ञानेश्वरयोगिनः।।५९।। ।।इतिश्रीपद्मनाभोपाध्यायात्म
जस्यश्रीमत्परमहंसपरिव्राजकाचार्यविज्ञानेश्वरभट्टारककृतौऋजुमिताक्षरायांयाज्ञ

मि॰ आ
७०

वल्कमुनिप्रणीतशास्त्रविवृतौ आचाराध्यायः प्रथमः समाप्तः ॥ १ ॥ ॥ श्रीरस्तु ॥ ॥ श्री ॥

अस्मिन्नध्याये प्रस्तुतप्रकरणानि इति । उपोद्घातप्रकरणं ॥ १ ॥ ब्रह्मचारीप्रकरणं ॥ २ ॥ विवाहप्रकरणं
॥ ३ ॥ जातिवर्णविवेकप्रकरणं ॥ ४ ॥ गृहस्थाचारप्रकरणं ॥ ५ ॥ स्नातकप्रकरणं ॥ ६ ॥ भक्ष्याभक्ष्यप्रक
रणं ॥ ७ ॥ द्रव्यशुद्धिप्रकरणं ॥ ८ ॥ दानधर्मप्रकरणं ॥ ९ ॥ शांतिप्रकरणं ॥ १० ॥ श्राद्धप्रकरणं ॥ ११ ॥

इति राजधर्मे द्वादशं प्रकरणं समाप्तं ॥ ॥

राजधर्मप्रकरणं ॥ १२ ॥ ॥ एवं द्वादश प्रकरणानि ॥ ॥ इति याज्ञवल्क्यमुनिशास्त्रगताविवृति
र्नकस्यविहिताविदुषः प्रमिताक्षरापिविपुलार्थवतिपरिषिंचतिश्रवणयोरमृतं ॥ १ ॥ ॥ श्रीरस्तु ॥

॥ ॥ मिताक्षरा आचाराध्यायः समाप्तः ॥ ॥

७०

3